श्रीमत्कविकुलतिलक-
श्रीमद्वादिराजश्रीमत्पूज्यचरणविरचिता

युक्तिमल्लिका

फलसौरभम्

श्रीमत्सत्यप्रमोदतीर्थश्रीचरणविरचितया

विवृत्या

समलंकृतम्

सम्पादक :— केशव श्रीनिवासाचार्य कट्टि

प्रकाशिका :— श्रीमन्मध्वसिद्धान्ताभिवृद्धिकारिणी सभा

बेंगलूर—४.

१९९३

श्रीमत्कविकुलतिलक-
श्रीमद्वादिराजश्रीमत्पूज्यचरणविरचिता

युक्तिमल्लिका

फलसौरभम्

श्रीमत्सत्यप्रमोदतीर्थश्रीचरणविरचितया

विवृत्या

समलंकृतम्

सम्पादक :— केशव श्रीनिवासाचार्य कट्टि

प्रकाशिका :— श्रीमन्मध्वसिद्धान्ताभिवृद्धिकारिणी सभा

बेंगलूर—४.

१९९३

Yuktimallika – Phalasaurabha

Written by : Shri Vadirajateertha

Comentry by : Shri Satyapramodateertha

Published by : **Shriman Madhva Siddhanta Abhivruddhikarini Sabha,**
Uttaradi Mutt, Bangalore - 560 004

Price : Rs. 60–00

Printed at : **Raja Printers**
S. R. Nagar
Bangalore

॥ श्री दिग्विजयरामो विजयते ॥

भूमिका

श्रीत्रिविक्रमपण्डिताचार्यैः स्वसुकृतौ वायुस्तुतौ 'मध्वाख्यं मन्त्रसिद्धं किमुत कृतवतो मारुतस्यावतारं' इति श्लोकेन मध्वस्य वायोस्तृतीयावतारताया मन्त्रसिद्धता प्रत्यज्ञायि। तथा 'येऽमुं भावं भजन्ते' इत्यादिना जीवोत्तमत्वेन मध्वभजनस्य मोक्षं प्रति अन्तरङ्गसाधनभावनिरूपणं व्यधायि। एवं 'आनन्दान्मन्दमन्दा ददति हि मरुत' इत्यनेन च मोक्षस्य आनन्दानुभवात्मकत्वं प्रत्यपादि। तदेतत्प्रमेयत्रयं सौरभेऽस्मिन् सुविपुलप्रमाणोदाहरणैः तत्र तत्र वायुस्तुतिसंवादप्रदर्शनपुरस्सरं च समर्थ्यते। अहो वायुस्तुतेर्महीयान्महिमा।

फलाध्यायोपक्रमे नित्यशः कार्यस्य प्रथमतो भाव्यस्य साधनस्य निरूपणमिव फलसौरभेप्यस्मिन् आदितः अन्तरङ्गसाधनचर्चः संश्लिष्यति। मायिनः खलु शब्दमात्रस्य परोक्षज्ञानजननस्वाभाव्यमपलप्य तत्त्वमस्यादि- वाक्यस्यैव परोक्षहेतुतामाचक्षते। तथा प्रसादनैरपेक्ष्येण ज्ञानेनैवाविद्यास्तमय- लक्षणमोक्षसिद्धिं सङ्गिरन्ते। स्वसिद्धान्तस्य अद्वैतेतिसंज्ञामप्यवधीर्य ब्रह्मणि सगुणं निर्गुणं इति द्वैतभावं मुक्तौ च परापरद्विधाभावं समास्थिताः। ता एता दुरुक्तीः दूरीकृत्य मुकुन्द एक एव परं ब्रह्मेति, तत्पादमूलप्राप्तिरेकैव मुक्तिरिति, तत्र च प्रसाद एव परमसाधनमिति च चर्चोपक्रमे विधीयते।

मध्वस्य वाय्ववतारत्वे पञ्चदशानां ऋङ्मन्त्राणां वायुपुराणादिस्मृतीनां च चर्चितत्वेन सौरभमिदं वायुस्तुतिरेव खलु। तदुक्तमत्रैव—

'स्पष्टं मध्वाभिधानाङ्का सप्तर्चोऽत्र विचारिताः।
अष्टर्चस्तच्चरित्राङ्का चक्राङ्कैकहरस्य वाक्।'

'सूक्तस्थानामियं चर्चा तद्वायुस्तुतिरेव नः'। इति।

एवं, मुक्तानां बहुत्वं साकारत्वं, मिथो नैजतरतमभावः, एवमपि द्वेषेर्ष्यासूयाद्यप्रसङ्गः, मुक्तावपि तत्तत्स्वरूपजातिस्वाभाव्यानुवृत्तिः, नियतगुरुभ्यः तप्तचक्राङ्कधारणस्य देवैरपि संप्रार्थनीयता एवमाद्यनेकानेकप्रमेया आकरग्रन्थोक्ता अत्र संगृह्यन्ते । 'विस्तरस्त्वस्य सर्वस्य मूलशास्त्रे प्रदृश्यते' इति तदुक्तिमनुरुध्य अस्माभिः तत्र तत्रोक्तप्रमेयेषु भाष्यटीकादिसंवादात्मकता यथामति प्रादर्शि ।

आनुषङ्गिकतया अतीतसौरभसर्वस्वान्यपि निर्मथ्य तत्रत्यविषयसारोऽप्यत्र संवर्णित इति इदं सौरभं सुधाकलश इव वसुधासुराणां मुदानैर्भर्यं नित्यदा आदधाति ।

इदं पुनरत्रावश्यमावेद्यते । अस्माभिः स्वादिक्षेत्रे श्रीमद्वादिराजपूज्यचरणानां पवित्रसन्निधौ युक्तिमल्लिकाप्रवचनावसरे एतद्ग्रन्थरचने तत्प्रेरणया सङ्कल्पमात्रं व्यधायि । ईदृशस्य अपारागाधस्य गहनयुक्तितरङ्गभङ्गसङ्कुलस्य विवृतिकरणं समुद्रतरणमिव यत्सत्यं दुर्घटमेव नः । एवमपि सुरोत्तमतीर्थकृतामतिविशदां टीकां नौकामिव सुदृढतया सन्ततं समाश्रित्य अस्मद्देशिकपूज्यचरणानां कारुण्यधारां कर्णधारमिव प्रतिपदं समुपजीव्य दिष्ट्या नातिप्रयत्नं मनोरथमहोदधिस्तीर्ण इति । एतस्मिन् सन्दर्भे न खलु न स्मरामः, सुखेन सागरस्य पारगमने अस्मदनुभवसाक्षिकं श्रीसदभिज्ञतीर्थश्रीचरणानां प्राक्तनमनुभावम् । ते खलु पूज्यचरणाः समुद्रसेतोः प्रत्यावर्तमानात्रः मध्येमार्गं संक्षुब्धमब्धिं प्रशमय्य सुखेनैव पारं प्रापयन् । साध्विदमुच्यते गुरुप्रसादो बलवानिति ।

तदेवं बुद्धिशुद्धिकर्यां हृद्यपद्यरसस्निग्धायामनवद्यायां युक्तिमल्लिकायां श्रद्धावृद्धिमुत्पाद्य अविद्यानिद्रां विद्राव्य भवाब्धेः साधुबुद्धीन्समुद्धरेदिति अस्मदाराध्यं श्रीमूलरामं मूर्ध्नि बद्धाञ्जलिपुटा अभ्यर्थयामः ।

श्रीमदुत्तरादिमठाधीशाः
श्रीसत्यप्रमोदतीर्थश्रीचरणाः ।

॥ प्रणतिभिः प्रीणये पूर्णबोधम् ॥

प्रकाशकानां निवेदनम्

अयि भो ! विपश्चिदपश्चिमाः सुविदितचरमेतत् भवतां यत् "सिविल् सूट्, गीताप्रतिपदार्थचन्द्रिका, षट्टिप्पिणीसहिता श्रीमन् न्यायसुधा" इत्यादिग्रन्थानां प्रकटनेन सार्थकीकृतनाम्नी इयं श्रीमन्मध्वसिद्धान्ताभिवृद्धिकारिणी सभा नूनमनेकेषां विदुषां विद्यार्थिनां तथा लौकिकानां च प्रतिवर्षं विद्वज्जनानां उपन्यासानां समायोजनेन महोपकारभारं नितरां भारयन्तीति ।

सैव प्रकाशनकृतौ निरता श्रीमद्वादिराजतीर्थैः विरचितायाः युक्तिमल्लिकायाः **फलसौरभाख्यं ग्रन्थं** श्रीमत् परमपूज्य १००८ श्रीसत्यप्रमोदतीर्थश्रीपादानां विवृत्या समेतं प्राकाश्यतां उन्नेष्यतीति सामोदं निवेदयामः ।

ग्रन्थमिमं प्रकाशयितुं अनुज्ञां दत्वा आशीराशिं च प्रयुज्य महोपकारं कृतवतां श्री १००८ श्री सत्यप्रमोदतीर्थानां चारुचरणनलिनयोः समर्पयामो वयं भूयो भूयो दीर्घदण्डप्रणामान् ।

अस्य ग्रन्थस्य सम्पादकान् श्री कट्टी केशवाचार्यांश्च प्रापयामो भूयांसि नमांसि ।

तथा ग्रन्थस्यास्य प्रकाशने यथाकालं कृतधनसाहाय्यं श्री जयसत्यप्रमोदनिधिं तथा प्राणेशराव् महोदयं च सादरं अभिनन्दयामः ॥

इति
श्रीमन्मध्वसिद्धान्ताभिवृद्धिकारिणी सभा
उत्तरादिमठ, बेङ्गलूर ४

फलसौरभम्

विषयानुक्रमणिका

॥ श्रीः ॥

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवाय नमः ॥

युक्तिमल्लिकायाम्

फलसौरभम्

यद्यज्ञानं मनोवृत्तिप्रतिबन्धकमेव न ।
मनसा ब्रह्मणस्तर्हि साक्षात्कारस्सदा भवेत् ॥ १ ॥

योग्यस्यानापरोक्ष्यं हि प्रतिबन्धनिबन्धनम् ।
योग्यं च मनसो ब्रह्म दृश्यतेऽन्ते कथं न चेत् ॥ २ ॥

॥ श्री दिग्विजयरामो विजयते ॥

रामं दिग्जयिनं सुनिर्मलतनुं विभ्राजमानं सदा
श्रीसीतायुतमूलराममनलं सद्दशरामं तथा ।
व्यासं विठ्ठलमप्रमेयसुसुखं मध्वं जयीन्द्रं गुरून्
अन्यान्मद्गुरुमानमामि सततं मद्योग्यसौख्याप्तये ॥ १ ॥

अथैतेषां कृपालेशमुपजीव्यैव केवलम् ।
बुद्धिशुद्ध्यै यथाबोधं विवृण्वे फलसौरभम् ॥ २ ॥

आद्यसौरभाभ्यां ब्रह्मस्वरूपं निर्धार्य अनन्तराभ्यां साधनं समर्थितम् । अथेदानीं अवसरप्राप्तं फलं सौत्रयुक्तिभिर्निर्णीयते । तत्रादौ ज्ञानस्यैव प्रसादनिरपेक्षस्य मोक्षसाधनत्वं परोक्तं पराकृत्य 'जिज्ञासोत्थज्ञानजातत्प्रसादादेव मुच्यते' इत्यनुव्याख्यानोक्तो अतःशब्दार्थो निर्धार्यते । सौरभभेदस्य प्रायिकत्वात् फलसौरभे साधनचर्चा नासङ्गता । किञ्चैवं प्रसादस्यारन्तरङ्गसाधनत्वं ज्ञापितं भवति । तत्रादौ वृत्तेरेव स्वभावतोऽज्ञाननिवर्तकत्वं अन्योन्याश्रयदोषेण निराह यदीति । मनोवृत्तिः भगवदपरोक्षीकरणयोग्येति तावदवश्यमङ्गीकरणीयम् ।

'मनसैवानुद्रष्टव्यं' इति श्रुतेः। न च तावता साक्षात्कारः सदा जायते। अतस्तत्प्रतिबन्धकसद्भाव आवश्यक इत्याह **यदीति**। उपपादयति **योग्यस्येति**। **अनापरोक्ष्यं** अपरोक्षज्ञानाभावः। **प्रतिबन्धेति** अज्ञानरूपेत्यर्थः। **अन्ते** 'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ। संशयं च पराणुद्य लभते ब्रह्मदर्शनमि'-त्युक्तचरमापरोक्षकाले ॥ १ ॥ २ ॥

श्रुतिश्च मनसैवैनं पश्यतीत्याह योग्यताम्।
रुणद्धि न परोक्षं तत्साक्षात्कारं रुणद्धि च ॥ ३ ॥

तत् प्रतिबन्धकम् ॥ ३ ॥

मनसः प्रतिरोधे हि श्रवणाद्यपि मृग्यते।
प्रतिबन्धनिरासाय न चेत्स्वार्थं स्पृशेद्बलात् ॥ ४ ॥

प्रतिबन्धनिरासाय अज्ञानसंशयविपर्ययनिरासाय ॥ ४ ॥

मनसः प्रतिरोधे हि स्यादन्योन्याश्रयो ध्रुवम्।
मनसोऽप्रतिरोधेऽपि स्यादन्योन्याश्रयो ध्रुवम् ॥ ५ ॥

एवं च वृत्त्यैवाज्ञाननिवृत्तिरिति परमतेऽन्योन्याश्रयो वज्रलेप इत्याह **मनस इति**। **ध्रुवमिति** अज्ञाननिवृत्तौ साक्षात्कारः। साक्षात्कारेणैव चाज्ञाननिवृत्तिरिति। कार्येणैव स्वप्रतिबन्धकनिवृत्तिरित्यभ्युपगमात्। यथाऽऽह 'श्रुतमयेन ज्ञानेन तत्त्वमभिधाय चिन्तामयीमवस्थामवलम्बमानस्य यदन्तःकरणपरिणामात्मकं वृत्तिरूपं ज्ञानमुपजायते तेन भवेदज्ञाननिवृत्तिरि'ति। अन्योन्याश्रय इत्युपलक्षणम्। स्वयमज्ञानकार्याया वृत्तेः स्वोपादानाज्ञाननिवर्तकत्वासंभवश्च दोषो ज्ञातव्यः। तदुक्तं न्यायामृते अविद्यानिवर्तकभङ्गे [४-२] "किञ्च तन्निवर्तकत्वे तत्स्थित्यसहिष्णुत्व-स्थितिकत्वरूपविरोधस्य तन्त्रत्वात्कार्यस्य चोपादानेनाविरोधान्न वृत्तिः स्वोपादानाज्ञाननिवर्तिके"ति ॥ ५ ॥

श्रवणं मननं चैव ध्यानं चेति क्रमात्त्रयम्।
प्रधानाङ्गं हि मनसो द्रष्टव्ये परमात्मनि ॥ ६ ॥

'स्वभावाज्ञानवादस्य निर्दोषत्वान्न तद्भवेदि'त्यनुव्याख्यानमनुरुध्य स्वमते भगवत्प्रसादादेवाज्ञाननिवृत्तिरित्यभ्युपगमेन न कोऽपि दोष इत्याह **श्रवणमिति**। हिशब्देन भाष्योदाहृतया 'श्रुत्वाऽऽत्मानं मतिपूर्वं ह्युपास्य इहैव दृष्टिं परमस्य विन्देत्' इति श्रुत्या प्रसिद्धिमाह ॥ ६ ॥

प्रतिबन्धनिरुद्धं हि मनो द्रष्टुं न शक्नुते ॥ ७ ॥

प्रतिबन्धेति एतच्च 'ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनादि'ति सूत्रभाष्ये स्पष्टमिति भावः ॥ ७ ॥

परोक्षज्ञानरूपात्तु सदा ध्यानात्प्रसन्नधीः।
अपसार्य निरोधं तं स्वात्मानं दर्शयेत्प्रभुः ॥ ८ ॥

परोक्षज्ञानरूपादिति तेन परमपाटवापन्नाद्ध्यानादतिरिक्तं नापरोक्षज्ञानं नामास्तीति मतं प्रत्युक्तम्। 'तेषां दर्शनश्रुतय उपचरितार्थाः प्रसज्येरन्' इति सुधायां तत्पक्षस्य दूषणात्। **सदेति** सुधोक्तरीत्या आदरनैरन्तर्याभ्यां विषयवैराग्य-तद्भक्तिसहिताद् बहुकालोपचितादित्यर्थः। **ध्यानात्** निदिध्यासनापरपर्यायात्। **निरोधं** स्वगुणाच्छादिकापरमाच्छादिकारूपप्रतिबन्धकीभूतप्रकृतिद्वयम्। **अपसार्य** द्वितीयामिति शेषः। आद्यां हत्वा अकार्यकरीं कृत्वेत्यपि ग्राह्यम्। **प्रभुः** अचिन्त्यशक्तिः। तेन स्वयमव्यक्तस्वभावस्यापि स्वात्मनः प्रकाशनं युक्तम्। एवं अनादेर्बन्धस्य विनाशनमपि। तेन स्वमते ज्ञानस्वभावत एव तत्प्रतिबन्धक-निवृत्त्यनङ्गीकारात्प्रसन्नपरमात्मन एव तदङ्गीकारात् परमत इव नान्योन्याश्रय इति ज्ञापितम्। तदुक्तमनुव्याख्याने 'अज्ञानां ज्ञानदो विष्णुरि'ति ॥ ८ ॥

जह्यजामजितेत्याह तस्माद्भागवते श्रुतिः ॥ ९ ॥

उक्तार्थं प्रमाणयति **जहीति**। 'जय जय जह्यजामजितदोषगृहीतगुणामि'त्यत्र, जयेति द्विर्वचने एकाया अजाया हननं अपराया अपसारणं विवक्षितम्। तेनोक्तार्थे संवादः ॥ ९ ॥

दृष्टश्च भगवानेकं हृद्ग्रन्थिं स्वं भिनत्त्यजः।
अन्यं चापसृतं कुर्यात्तेनाच्छादयति क्वचित् ॥ १० ॥

भिद्यते हृदयग्रन्थिरिति श्रुतावपि इयमेव गतिरित्याह **दृष्ट इति** ॥ १० ॥

अतः कदाचिद्दृश्योऽसावदृश्योऽपि कदाचन।
आमुक्तेश्च व्यवस्थेयं जीवन्मुक्तिश्च सा मता ॥ ११ ॥

तेन 'मनसः प्रतिरोधे ही'ति प्रागुक्तोभयतः पाशारज्जुर्नास्मान्स्पृशतीत्याह **अत इति**। कदाचन प्रारब्धकर्मणा प्रतिबन्धदशायाम्। **सा** प्रारब्धकर्मावसानपर्यन्ता। **मता** 'ॐ ऐहिकमप्रस्तुतप्रतिबन्धे' इत्यधिकरणे ॥ ११ ॥

यदि ज्ञानेनैव कार्यैस्सहाज्ञानं निवर्तते।
तदा मोक्षविलम्बस्य न किञ्चित्कारणं तव ॥ १२ ॥

यदीति। तदुक्तं सुधायां 'यदि च ज्ञानमात्राद्बन्धबाधः तदा ज्ञाने सति किमपि मुक्तिर्नैवापेक्षते इति सद्य एव साक्षात्कृतब्रह्मणां शरीरादिनिवृत्तिः प्रसज्येत' इति ॥ ॥ १२ ॥

स्वतन्त्रश्चेत्प्रभुर्मध्ये स्वेच्छया स निवर्तयेत्।
स्वतन्त्रश्च नियोगार्हो नेत्याहुर्हि मनीषिणः ॥ १३ ॥

स्वेच्छयेति। न तु प्रारब्धकर्मप्रतिबद्धत्वात्तदिच्छाया इति भावः। 'अचेतनानां कर्मणां स्वतन्त्रभगवत्प्रतिबन्धकत्वायोगात्' इति सुधोक्तेः ॥ १३ ॥

वरं वरय भद्रं त ऋते कैवल्यमात्मनः।
एक एवेश्वरस्तस्य भगवान्विष्णुरच्युतः।
इति भागवते प्रोक्तं तद्धि देवानुशासनम् ॥ १४ ॥

देवानां मुचुकुन्दं प्रत्यनुशासनम्। **भागवते** [द. उ. अध्या. ५१, श्लोक २०] **एवेति** ज्ञानस्वभावस्य व्यावृत्तिः इतरदेवानामपि। **अच्युतः** चतुर्विधनाशरहितः अत एव **ईश्वरः** मोक्षदानसमर्थः ॥ १४ ॥

मुक्तौ ग्रन्थिद्वयं सम्यङ्मोचयेन्मुक्तचेतनात्।
बन्धं मनोमानलिङ्गदेहात्मानं च मोचयेत्।
मुक्तौ स्वरूपनिष्पत्त्या तस्य स्वच्छन्ददर्शनम् ॥ १५ ॥

मानः अस्वरूपे स्वरूपत्वबुद्धिः **लिङ्गदेहात्मा** प्राकृतदेहविषयिणी। न तु स्वरूपदेहे जीवभावाभिमानः। तस्य मुक्तावप्यनुवृत्तेः। 'ब्रह्मैव सन् ब्रह्माप्येति' इति श्रुतेः ब्रह्म प्रधानमुपयान्त्यगताभिमाना इति स्मृतेश्च। **स्वच्छन्देति** अनिशमित्यर्थः। "सकलस्य मुक्तनिकरस्य दृशाम्। वपुरिन्दिरापतिरमन्दरसं मतिसुन्दरं प्रकटयत्यनिशमि"ति सुमध्वविजयोक्तेः ॥ १५ ॥

प्रतिबन्धनिवृत्तिश्च प्रतिबध्येन केवलम्।
यस्यान्योन्याश्रयस्तं त्वां मुक्तं चापि न मुञ्चति॥ १६ ॥

मुक्तं चापि तमःप्राप्त्यनन्तरमपि। मायावादिनस्तम एव मुक्तिः। **न मुञ्चति** अन्यथाज्ञानस्य तत्स्वरूपत्वात् ॥ १६ ॥

साक्षात्कारे तु करणं श्रवणं किल केवलम्।
श्रवणेऽङ्गिन्युत्तराङ्गं मननादीति कश्चन ॥ १७ ॥

श्रुतेर्ब्रह्मणि तात्पर्यावधृतिः श्रवणं मतम्।
त्रिक्षणस्थायिविज्ञानरूपत्वान्न स्थिरं हि तत् ॥ १८ ॥

न केवलं ज्ञानस्वभावविषये किं नाम ज्ञानसाधनानां श्रवणमनन निदिध्यासनां गुणप्रधानभावविषयेऽपि मायावादिनोऽन्यथामतिं दर्शयति **साक्षात्कार** इत्यादिभिः। **कश्चन** विवरणकारः। यथाऽऽह 'श्रवणमङ्गि प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानात्। मनननिदिध्यासने तु चित्तस्य प्रत्यगात्मप्रवणसंस्कारपरिनिष्पन्न-तदेकाग्रवृत्तिकार्यद्वारेण ब्रह्मानुभवहेतुतां प्रतिपद्येते इति फलोपकार्यङ्गे' इति। दूषयितुं तदुदितं श्रवणस्वरूपं अनुवदति **श्रुतेरिति**। **नेति**। येन मनननिदिध्यासनयोरनन्तरानुष्ठीयमानयोरपि, अदृष्टद्वारा स्थिरस्य यज्ञस्यानन्तरानु-ष्ठीयमानेष्ट्यादिवत्, स्वयमफलयोरपि फलवच्छ्रवणसन्निधेः तदङ्गत्वं संभाव्येतेति

भावः। तेन श्रवणस्य स्वोत्पत्त्यनन्तरमेव ब्रह्मावगमहेतुताङ्गीकारात्। 'प्रमाणस्य प्रमेयावगमं प्रत्यव्यवधानादि'ति तद्वचनात्। श्रवणेनैव फलस्य ब्रह्मावगमस्य सिद्धत्वेन मनननिदिध्यासनयोः श्रवणं प्रत्यङ्गत्वस्यैवानुपपत्तेः। दूरे श्रवणस्य तदङ्गित्वमिति भावः ॥ १७ ॥ १८ ॥

श्रवणानन्तरं दृष्टिर्यदि ज्ञानाङ्गतागता।
एकस्मिन्हि फले हेत्वोर्द्वयोरङ्गाङ्गिता मता ॥ १९ ॥

तदेव विकल्पपूर्वकं स्पष्टयति **श्रवणेति**। **अनन्तरं** अव्यवधानेनेति पूरणीयम्। **अङ्गता** मनननिदिध्यासनयोः श्रवणं प्रति अङ्गता। **गता** न संभवति। श्रवणेन जन्ये फले तयोर्हेतुत्वाभावादेव। अन्यथा अङ्गाङ्गिभावलक्षणव्याघात इत्याह **एकस्मिन्निति**। फलवत्सन्निधावफलं तदङ्गमिति अङ्गलक्षणात्। अफलमित्यस्य अङ्गिना जायमाने फले उपकारकत्वमन्तरा फलान्तररहितमित्यर्थः ॥ १९ ॥

न जाता चेद्यतस्सा स्यात्तदेव करणं भवेत्।
श्रवणं मननात्पूर्वं श्रुतं न ध्यानतः परम् ॥ २० ॥

मध्ये कल्पान्तरं कल्प्यं मननादौ न कश्चन।
तच्चैकवाक्ये पठनात्तयं क्रमिककारणम् ॥ २१ ॥

नेति अव्यवधानेन श्रवणं अखण्डार्थब्रह्मावगमं नोत्पादयति चेदित्यर्थः **तदेव** न तु श्रवणम्। तथा च श्रवणस्यैवाङ्गत्वमेव न। दूरेऽङ्गित्वमिति भावः। अथैतद्दोषपरिजिहीर्षया श्रवणस्य ध्यानानान्तर्यं कल्पयामीति चेच्छ्रौतक्रमव्याघात इत्याह **पूर्वमिति**। **श्रुतं** श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रुतौ। किञ्चास्मिन्पक्षेऽश्रुतकल्पनादोष इत्याह **मध्ये इति** निदिध्यासनसाक्षात्कारयोर्मध्ये इत्यर्थः। **कल्पान्तरं** अश्रुतमपि श्रवणान्तरम्। **कल्प्यं** तथा चाश्रुतकल्पनादोषः। **मननादौ** मननात्पूर्वं, **न कश्चन** श्रवणरूपकल्पो न। तथा च श्रुतहानिश्च। **क्रमिकेति** तदुक्तं 'अपरोक्षदृशिश्चैव श्रवणान्मननादनु। सम्यङ् निश्चिततत्त्वस्य निदिध्यासनया भवेदि'ति ॥ २० ॥ २१ ॥

यदि साक्षात्कारकार्या ज्ञाननाशे सहायता।
ज्ञानेङ्गिन्यङ्गतैव स्याच्छ्रवणेऽङ्गिनि नाङ्गता ॥ २२ ॥

ननु मास्तु ज्ञानरूपे फले मनननिदिध्यासनयोः श्रवणं प्रति सहायता। ज्ञानफलेऽज्ञाननिवृत्तौ तयोः श्रवणं प्रति सहायताऽत एव श्रवणाङ्गत्वमस्तु इति संभावितं पक्षं स्वयमुत्थाप्य निराह **यदीति** एवं सति फलेऽज्ञाननिवृत्तौ ज्ञानमेवाङ्गि श्रवणादीनां त्रयाणामपि ज्ञानाङ्गत्वमित्यायातम्। तथा च श्रवणमङ्गि मनननिदिध्यासने तदङ्गे इति त्वत्सिद्धान्तानवक्लृप्तिरेव स्यादित्याह **ज्ञान इति**। यद्यपि परेण 'ज्ञानं च तस्मिन्परात्मभावनिवृत्तिरेव' (बृ.शां.भा. ४-४-२०) इति भाषितं तथा तद्भाष्यभावः सिद्धान्तबिन्दुव्याख्यायां 'तज्ज्ञानं नैव जायते। किन्तु केवलं तदावरकाज्ञाननिरास एव जायते। तन्मूल एव तदानीं जायते इति व्यवहारः' इति स्पष्टीकृतः। एवं च श्रवणाज्ज्ञानं नैव ज्ञायते केवलं अज्ञाननिवृत्तिरेव भवति इति तन्मतं अवगम्यते; तथाऽपि संभावितत्वादयं पक्षः स्वयमाशङ्क्य दूषित इति ज्ञेयम्। अत्र विस्तरः ç[भेद. प. ब्र. सू. इति ग्रन्थे (पु. ८६)ç] ॥ २२ ॥

परोक्षज्ञानजनकं श्रवणं केन हेतुना।
अपरोक्षफलं कुर्यात्सा ह्यदृष्टस्य कल्पना ॥ २३ ॥

वस्तुतस्तु श्रवणस्य चरमसाक्षात्काराङ्गत्वमेव न संभवति। 'श्रवणाद्यङ्गकनिदिध्यासनमपरोक्षज्ञानकरणमनःसहकारि' इति न्यायामृतोक्तरीत्या मन एव करणम्। एतच्चाग्रे विवरिष्यते। श्रवणस्यापरोक्षज्ञानजनकत्वमेव न घटते इत्याह **परोक्षेति** ॥ २३ ॥

गेहे घट इति प्रोक्ते बहिस्स्थस्यापरोक्षधीः।
गेहान्तस्स्थघटेऽपि स्यात्सापि दृश्यार्थदृङ्न किम् ॥ २४ ॥

ननु शब्दस्य परोक्षधीहेतुत्वस्वाभाव्येऽपि यत्र अपरोक्षार्थविषयकत्वं तत्रापरोक्षज्ञानजनकत्वमित्यङ्गीक्रियते इति चेत्तथाऽप्यदृष्टकल्पनादोषस्यानिस्तार एवेति अतिप्रसङ्गमुखेनाह **गेह इति**। **बहिस्स्थस्येति** इन्द्रियसन्निकर्षाभावेऽपीति भावः। **दृश्यार्थः** अपरोक्षविषयः ॥ २४ ॥

साक्षात्कारस्य योग्योऽर्थो यदा साक्षात्प्रदृश्यते ।
तत्र प्रयुक्तशब्दोऽपि साक्षात्कारफलो यदि ॥ २५ ॥

नैष दोषः। एककाले तस्यैव पुरुषस्य अपरोक्षो यो विषयः तद्विषयकः शब्दोऽप्यपरोक्षज्ञानं जनयतीति नियम्यते। घटस्तु बहिस्स्थस्य न शब्दश्रवणकालेऽपरोक्षः। अतो नोक्तोऽतिप्रसङ्ग इत्याक्षिपति **साक्षात्कारेति** ॥ ॥ २५ ॥

तर्हि स्याद्ब्रह्मणस्साक्षात्कारः प्राक्कारणान्तरात् ।
तत्र प्रयुक्तशब्दस्तु व्यर्थस्स्यादिति मे मतिः ॥ २६ ॥

परिहरति **तर्हीति**। कारणान्तरेण शब्दान्येन मानससाक्षात्कारादिना ॥ ॥ २६ ॥

किञ्च फूत्का(फट्का)रलिङ्गेन दृश्यमानेऽपि हस्तिनि ।
जायमानानुमापि स्यात्साक्षात्कारात्मिका तव ॥ २७ ॥

अतिप्रसङ्गान्तरमाह **किञ्चेति**। लिङ्गेन जायमाना इति योजना। **दृश्यमानेति**। एकस्मिन्नेव कालेऽपरोक्षविषयेत्यर्थः। **अनुमाऽपीति** परोक्षज्ञानजननस्वभावाऽपि। अपिशब्देन अयं गज इति शब्दस्यापि संग्रहः। इदं चोपलक्षणम्। "जीवाः परमात्मनो न भिद्यन्ते आत्मत्वादितिलिङ्गजन्यायाः श्रवणात्प्रागापाततो वेदान्तजन्यायाः, भाषाप्रबन्धजन्याया अनधीतवेदान्तजन्यायाश्चैक्यप्रतीतेरापरोक्ष्यापातेन श्रवणनियमादेरयोगात्" इति न्यायामृतोक्तान्यतिप्रसङ्गान्तराणि ग्राह्याणि। ब्रह्मणस्तदभिन्नैक्यस्य च स्वप्रकाशत्वेनापरोक्षत्वादिति भावः ॥ २७ ॥

एकगोष्ठप्रविष्टाः किं महिषीधेनुपूर्वकाः ।
एकाकारफलं दद्युरिदं चादृष्टकल्पनम् ॥ २८ ॥

करणशक्तिमतिलंघ्य ज्ञानस्य विषयानुसारित्वे अतिप्रसङ्गान्तराण्याह **एकगोष्ठेति** एकस्मिन्नेव विषये सन्निवेशमात्रेण स्वभावातिक्रमणे, एकत्र गोष्ठे समाविष्टानां गोमहिषीपूर्वकाणामपि परस्परकार्यजनकत्वं स्यादित्यर्थः।

'चाक्षुषादिविषयकस्मृत्यनुमितिस्पार्शनज्ञानादेश्चाक्षुषत्वाद्यापातात्। लिङ्गशब्दादिसिद्धे चेन्द्रियात्परोक्षधीप्रसङ्गात्। एवञ्च 'परोक्षे चैपरोक्षे च चाक्षुषी स्पार्शिनीव च। अपरोक्षे परोक्षा धीर्युक्ता करणशक्तितः'। तस्माद्ये विरुद्धे ज्ञानत्वावान्तरजाती परोक्षत्वापरोक्षत्वे तदाश्रययोर्ज्ञानयोर्भिन्नत्वात् यश्चैको विषयस्तत्र विरुद्धजात्यभावात्प्रत्यक्षविषयमपि शाब्दज्ञानं परोक्षमेव' इति न्यायामृतोक्तमत्रोक्तस्योपपादनमत्रानुसन्धेयम्। विस्तरस्तत्रैव शब्दप्रत्यक्षभङ्गे ॥ २८ ॥

दशमस्त्वमसीत्युक्तिरपि शाब्द्या धिया स्वया ।
चित्तव्याक्षेपहन्त्र्येव दशमोऽहमिति प्रमा ॥ २९ ॥

तत्रापि मानसी नो चेदहं त्वोल्लेखिनी कथम् ।
दशमस्त्वमसीत्यत्र ह्यहंशब्दो न विद्यते ॥ ३० ॥

यच्चोक्तं परेण तत्त्वमसीति वाक्यादेवापरोक्षधीः दशमस्त्वमसीत्यादौ शब्दादेवापरोक्षधीदर्शनादिति तत्र दृष्टान्तं दूषयति **दशम इत्यादिभिः**। शाब्द्या परोक्षया। **चित्तेति** अन्यत्र व्यासक्तं तच्चित्तं स्वस्वरूपाभिमुखं विदधतीऽत्यर्थः। प्रमा मानसीति योजना। वृत्तिज्ञानसहकारेणैव शब्दानां अर्थबोधकत्वस्य क्लृप्तत्वात्। अङ्गीकृतश्चायं न्यायः परेणापि 'न ह्यक्षरबाह्यो वाक्यार्थः' इति वचनात् ॥ २९ ॥ ३० ॥

त्वंतामेव ज्ञापयेत्सा नाहंतां ज्ञापयेद्धि वाक् ।
शब्दो वदेत्स्वशक्यार्थमशक्यार्थं कथं वदेत् ॥ ३१ ॥

वाक्यार्थं वृत्तिमहिम्ना लब्धार्थम् ॥ ३१ ॥

घटत्वाकारधीरेव घटशब्देन जायते ।
द्रव्यत्वाकारधीर्द्रव्यपदादुभयवत्यपि ।
दशमोऽहं त्विति तु या मतिस्सा मानसी ध्रुवम् ॥ ३२ ॥

ननु तत्र दशमे अहंत्वमप्यस्तीति चेत्किं तावता। तद्बोधकपदाभावात्। अन्यथा वृत्त्यविषयत्वेऽपि तत्र विद्यमानत्वमात्रेण शाब्दत्वे घटशब्देन द्रव्यत्वाकारधीरपि स्यात् ॥ ३२ ॥

अव्युत्पन्नस्य तद्वाक्यश्रवणेऽपि मतिर्न सा।
व्युत्पत्तिशब्दजन्यार्थज्ञाने क्लृप्तं हि कारणम् ॥ ३३ ॥

अतः शाब्दप्रबोधोऽस्ति मध्ये व्यासङ्गभञ्जकः।
समाहितमनास्तु स्वं दशमं मनसेक्षते ॥ ३४ ॥

क्लृप्तमिति। तदुक्तं सुधायां 'शक्तिज्ञानानुरोधित्वादभिधानस्य' इति ॥ ॥ ३३ ॥ ३४ ॥

कारुः स्वकण्ठपरशुं विस्मृत्य बहु चिन्तयन्।
अयं परशुरित्युक्ते किं शब्दादेव पश्यति ॥ ३५ ॥

उक्तिः परोक्षज्ञानेन चित्तव्याक्षेपनाशिनी।
पश्चात्स्वकण्ठपरशुं चक्षुषैव स पश्यति ॥ ३६ ॥

व्यासङ्गभञ्जकत्वमात्रं न तु करणानां स्वस्वभावातिक्रम इत्येतद् दृष्टान्तेन दर्शयति कारुरिति ॥ ३५ ॥ ३६ ॥

स्वतस्समाहितमना दशमोऽहमिति स्वयम्।
मनसैवाभिपश्येच्चेद्ब्रह्म पश्येत्तथैव हि ॥ ३७ ॥

शब्दस्तु व्यवधानस्योच्छित्त्यै कर्णे निपातितः।
शाब्दीं करणसामर्थ्यात्त्वमाकारां धियं दिशेत् ॥ ३८ ॥

समाहितमनाः चित्तव्यासङ्गरहितः। तथैव हि मनसैवानुद्रष्टव्यं इति श्रुतिप्रसिद्धेः। 'यत्र चैवात्मनाऽऽत्मानं पश्यन्' इति स्मृतेश्च ॥ ३७ ॥ ३८ ॥

ततस्समाहितमनाः पश्येदहमिति स्वयम्।
अहंत्वोल्लेखिनी शब्दाभावे धीर्मनसैव हि ॥ ३९ ॥

अहं त्वोल्लेखिनी धीः इति योजना। शब्दाभावे अहमितिशब्दाभावे ॥ ॥ ३९ ॥

प्रतिबन्धनिरासे हि निमित्तान्तरतः कृते।
दहनादेव दाह्यस्य दाहः स्यान्नान्यतः क्वचित् ॥ ४० ॥

प्रतिबन्धनिरासेन तस्य स्याच्चरितार्थता।
सहकारी भवेद्वासौ स एव न हि दाहकः ॥ ४१ ॥

भवेद्वेति उपचारेणेति भावः। असौ प्रतिबन्धनिरासोपक्षीणः। तदुक्तं सुधायां 'तथाऽपि प्रतिबन्धनिवृत्तौ सत्यामेव निर्णय इति प्रतिबन्धकनिरासहेतोरपि विचारस्योपचारेण निर्णयहेतुत्वात्' इति। अत एव वा इत्यनास्थासूचकः ॥ ४० ॥ ॥ ४१ ॥

अहंशब्दाप्रयोगेऽपि ह्यहमाकारधीत्वतः।
दशमोऽहमिति ज्ञानं न शाब्दं स्वस्थधीर्यथा।
पराकरोति ते पक्षमनुमानमपीदृशम् ॥ ४२ ॥

ज्ञानं अस्वस्थस्य जायमानं विमतम्। अहं दशम इति वाक्यजन्यज्ञाने व्यभिचारवारणाय हेतौ विशेषणम्। विपक्षे यदि शाब्दं स्यात् तर्हि शब्दप्रयोग एव जन्यं स्यात्। अन्यथाऽकारणकार्योत्पत्तिप्रसङ्ग इति बाधकसद्भावान्नाप्रयोजकता। अत एव न दृश्यमानविषयकत्वाभाव उपाधिः ॥ ४२ ॥

दृष्टियोग्ये प्रयुक्तोऽपि शब्दो यद्यपरोक्षकृत्।
गृहे घटोऽस्तीत्युक्तेऽपि तर्हि स्यादपरोक्षधीः ॥ ४३ ॥

दृष्टियोग्य इति। तथा च ब्रह्मणो दृश्यमानत्वाभावेऽपि चरमसाक्षात्कारयोग्यत्वात् तस्य शब्दादापरोक्ष्यं संभवतीत्याशयः। स्यात् बहिःस्थस्येति शेषः। गेहस्थघटस्य दर्शनयोग्यत्वात् ॥ ४३ ॥

दृश्यमाने प्रयुक्तस्तु शब्दो यद्यपरोक्षकृत्।
असमाहितचित्तस्य कथं तर्ह्यपरोक्षधीः ॥ ४४ ॥

न ह्यसौ विस्मृतस्वात्मा पुरा शब्दप्रयोगतः।
आत्मानं मनसा पश्येद्व्याक्षेपाक्षिप्तचेतनः ॥ ४५ ॥

दोषान्तरं वक्तुं पूर्वं निरस्तमपि पुनराशङ्कते **दृश्यमान इति**। तथा च दशमस्त्वमसीति वाक्यजन्यज्ञाने दृष्टान्तीकृते साधनवैकल्यम्। न केवलं प्रागुक्तपक्षेऽसिद्धिः। उपपादयति **कथमिति**। व्यासक्तस्य आत्मनि दृश्यमानत्वाभावात्। **पुरेति** अनन्तरं व्यासङ्गपरिहारेण दर्शनसंभवादिति भावः ॥ ४४ ॥ ४५ ॥

दृश्यमानेऽपि शब्देन साक्षात्कारान्तरप्रमा।
अनानुभविकत्वेन वैयर्थ्याच्च न शोभते।
सैव चेत्तर्हि शब्दोत्था साक्षात्कारप्रमा क्व ते ॥ ४६ ॥

दृश्यमाने इति विषयसप्तमी। शब्देनेत्यनेन अन्वयः। **साक्षात्कारान्तरेति**। पुरुषान्तरस्य अथवा स्वस्यैव कालान्तरे जाततद्विषयकसाक्षात्कारेत्यर्थः। **अनानुभविकत्वेनेति**। "केषाञ्चिदपरोक्षे स्वर्गादावस्माकं शब्दादपरोक्षधीः स्यात् एकपुरुषाभिप्राये पूर्वेद्युश्चैत्रस्यापरोक्षे इदानीं शब्दादपरोक्षधीः स्यादि'ति न्यायामृतोक्तोऽनुभवविरोधो ध्येयः॥ **वैयर्थ्याच्चेति** व्यवहारे भट्टनयमङ्गीकुर्वाणस्य तव तत्त्वमसिवाक्यस्याधिगतार्थगन्तृत्वप्राप्त्याऽप्रामाण्यप्रसङ्गादित्यर्थः। **सैवेति**। अन्योन्याश्रयप्रसङ्गेन साक्षात्कारप्रमाजननासंभवात्। शब्देन अपरोक्षज्ञानजननेऽर्थस्य दृश्यमानत्वसिद्धिः। दृश्यमानत्वसिद्धौ हेतुसिद्ध्या अपरोक्षप्रमारूपसाध्यसिद्धिरिति ॥ ४६ ॥

करणस्य बलाच्चेद्धीस्तर्हि शाब्द्येव सा भवेत्।
दृष्टेऽर्थे तर्करसिकस्यानुमानाद्यथाऽनुमा ॥ ४७ ॥

करणस्य शब्दस्य बलात् स्वभावात्। प्रमाणसंप्लवमात्रेण न करणानां स्वस्वभावातिक्रम इत्याह **दृष्ट इति** ॥ ४७ ॥

तस्माद्दर्शनमुद्दिश्य तादर्थ्येनास्य कीर्तनात्।
करणत्वं श्रुतिबलाद्वाच्यं नान्याऽस्ति ते गतिः ॥ ४८ ॥

श्रुतिस्तु श्रवणं वक्ति मननं ध्यानमन्ततः।
पारंपर्यात्तु तत्राद्ये हेतुर्ध्यानं तु मुख्यतः ॥ ४९ ॥

कीर्तनात् 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति श्रुतौ। **आद्ये** श्रवणमनने हेतू इति वचनव्यत्ययेनान्वयः। **मुख्यतः इति**। श्रवणाद्यङ्गकनिदिध्यासनं साक्षात्कारजनकमनसः अव्यवधानेन सहकारीत्यर्थः। तदुक्तं न्यायामृते "तस्माच्छ्रवणसामर्थ्यरूपलिङ्गेन ततस्तु पश्यते निष्कलं ध्यायमान इत्यादिवाक्येन निदिध्यासनस्य फलसंबन्धात् प्रकरणेन च श्रवणादिकं निदिध्यासने सन्निपात्यङ्गम्। युक्तश्च विप्रकृष्टस्य फलोपकारात् सन्निकृष्टस्य फलोपकारः" इति [३-९ पु.६२०] ॥ ४८ ॥ ४९ ॥

न चेत्कर्मैव हेतुस्स्यादङ्गं स्याच्छ्रवणाद्यपि।
कर्मणा ज्ञानमित्याह यतः श्रुतिरचञ्चला ॥ ५० ॥

न चेत् सामर्थ्यरूपलिङ्गमनादृत्य द्रष्टव्यः श्रोतव्य इति सन्निधानमात्रेण अङ्गित्वाङ्गीकारे। **कर्मैव** 'कर्मणा ज्ञानमातनो'ति इति श्रुतौ ज्ञानरूपसाक्षात्कारसन्निधानात्। **हेतुः** अङ्गि। **श्रवणाद्यपि** त्रितयमपि। **अङ्गं** कर्मणः। **अचञ्चला** द्वारान्तराऽनभिधायिनी ॥ ५० ॥

तस्मात्क्रमिकवेदोक्तकारणेषु यदुत्तरम्।
ज्ञानादव्यवधानेन पूर्वं च तत एव तत् ॥ ५१ ॥

तत एव ध्यानादेव। तत् दर्शनम् ॥ ५१ ॥

यदि श्रवणमात्रेऽपि सर्वेषां ब्रह्मदर्शनम्।
जीवन्मुक्ताः कुतस्तर्हि शुकाद्या एव योगिनः ॥ ५२ ॥

श्रवणमात्रेऽपि इति। 'तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः। अविद्या सह कार्येण नासीदस्ति भविष्यति' इति त्वत्प्रक्रियाऽनुसारेणेति भावः॥ **एवेति** इतरेषां अनुष्ठितश्रवणमात्राणां मन्दानां व्यवच्छेदासंभवादिति भावः। जीवन्मुक्ता इति परपक्षे तन्मद्भावमुपेत्योक्तम्। वस्तुतो मुक्ता एव कुतो न स्युरित्याशयः। तदुक्तं

सुधायां 'ज्ञाने सति किमपि मुक्तिर्नैवापेक्षते इति सद्य एव साक्षात्कृतब्रह्मणां शरीरादिनिवृत्तिः प्रसज्येत' इति ॥ ५२ ॥

अनानुभाविकं चेदं श्रुतिकालेऽपि दर्शनम् ।
अश्नतः शृण्वतश्चान्नं किं नास्ति महदन्तरम् ॥ ५३ ॥

श्रुतिकाले श्रवणानन्तरमेव । **अन्तरं** व्यवधानम् । 'त्वं अन्नवानसि' इति श्रवणमात्रेणान्नसाक्षात्कारापत्त्या सद्य एव रसनेन्द्रियेण रससाक्षात्कारजन्या तृप्तिः स्यात् । तच्चानानुभविकं इति हृदयम् ॥ ५३ ॥

तच्छब्दान्नापरोक्षं स्यान्नतरान्निर्विकल्पकम् ।
यतस्त्वदुक्तवाक्येऽपि दशमत्वविशिष्टधीः ॥ ५४ ॥

न तरामिति 'इदमित्थमि'ति ज्ञानमात्रस्य संसृष्टार्थविषयकत्वनियमेन निर्विकल्पकज्ञानस्यैवालीकतया सप्तमरसत्वेन ज्ञानविशेषस्य शाब्दस्य निर्विकल्पकत्वस्य अष्टमरसत्वादिति भावः ॥ ५४ ॥

अन्विातार्थाभिधायित्वादन्योन्यान्वयमिश्रितम् ।
स्वार्थं मुख्यममुख्यं वा पदं वक्तीति ते मतम् ।
तच्छब्दान्निर्विकल्पा धीरिति रिक्तं वचस्तव ॥ ५५ ॥

रिक्तं वाक्यलक्षणव्याघातकारणम् । वाक्यं हि आकांक्षासन्निधियोग्यतावतां पदानां समूहः । आकांक्षाद्याः प्रत्येकमन्वयघटितमूर्तय इति भावः ॥ ५५ ॥

यौगपद्येन तद्योग्यगुणानुस्मरणं हरेः ।
अच्छिन्नतैलधारावदारात्तं दर्शयेद्धृदि ॥ ५६ ॥

अच्छिन्नेति 'खण्डस्मृतिर्धारणा स्यादखण्डं ध्यानमुच्यते' इति तल्लक्षणोक्तेः । **आरात्** । 'स्वयोग्यगुणोपेतस्य निर्दोषस्य भगवद्विग्रहविशेषस्यादरनैरन्तर्याभ्यां विषयवैराग्यतद्भक्तिसहितात् बहुकालोपचितान्निदिध्यासनापरनामकाद्विचिन्तनादि'ति सुधोक्तरीत्याऽर्थो ज्ञेयः ॥ ५६ ॥

ध्यानं च मनसा तस्माद्ध्यातृचित्तं हरीच्छया ।
तद्गं तमेवेन्द्रियत्वात्पश्यतीत्यतिमङ्गलम् ॥ ५७ ॥

मनसेति । 'श्रवणदर्शनादिजनितमानसवासनामयस्य वस्तुनो मनसाऽवलोकनं ध्यानं' इति सुधोक्तेः । **हरीच्छयेति** । अव्यक्तस्वभावस्य प्रत्यक्षत्वानुपपत्तेः । 'नित्याव्यक्तोऽपि भगवानीक्ष्यते निजशक्तितः' इति अव्यक्ताधिकरणभाष्योदाहृतप्रमाणात् । 'उपासना त्वापरोक्ष्यं गमयेत्तत्प्रसादतः' इति च । **तद्गं** ध्येयप्रतिमान्तर्गतम् । तदुक्तं प्रतिषेधाधिकरणभाष्ये 'तदुपासनं च भवति प्रतिमोपासनं यथे'ति । **पश्यति** साक्षात्करोति । इन्द्रियत्वेनेन्द्रियजन्यं प्रत्यक्षं इति लक्षणात् । **तमेव** "पश्यन्ति परमं ब्रह्म चित्ते यत्प्रतिबिम्बितम्" । इति तत्रैवोक्तेः । **इतीति** । श्रवणादेव ज्ञानम् । तच्च प्रसादनैरपेक्ष्येणैव मोचकं इत्यादि परपरिकल्पितप्रक्रियापराकरणेन हेतुना । **अशेषं** 'अज्ञानां ज्ञानदो विष्णुर्ज्ञानिनां मोक्षदश्च सः', 'यथा दृष्ट्या प्रसन्नः सन् राजा बन्धापनोदकृत् । एवं दृष्टः स भगवान् कुर्याद् बन्धविभेदनम्' इत्यादिप्रमेयजातं **अतिमङ्गलं** निराबाधं सुस्थिरमभूदिति भावः ॥ ५७ ॥

यदंघ्र्यभिध्यानसमाधिधौतसुधियात्मनः ।
अनुपश्यन्ति तत्तत्त्वमित्याह भगवान् शुकः ॥ ५८ ॥

उक्तं सर्वमपि प्रमेयं पिण्डीकृत्य प्रतिपादयद्भागवतवचनमुदाहरति **यदिति** 'यदंघ्र्यभिध्यानसमाधिधौतया धियाऽनुपश्यन्ति हि तत्त्वमात्मनः । वदन्ति चैतत्कवयो यथा तथं स मे मुकुन्दो भगवान्प्रसीदताम् ।' इति श्लोकः ॥ ५८ ॥

ध्यानमेव प्रधानाङ्गं तेन चाज्ञानधीमलम् ।
क्षाल्यते धौतधीरेव दर्शने कारणं किल ॥ ५९ ॥

धीशब्दोक्तं मनस्साक्षात्कारस्य करणं किल ।
अङ्गाङ्गं श्रवणं दृष्टिकारणं नतरां किल ॥ ६० ॥

प्रकृतोपयोगं दर्शयन् व्याख्याति **ध्यानमिति**। एवकारेण श्रवणस्याङ्गित्व-प्रधानाङ्गत्वयोर्निरासः। **क्षाल्यते** स्वरूपावरकमज्ञानं ध्यानरूपपरोक्षज्ञानेन शिथिलीक्रियते। तथैव गीताभाष्योक्तेः। **धीः दर्शने कारणम्**। उत्तरश्लोके व्याख्यानं मनःसाक्षात्कारस्य करणम्। **अङ्गाङ्गं** अङ्गस्य निदिध्यासनाङ्गस्य मननस्याङ्गम्। कारणं अङ्गि करणम् ॥ ५९ ॥ ६० ॥

एवं चार्थद्वयं सिद्धं यदस्माभिरुदीरितम्।
परोदीरितमार्गौ यौ कुमार्गौ तौ बहिर्गतौ ॥ ६१ ॥

अर्थद्वयं मनसः करणत्वम्। श्रवणस्य अङ्गाङ्गत्वम्। **कुमार्गौ** गोविन्दप्रसादापलापकत्वेन कुपथौ। 'कुपथं तं विजानीयाद्गोविन्दरहितागमं' इति स्मृतेः ॥ ६१ ॥

परोक्षज्ञानकरणं साक्षात्काराय को वदेत्।
को वा श्रवणमात्रेण तं पश्यति महाप्रभुम्।
अज्ञैश्च शब्दमात्रेण दृष्टश्चेत्कलहः कुतः ॥ ६२ ॥

कुत इति श्रवणजनितदर्शनेन सद्यः शरीरपातापातात् ॥ ६२ ॥

तैलधारावदच्छिन्नगुणसन्धानरूपया।
मनोधारणया योगी पश्येच्चेदुचितं हि तत् ॥ ६३ ॥

गुणसन्धानं योग्यगुणोपसंहारः। **धारणया** ध्यानेन। **योगी** परमात्मनः प्रसादेनेति पूरणीयम्। **उचितम्**। उक्तप्रमाणानुगुणम् ॥ ६३ ॥

दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्।
इति गीतासु हरिणा निरणायि मतं मम ॥ ६४ ॥

अविद्यां किल विद्राव्य दिव्यं चक्षुर्दृशे दिशेत्।
साक्षाद्धीकरणादेव साक्षाद्धीस्संस्कृतादपि।
नान्यस्माद्यद्ददौ दिव्यं चक्षुरेव निरीक्षितुम् ॥ ६५ ॥

दिव्यमिति 'न तु मां शक्यसे द्रष्टुं अनेनैव स्वचक्षुषा' इति पूर्वार्धम्। **चक्षुः** दर्शनशक्तिम्। साक्षाद्धीकरणादित्येकं पदम्। साक्षात्कारकरणात्। एवपदेन विजातीयकरणशब्दस्य व्यवच्छेदः ॥ ६४ ॥ ६५ ॥

चष्टेऽनेनेति तच्चक्षुर्मनो वा बाह्यमेव वा।
चक्षुस्सहायेन मनो यतः पश्यति तं बहिः ॥ ६६ ॥

यौगिकचक्षुःशब्देन मनसोऽपि संग्रहमाह **चष्ट** इति। **सहायेनेति**। 'मनसस्तु बाह्येन्द्रियसन्निधानेन एते सर्वेऽपि विषया' इति पद्धत्युक्तेः ॥ ६६ ॥

किञ्च दक्षशिरश्छिन्दन्न च्छेदे कारणं पुरा।
अपश्यत्किल तद्दृष्ट्यै दध्यौ पशुपतिश्शिरम् ॥ ६७ ॥

अतीन्द्रियार्थसाक्षात्कारे ध्यानस्यैवाङ्गत्वं भागवताख्यानेन अन्वयव्यतिरेकप्रदर्शनपूर्वकं निदर्शयति **किञ्चेति**। **पुरा** ध्यानात्पूर्वम्। **कारणं** विशेषनिमित्तम्। तदुक्तं गीताभाष्ये 'स्वतः प्रायोनिमित्तैश्चाविनाशिनोऽपि केनचिन्निमित्तविशेषेण स्यात् ककच्छेदवदि'ति। तत्र प्रमेयदीपिकायां 'यथा दक्षस्य प्रजापतेश्शिरच्छेदो न स्वतो नापि वीरभद्रायुधेन निमित्तेन किन्तु यज्ञपशुभावनाऽऽख्येन निमित्तविशेषेण तथेत्यर्थः' इति। तथा चातीन्द्रियार्थविषयकयोगिप्रत्यक्षे समाधिपरिपाकलक्षणयोग एव निमित्तम्। "समाधिपरिपाकवन्तो योगिनः" इति तत्त्वनिर्णयटीकोक्तेः ॥ ६७ ॥

इति भागवते ध्यानात्पूर्वं दृष्टेरभावतः।
तदभावे भावरूपं व्यतिरेकमदर्शयत् ॥ ६८ ॥

अनेन ध्यानाभावे अतीन्द्रियार्थदर्शनाभावः इति व्यतिरेकव्याप्तिः सिद्धेत्याह **तदिति** ॥ ६८ ॥

दृष्ट्वा संज्ञपने योगमिति ध्यानोत्तरक्षणे।
दृष्टिं ब्रवीति यत्तेन तत्सत्त्वे सत्त्वरूपिणम्।
अन्वमंस्तान्वयन्ध्यानाददृश्यार्थस्य दर्शने ॥ ६९ ॥

"दृष्ट्वा संज्ञपने योगं पशूनां स पतिर्मखे। यजमानपशोस्तस्य कायात्तेनाहरच्छिरः" । इत्युत्तरश्लोकपर्यालोचनयाऽन्वयोऽपि सिद्ध इत्याह **दृष्ट्वा इति। अदृश्यार्थे** अतीन्द्रियस्य संहारे निमित्तविशेषस्यार्थे ॥ ६९ ॥

रौद्री विद्याऽनवद्येत्थं ध्यानस्य दृशि हेतुताम्।
अन्वयव्यतिरेकाभ्यां निर्णिनायेति मे मतिः ॥ ७० ॥

रौद्री दर्शनार्थं रुद्रेणानुष्ठिता। विद्या ध्यानम् ॥ ७० ॥

रुद्रोऽप्यद्रावयद्यस्याः क्षुद्रोपद्रवहृद्रुजम्।
हृद्या मध्वस्य शुद्धा सा विद्या विद्योतते तराम्॥ ७१ ॥

क्षुद्रेति शब्दः परोक्षज्ञानस्यैव करणं न प्रत्यक्षस्य इति सार्वजनीनानुभवस्यापलापपरत्वात्। 'यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण' इत्यादि श्रुतिभिः 'मत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतं' इत्यादिस्मृतिभिश्च सुस्पष्टतया सिद्धस्य भगवत्प्रसादरूपमहिम्नोऽवधीरणादिति भावः। **हृद्रुजं** तात्पर्यविषयीभूतार्थविरोधिनीं परप्रक्रियाम्। **अद्रावयत्** स्वयं माध्वसिद्धान्तानुरोधानुष्ठानेन पराचष्ट ॥ ७१ ॥

इदं त्रयं प्रधानाङ्गं मनः करणमुच्यते।
प्रतिबन्धे न तत्पश्येत्तदपाये तु पश्यति ॥ ७२ ॥

प्रतिबन्ध इति। दर्शनप्रतिबन्धकान्युक्तानि गीतायाम्। 'लभते ब्रह्मनिर्वाणं ऋषयः क्षीणकल्मषाः। छिन्नद्वैधा यतात्मानः' इति। तदर्थो भाष्ये 'क्षीणपापा महाज्ञाना जायन्ते गतसंशयाः।' क्षीणकल्मषत्वं पापक्षयः। महाज्ञानाः श्रवणादिना विदितवेद्याः। **द्वैधः** संशयो विपर्ययो वा क्षीणकल्मषत्वयतात्मत्वछिन्नद्वैधत्वानां हेतुहेतुमद्भावः। इति प्रमेयदीपिकाऽनुसारेण तात्पर्यं बोध्यम् ॥ ७२ ॥

प्रतिबन्धनिवृत्त्यर्थं श्रवणाद्यापि मृग्यते।
अतश्श्रुतिश्श्रवणतो मुक्तिरित्यपि सा जगौ।
एवं च मनसैवेति श्रौतावधृतिरप्यभूत् ॥ ७३ ॥

श्रवणादीति आदिपदेन पुण्यकर्मादिकं ग्राह्यम्। पापक्षयहेतुत्वात् पुण्यकर्मणाम्। 'येषा त्वन्तगतं पापं जनानां पुण्यकर्मणां' इति गीतोक्तेः। 'श्रुत्वा मत्वा तथा ध्यात्वा तदज्ञानविपर्ययौ। संशयं च पराणुद्य लभते ब्रह्मदर्शनम्' इति च प्रमाणम्। **श्रुतिः** 'श्रुत्वैव मोक्षमाप्नोति' इति श्रुतिः। एवकारोऽयोगव्यवच्छेदपरः। श्रुतिमतिनियतध्यानजज्ञानयोगेनैवेति अन्ययोगव्यवच्छेदपरो वा। परंपरया कारणेऽपि कारणत्वव्यवहारः स्वर्गकामो यजेतेति श्रुतौ घृतेन पुष्टिर्जायत इति लोके च सिद्धः। ज्ञानप्रतिबन्धकपापक्षयाख्यमसाधारणकारणं कार्यस्य लक्षणं भवत्येवेति प्रमेयदीपिकोक्त्या प्रतिबन्धकनिवृत्तेरपि कारणत्वव्यवहारो बोध्यः ॥ ७३ ॥

हर्यनुग्रह एवैभ्यस्सर्वेभ्यो बलवत्तरः।
व्यर्थीकृत्य प्रवचनं सुमेधां च बहुश्रुतम्।
यमेवैष इति श्रुत्या प्रसादस्यैव कीर्तनात् ॥ ७४ ॥

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां' इति वाक्यं फलसौरभसारविषयतया व्याख्याति। **हरीति।** श्रवणादेर्ज्ञानं फलं ज्ञानस्य मोक्षः फलमिति फलद्वयमपि मुख्यतः भगवत्प्रसादेनैव। तदुक्तं सुधायाम्। 'न चाव्यक्तस्वभावो भगवान्सहस्रेणापि प्रयत्नानां शक्यः साक्षात्कर्तुं विना तदनुग्रहात्। प्रसन्नस्तु अनन्ताचिन्त्यशक्तियोगात् आत्मानं दर्शयतीति युज्यते' इति। अनुव्याख्याने च 'अज्ञानां ज्ञानदो विष्णुरि'ति। एवं 'तेन लभ्य' इति श्रौतभागेन ज्ञानस्य भगवत्प्राप्तिरूपमोक्षसाधनत्वमपि भगवत्प्रसादाधीनमिति ज्ञायते। 'यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण' इति श्रुतेः। तदुक्तं सुधायां 'येन ज्ञानस्य मोक्षहेतुत्वमङ्गीकृतं न तेनापि ईश्वरेच्छा त्यक्तुं शक्यते। कारकप्रेरकत्वादिनाऽवश्याभ्युपगमनीयत्वात्' इति। अनुव्याख्याने च 'ज्ञानिनां मोक्षदश्च स' इति। 'कीर्तनात्' इत्यनन्तरं ज्ञानं मोक्षं च प्रति हेतुत्वेन इत्यध्याहारः ॥ ॥ ७४ ॥

तनुशब्दबलात्सिद्धं साकारस्यैव दर्शनम्।
अतो निराकारवस्तु निर्विकल्पकदर्शनम् ॥ ७५ ॥

निरस्तं सा तनुश्चाभूत्स्वामित्युक्तेस्स्वरूपिणी ।
प्रागावृताया विवृतेरेवोक्तेर्नित्यसिद्धता ॥ ७६ ॥

श्रुतौ 'तनुं' इति पदलभ्यं प्रमेयविशेषमाह **तन्विति । साकारस्येति ।** साकार एव तनुशब्दप्रयोगात् । अनेन भगवतो निराकारत्वं चरमसाक्षात्कारस्य निर्विकल्पकत्वं च खण्डितम् । 'स्वां' इत्यनेन पूर्वं 'एष' इत्युक्तस्य परमात्मनः 'तस्य' इति कथितस्य जीवस्य च परामर्शः । स्वरूपभूतामित्यर्थः । विवृणोतीत्यनेन पूर्वं विद्यमानमेवाविर्भावयतीत्यर्थलाभात् उभयोः जीवपरयोः स्वरूपतनू नित्ये इति लभ्यते । परमात्मनस्तनोर्व्याप्तत्वं च लभ्यते । 'परो मात्रया तन्वा वृधान' इति श्रुतौ तनोरेव व्याप्तत्ववर्णनात् । एवं भागवते 'विश्वं यदेतत्स्वतनौ निशान्ते यथावकाशं पुरुषः परो भवान् । बिभर्ति' इति (१०-४-२२) देवकीस्तोत्रेण विश्वधारकत्वस्य कथनात् ॥ ७५ ॥ ७६ ॥

अतश्चिदानन्दरूपशिरःपाण्यादिमान्हरिः ।
मुक्ताश्च तादृशाकारा इति श्रौतमतस्थितिः ॥ ७७ ॥

अतः इति । 'किन्तु निर्दोषचैतन्यसुखां नित्यां स्वकां तनुम् । प्रकाशयति' इति तत्त्वनिर्णयोदाहृतब्रह्माण्डपुराणवचनमत्रानुसन्धेयम् । **मुक्ताश्चेति । चिदिति** 'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः । ज्ञानज्ञानः सुखसुखः स विष्णुः इति भाष्योदाहृतश्रुतेः । **तादृशाकाराः** 'अथ मुक्तस्य चिन्मात्र एव देहो भवति चिन्मात्राणि करणानि तैरीशानुगृहीतैर्भोगान्भुंक्ते' इति च अनुव्याख्यानोदाहृतश्रुतेः ॥ ७७ ॥

गोप्यः कामाद्भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
संबन्धाद्वृष्णयस्स्नेहाद्यूयं भक्त्या वयं प्रभो ।
इति भागवते प्रोक्तं कामद्वेषादिसाधनम् ॥ ७८ ॥

द्वारि द्वारि हरेर्लोके सदा सर्वत्र सेविषु ।
अनाद्यनन्तकालेष्वप्येवं कैङ्कर्यकर्मसु ॥ ७९ ॥

निबिडज्ञानवैराग्यभक्त्यादिगुणसंपदा ।
शापाद्युपाधिमूलोऽसावीषद्द्वेषो जयादिषु ॥ ८० ॥

अस्वाभाविकदोषत्वान्नैव मोक्षनिरोधकृत् ।
इत्येव मुक्तिदत्वेन कीर्त्यते नारदादिभिः ॥ ८१ ॥

'ज्ञानजात्तत्प्रसादादेव मुच्यते' इत्यत्र एवकारव्यावर्त्यं न केवलं प्रसादनिरपेक्षं ज्ञानं किन्तु कामभयद्वेषादिदोषजातमपि इति शास्त्रतात्पर्यं 'गोप्यः कामाद्भयात्कंसः' इति भागवतश्लोकतात्पर्यनिर्धारणेन समर्थयते 'श्रवणं मननं तस्माद्ध्यानं' (श्लो. ९३) इत्यन्तेन ग्रन्थेन । **गोप्य इति ।** साधनं इत्यस्य मुक्तिदत्वेन कीर्त्यते (श्लो. ८१) इत्यनेनान्वयः । साधनं इति भिन्नं पदम् । **मुक्तिदत्वेनेति** 'तमापुरनुचिन्तया' इति तत्रैव पूर्वत्रोक्तेरिति भावः । "चैद्यादयोऽसुरावेशाद्धरौ द्वेषयुता अपि । निजस्वभावया भक्त्या नीता हरिसरूपताम् । तथा हि करुणो विष्णुरन्यावेशाद् यदि द्विषन् । हीयते किं ममानेन नित्यानन्दस्वरूपिणः । —— । अनादिभक्तो यस्मान्मे मोचयिष्ये ततस्त्वहम् । इति मत्वा मोचयति चैद्यादीनपि केशवः" इति तात्पर्यं अनुरुध्य, भागवते उक्तस्य वैरादेर्मोक्षसाधनत्वस्य गतिं कथयति **द्वारीत्यादिभिः त्रिभिः ।** कैङ्कर्यकर्मसु इति बहुव्रीहिः । जयादिषु इत्यनेनान्वयः । गुणसंपदा इत्यस्य कैङ्कर्य कर्मसु इति पूर्वेणान्वयः । अस्वाभाविकेति विशेषणेन दोषत्वमुपेत्य तेषां वैरादीनां स्वाभाविकत्वमात्रनिषेधः । गोपीनां भक्तिमिश्रितोऽपि कामो दोष एव । अत एव एकादशस्कन्धतात्पर्ये 'गोपिकाद्या दिवं गत्वा हरिं ज्ञात्वा यथातथम् । परं पदं ययुः' इत्युक्तेरिति ध्येयम् । कालान्तरे कामनिमित्तककिञ्चिद्दोषपरिहारानन्तरमेव तेषां मुक्तिरिति ज्ञायते ॥ ७८ ॥ ७९ ॥ ८० ॥ ८१ ॥

भृत्यापराधसहनशीलत्वस्तुतये हरेः ।
केवलद्वेषतो मोक्ष इति नर्षेर्मनोगतम् ॥ ८२ ॥

भागवते संमुग्धोक्तेः प्रयोजनं अनुव्याख्याने विशदीकृतम् । 'स्मर्तव्यो भगवान्नित्यं इत्यर्थेनैव हि क्वचित् । द्वेषादिव गुणानाह पुराणे क्रुद्धवाक्यवत्' इत्यादिना ॥ ८२ ॥

कतमोऽपि न वेनस्य पञ्चानां पुरुषं प्रति ।
इत्युत्तरश्लोक एव वेने साधनपञ्चकम् ।
यन्नेत्याह ततो द्वेषो द्वेषमात्रं कथं भवेत् ॥ ८३ ॥

'वाक्यं श्रुतिविरोधेन स्वविरोधेन चाञ्जसा । बह्वागमविरोधाच्च न द्वेषान्मुक्तिवाचकम्' . इत्यनुव्याख्यानानुरोधेन उत्तरविरोधं भागवतश्लोकोक्तापातार्थस्याह । कतमोऽपीति । 'तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्' इत्युत्तरार्धम् । 'उपायो भक्तिरुद्दिष्टो द्वेषाद्या अनुपायकाः' इति तात्पर्ये । निवेशयेदिति स्वभावकथनं न विधिः । यथोक्तं तात्पर्ये 'वैरादीनामेकतमेनापि यो युञ्ज्यात् स नेक्षते इति स्वभावकथनं न विधिरि'ति । द्वेषमात्रमिति । मात्रशब्देन भक्तेर्व्यवच्छेदः । 'कामादिभिरपि यथावद्भक्त्या सह मनः आवेश्य द्वेषादिकृतं अघं यथाभूतया भक्त्या हित्वा' इति तात्पर्योक्तेः ॥ ८३ ॥

पूर्णो हि भगवद्द्वेषो वेने तेनैव कीर्तितः ।
कथं पुनर्निषेधो हि तस्यैव स्याद्विदो मुनेः ॥ ८४ ॥

मुनेः नारदस्य । कथमिति स्वव्याघातापत्तेरिति भावः ॥ ८४ ॥

भगवन्निन्दया वेनो द्विजैस्तमसि पातितः ।
इति निन्दाख्यविद्वेषस्तमोहेतुरुदीरितः ॥ ८५ ॥

इदानीं मोक्षदत्वं च कथं तस्यैव कीर्तयेत् ।
त्रिकालदर्शी स मुनिः किं तात्कालिकदृक्च न ॥ ८६ ॥

उदीरितः । 'तमो द्वेषेण संयांति भक्त्या मुक्तिं तथैव च' इति षाड्गुण्यवचनात् ॥ ८५ ॥ ८६ ॥

अतो ग्रान्थिकमुद्राज्ञो नैवं व्याख्यातुमर्हति ।
तदीषद्द्वेष एवासौ सुगुणस्तोममध्यगः ॥ ८७ ॥

एवं 'वाक्यं श्रुतिविरोधेन स्वविरोधेन चाञ्जसा । बह्वागमविरोधेन' इत्यनुव्याख्यानोक्तप्रकारेण ॥ ८७ ॥

हिरण्यकशिपुश्चापि भगवन्निन्दया तमः ।
विविक्षुरत्यगात्सूनोः प्रह्लादस्यानुभावतः ॥ ८८ ॥

यदनिन्दत्पितामह्यं त्वद्भक्ते मयि चाघवान् ।
तस्मात्पिता मे पूयेत दुरन्ताद्दुस्तरादधात् ॥ ८९ ॥

निन्दां भगवतश्शृण्वंस्तत्परस्य जनस्य वा ।
ततो नापैति यस्सोऽपि यात्यधस्सुकृताच्च्युतः॥ ९० ॥

इत्यादिवाक्यसन्दर्भैस्तमोहेतुर्यतस्स्फुटम् ।
निर्णीतो भगवद्द्वेषस्ततोऽप्युक्तोऽर्थ एव हि ॥ ९१ ॥

विरोधमेव दर्शयति हिरण्यकशिपुरित्यादिभिः ॥ ८८ ॥ ८९ ॥ ९० ॥ ॥ ९१ ॥

सूत्रकृच्चाह यद्विद्यैव तु निर्धारणादिति ।
नान्यः पन्था इति स्पष्टो वेदस्तौ को नु लङ्घयेत् ॥ ९२ ॥

विद्यैव श्रुतिमतिनियतध्यानजज्ञानमेव । द्वेषिणश्च मोक्षफलकविद्यायामधिकार एव नास्ति किन्तु भक्तिमत एवेति कुतो द्वेषादिना मुक्तिरिति भावः ॥ ९२ ॥

श्रवणं मननं तस्माद्ध्यानं साक्षात्कृतिर्हरेः ।
भक्तिः प्रसाद इत्येते मुक्तेस्सोपानपंक्तयः ॥ ९३ ॥

तदेव विशदयति श्रवणमिति । तदुक्तमनुव्याख्याने 'भक्त्या ज्ञानं ततो भक्तिस्ततो दृष्टिस्ततश्च सा । ततो मुक्तिस्ततो भक्तिः सैव स्यात्सुखरूपिणी' इति । एवं सुधायामपि 'अतो जिज्ञासा निदिध्यासनपरमेश्वरानुग्रहतद्दर्शनपरमभक्तिपरमानुग्रहद्वारा मोक्षसाधनत्वात् कर्तव्ये'ति । अत्र श्रवणात्पूर्वं अतःशब्दोक्तः कारकहेतुरीश्वरप्रसादः ईषच्छमादिसंपत्तिः मननानन्तरं वैराग्योपचयस्तेन

भक्तिदार्ढ्यम्। अनन्तरं ध्यानमित्यप्यनुसन्धेयम्। 'वैराग्यतो भक्तिदार्ढ्यं तेनोपासा यदा भवेदि'त्यनुव्याख्यानोक्तेः ॥ ९३ ॥

रुग्मवर्णं च कर्तारमीशं पुरुषरूपिणम्।
ब्रह्मतातं महात्मानं पद्मनाभं परात्परम् ॥ ९४ ॥

यदा पश्यति जीवोऽयं तदा कर्म द्विरूपकम्।
हित्वा निर्दुःखत्वपूर्वैः परं साम्यमुपैति सः ॥ ९५ ॥

इति श्रुतौ मोक्षहेतुज्ञानस्येत्थं विनिर्णयात्।
ज्ञानं सरूपसाकारसगुणेश्वरगोचरम्।
साध्यं मोक्षार्थिभिर्भक्तैर्नान्यच्छ्रुतिविरोधतः ॥ ९६ ॥

'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम्। तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति श्रुतिमर्थतः सङ्गृह्णाति **रुग्ममिति सरूपेति** रुक्मवर्णमित्युक्तं। **सगुणेति**। कर्तारं इत्यनेन 'कर्तृत्वात्सगुणं ब्रह्म पुरुषं' इत्युक्तेः उपादानगोचरापरोक्षज्ञानरूपसार्वज्ञादिगुणानां कर्मनिर्णयटीकोक्तरीत्या कर्तृत्वान्तर्भावेनैव सिद्धेः। **साकारेति**। 'पुरुषमि'त्यनेन 'तथाऽपि पुरुषाकारो भक्तानां त्वं प्रकाशसे' इति आकारस्य एवं ब्रह्मयोनिं इति पद्मनाभरूपाकारस्य च कथनात्। **ईश्वरेति** ईशमित्युक्तेः। **मोक्षार्थिभिः इति**। निरञ्जनः पुण्यपापे विधूय, परमं साम्यं, इति विशेषणत्रयेण मोक्षस्वरूपस्यैव निर्धारणात्। नान्यत् वैरादिकम्। **श्रुतिविरोधतः** महातात्पर्यविरोधात्। तदुक्तमनुव्याख्याने 'न हि द्वेषयुता दृशिः। पुरुषार्थाय भवति सर्वश्रुतिविरोधतः' इति 'महातात्पर्यरोधेन कथं वाक्यं प्रमाणतां याति' इति च ॥ ९४ ॥ ९५ ॥ ९६ ॥

यः स्वतः परतो वेषद्विरक्तो विष्णुभक्तिमान्।
सारासारविवेकज्ञो मुमुक्षुश्च स मुक्तये।
अध्यायद्वयरूपस्य शास्त्रस्य श्रवणं चरेत् ॥ ९७ ॥

'युक्तितो ज्ञातवेदार्थः निरस्य समयान्परान्' इत्यारभ्य 'यततोपासनायैव विशिष्टाचार्यसंपदा' इत्यन्तेनानुव्याख्यानोक्तं सौत्राथशब्दार्थं विवृणोति **यः स्वत** इत्यादिभिः। एतेन 'नित्यानित्यवस्तुविवेकादीनि न ब्रह्ममीमांसाधिकारि विशेषणानि तेषां तत्साध्यत्वेन अन्योन्याश्रयात्' इति रामानुजभाष्यं निरस्तम्। 'यत्त्वादौ श्रद्धया युक्तं पुनर्न्यायेन साधितं' इति न्यायेन इतिहासादिना श्रुतित आपाततो वा, हितैषिपित्रादिवाक्येन वा, श्रवणेन वा प्रागपि श्रद्धामात्रेण नित्यानित्यवस्तुविवेकसिद्धेः अन्योन्याश्रयानवकाशात्। विस्तरः चन्द्रिकायाम् ॥ ॥ ९७ ॥

विषयस्यैव शास्तृत्वान्मुख्यं शास्त्रमिदं किल।
तदङ्गं शास्त्रमितरत्फलसाधनबोधकम्।
प्रवर्तकस्य चर्चाऽत्र सा साक्षाद्विषयस्य यत् ॥ ९८ ॥

विषयस्य ब्रह्माख्यवस्तुनः। शास्तृत्वात् निर्णायकत्वात्। तदुक्तं अनुव्याख्याने 'समन्वयाविरोधाभ्यां सञ्जाते वस्तुनिर्णये' इति। इदं आद्याध्यायद्वयम्। **प्रवर्तकस्येति**। ब्रह्मस्वरूपनिर्धारणानन्तरमेव 'किं मया कार्यमित्येव स्याद्बुद्धिरधिकारिण' इत्युक्तरीत्या फलोद्देशेन उपासनारूपसाधने प्रवृत्तिजननादिति भावः। **अत्र** उत्तराध्यायद्वये। **सा** आद्याध्याययोः कृता चर्चा ॥ ॥ ९८ ॥

वैराग्यभक्तिपादौ च श्रुत्वाऽध्यायद्वयश्रुतेः।
सम्यक्सारासारवेदी भक्तिवैराग्यदार्ढ्यवान् ॥ ९९ ॥

सम्यक्सारासारवेदी। वैराग्यदार्ढ्यवान् इत्यस्य हेतुः। तच्च भक्तिदार्ढ्ये हेतुः। वैराग्यतो भक्तिदार्ढ्यं इत्युक्तेः ॥ ९९ ॥

सार्धाध्यायद्वयोक्तार्थसंपन्नोऽथ विमुक्तये।
तद्धेतुदृष्ट्यै च पुनश्शास्त्राभ्यासस्वरूपिणीम्।
मननाख्यां ध्यानरूपां जिज्ञासां चाचरेत्किल ॥ १०० ॥

ध्यानस्य परिपाके तु तं दृष्ट्वा मुच्यते किल ॥ १०१ ॥

अतः श्रवणवैराग्यभक्तिशास्त्रविचारणाः ।
ध्यानं च भगवद्दृष्टिस्तद्भक्तिस्तदनुग्रहः ॥ १०२ ॥

किलेत्येभिः सर्वत्रानुव्याख्याने प्रसिद्धिं द्योतयति । 'सोपासना च द्विविधा शास्त्राभ्यासस्वरूपिणी । ध्यानरूपा परा चैव' इति तत्रैवोक्तेः ॥ १०० ॥ १०१ ॥ ॥ १०२ ॥

इमानि साधनान्यन्ते फलाध्यायोदितं फलम् ।
इत्यादिसूत्रे सर्वोऽपि शास्त्रार्थः कथितः किल ॥ १०३ ॥

आदिसूत्रे प्रथमसूत्रे ॥ १०३ ॥

उत्क्रान्तिमार्गगम्याप्तिभोगरूपं फलं सताम् ।
फलाध्याये तु कथितं बुद्धिशुद्ध्यै विचार्यते ॥,१०४ ॥

'कर्मक्षयस्तथोत्क्रान्तिर्मार्गो भोगश्चतुष्टयम् । फलं मोक्ष इति प्रोक्तं क्रमात्पादेषु चोच्यते' इति अनुभाष्यं हृदि कृत्वाऽऽह **उत्क्रान्तिरिति** । कर्मक्षयोऽप्युपस्कर्तव्यः । उत्क्रान्तिरित्युपलक्षणं देवानां मोक्षोऽपि द्वितीयपादोक्तो ग्राह्यः । भाष्ये तथैवोक्तेः । मार्गो गम्यं भगवत्प्राप्तिश्च तृतीयपादे । भोगश्चतुर्थे इति विवेकः ॥ १०४ ॥

ज्ञानी ज्ञानोदये जाते ब्रह्मनाड्या विनिर्गतः ।
अर्चिराद्यध्वना प्राप्य ब्रह्मलोके चिरं वसेत् ।
जीवन्मुक्तिदशा सैव ज्ञानिनां कीर्त्यते बुधैः ॥ १०५ ॥

द्विपरार्धात्मकः कालः पर इत्येव कथ्यते ।
परस्यार्धं परार्धं यत्प्राहुः शब्दविचक्षणाः ॥ १०६ ॥

ब्रह्मणः शतवर्षात्मा कालस्तस्मात्पराभिधः ।
तदन्ते किल सर्वेषां प्राग्ज्ञातपरमात्मनाम् ।
तेनैव ब्रह्मणा साकं महामोक्षो भविष्यति ॥ १०७ ॥

'वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इति श्रुतिं प्रतिज्ञातार्थपरां विवृणोति **ज्ञानी इत्यादिभिः** । **ज्ञानी** देवेतरो मनुष्योत्तमादिः । 'उत्क्रान्तिमार्गौ देवानां न प्रायेण भविष्यतः' इति देवानामुत्क्रान्तिनिषेधात् । **ज्ञानोदये जाते** इति । 'स्वोदयात्फलदं ज्ञानमि'त्युक्तेर्जीवन्मुक्त्यवस्थायास्ततःप्रभृत्येवारंभात् । न तु ज्ञानोदयात्पूर्वमित्यत्र तात्पर्यम् । न तु अव्यवधानेनेति । 'विद्वानमृतमाप्नोति नात्र कार्या विचारणा । अवसन्नं यदारब्धं कर्म तत्रैव गच्छति । न चेद्बहूनि जन्मानि प्राप्यैवान्ते न संशयः' इति भाष्योदाहृतप्रमाणमत्रानुसन्धेयम् ॥ 'साक्षात्कृतब्रह्मणां सद्यःशरीरपाते वातपुत्रीयाः पौरुषेया ब्रह्मोपदेशाः प्रसज्येरन्नि'ति च सुधा विभावनीया । 'तदोकोऽग्रज्वलनं' इत्यादिसूत्रोक्तं संक्षिप्याह **ब्रह्मनाड्येत्यादिना** । **ब्रह्मनाड्या** 'शतं चैकस्य हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृता' इति भाष्योक्त्या ॥ **सैवेति** । ज्ञानोदयानन्तरं उत्क्रान्तेः प्राक्तनावस्थाऽपि संग्राह्या । एवकारः अयोगव्यवच्छेदपरो वा । **ब्रह्मलोके इति** । अत्र विस्तरः 'अप्रतीकालंबनास्तु सुषुम्ना मध्यसंस्थया । ब्रह्मनाड्या विनिष्क्रम्य विष्णोर्लोकमवाप्नुयुः ।' इत्यादिसत्तत्त्वरत्नमालायां उत्क्रान्तिप्रकरणादनुसन्धेयः ॥ १०५ ॥ १०६ ॥ १०७ ॥

वेदान्तज्ञानतः सम्यङ्निश्चितार्था विरागिणः ।
यतयः शुद्धसत्त्वास्ते ब्रह्मलोके वसन्ति हि ॥ १०८ ॥

विरागिणः यतय इत्यत्र हेतुपरं विशेषणम् । संन्यासयोगाद्यतयः इति श्रुतेः ॥ ॥ १०८ ॥

सर्वे परान्तकाले तु परामृतपदोदितात् ।
नारायणान्नित्यमुक्तात्परिमुच्यन्ति संसृतेः ॥ १०८ ॥

ल्यब्लोपे पञ्चमी चेयं भवेच्छब्दज्ञसंविदा ।
परामृतं प्राप्य मुक्ता इत्यप्यर्थः श्रुतेस्तदा ॥ ११० ॥

परामृतात् नित्यमुक्तात् नारायणात्। तदनुग्रहादिति यावत्। नारायणं प्राप्येति ॥ १०९ ॥ ११० ॥

अतः परममोक्षोऽयं नान्योऽसावस्ति जानताम् ।
इत्याह वैदिकी वाणी विशदा सर्वसंमता ॥ १११ ॥

परममोक्ष इति। एतेन परब्रह्मविदो मुख्यामृतत्वे गत्युत्क्रान्त्योरभावः इति परभाषितं (४-४-१३ ब्र.सू.) निरस्तम्। 'परामृतात्' इति 'परिमुच्यन्त' इति च वेदान्तविज्ञानसुनिश्चितार्थानां परब्रह्मविदां परममोक्षस्यैव स्पष्टमभिधानादित्याह वाणी विशदेति। स्वव्याहतं च शाङ्करभाष्यम्। स्वयमेव 'मुक्तानां परमा गतिः' इति विष्णुसहस्रनामव्याख्याने 'अविद्यारागद्वेषादिदोषविमुक्तानां प्रकृष्टा गन्तव्या देवता' 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यत इति भगवद्वचनादि'ति व्याख्यानेन गन्तव्या इत्यनेन मार्गस्य, प्रकृष्टा इत्यनेन कृष्णस्यैव परब्रह्मत्वस्य, इतःपरं गन्तव्यान्तरनिषेधेन मुख्यामृतत्वस्य च सुस्पष्टमङ्गीकारात् ॥ १११ ॥

अतो विमुक्तिकालोऽयं श्रौतत्वान्नापरो श्रुतेः ।
परान्तकालमेवेयं मुक्तिकालं यतोऽब्रवीत् ।
परान्तकालस्स किल महत्तत्त्वलयो यदा ॥ ११२ ॥

नापरः इदानीमेव ज्ञानेन बन्धबाधादविद्याऽस्तमयो मायिनामभिमतः ॥ महत्तत्त्वलयो यदेति 'अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं परं स्वमनुभूय परः स्वयंभूः' इति भागवतोक्तेः ॥ ११२ ॥

उदरे वासुदेवस्य जीवान्सर्वान्विधिस्तदा ।
निवेश्य सर्वमुक्त्यर्हान्जीवानादाय सत्वरः ॥ ११३ ॥

सर्वान् त्रिविधान् ॥ ११३ ॥

वैकुण्ठान्तःपुरस्थे तु विरजाख्ये सरिद्वरे ।
नित्ये चिद्रूपसलिले रजश्शब्दोपलक्षितैः ॥ ११४ ॥

त्रिगुणैर्वर्जिते तेषां भर्जनेऽतिपटीयसि ।
स्नात्वा भूतेन्द्रियमनोमात्रं त्रिगुणरूपिणम् ॥ ११५ ॥

वैकुण्ठान्तःपुरःस्थे 'प्रधानपरमव्योम्नोरन्तरा विरजा नदी'ति स्मृतेः। विरजाशब्दार्थमाह त्रिगुणैर्वर्जिते इति ॥ ११४ ॥ ११५ ॥

लिङ्गदेहं विनिर्भिद्य प्राङ्मुक्तैश्च त्रिधामगैः ।
सहमुक्तैश्च सहितो वासुदेवोदरं विशेत् ॥ ११६ ॥

एवं परान्तकालेऽस्मिन्मुच्यन्ते ब्रह्मणा सह ।
इत्याहोपनिषत्सैषा तत्तत्वमिदमेव हि ॥ ११७ ॥

ततश्चिद्रूपसलिलसंप्लवे सति केशवः ।
वटपत्रपुटे शेते लक्ष्म्या सह किल प्रभुः ॥ ११८ ॥

अतः परममोक्षस्य कालोऽयं नात्र संशयः ।
तस्माद्ब्रह्मलयस्सोऽयं महाप्रलय एव हि ॥ ११९ ॥

विनिर्भिद्य। 'स्वगुणाच्छादिका त्वेका' इत्यादिवचनानुसारेण ॥ ११६ ॥ ॥ ११७ ॥ ११८ ॥ ११९ ॥

सोऽयं लयश्च कल्पान्ते सङ्कर्षणमुखाग्निना ।
प्रलयार्केण च जगद्दाहे सांवर्तकोदकैः ।
विलोडितं च तद्भस्म सर्वं जलमयं भवेत् ॥ १२० ॥

जलं च तेजसा शुष्येत्तच्च वायौ प्रशाम्यति ।
वायुश्च गगने लीनो लयस्तस्याप्यहङ्कृतौ ।
अहङ्कारस्य महति तस्य स्यात्प्रकृतौ लयः ॥ १२१ ॥

सङ्कर्षणेति। 'सङ्कर्षणमुखानलः। दहन्नूर्ध्वशिखः' इति भागवतोक्तेः। सांवर्तकेति। 'सांवर्तको मेघगणो वर्षति स्म शतं समाः' इति च ॥ १२० ॥ १२१ ॥

प्रकृतिश्च स्वभावस्था स्वभावं प्रकृतिं विदुः।
अतस्तस्यास्तु न लयस्सा नित्यैव परात्मवत्॥ १२२ ॥

सा नित्यैव परात्मवत् इति 'नासतो विद्यतेऽभावो नाभावो विद्यते सतः' इति गीतोक्तप्रकारेणेति भावः ॥ १२२ ॥

इति श्रुतिपुराणादौ तत्र तत्र प्रदृश्यते।
एवं च ज्ञानबलतः कस्य नाशो भवेद्वद ॥ १२३ ॥

ज्ञानेनैव च नास्तित्वं कस्य विश्वस्य जायते।
प्रलये नास्तिता या तु सा ध्वंसादेव केवलम्॥ १२४ ॥

ज्ञानेनैव च नास्तित्वं पराभिमतं ज्ञानत्वेन निवर्त्यत्वम्। केवलं न तु 'नास्ति नासीद्भविष्यति' इति त्वदुक्तं त्रैकालिकनिषेधप्रतियोगित्वम् ॥ १२३ ॥ १२४ ॥

किमन्यन्नाशयेज्ज्ञानी कस्य वा नास्तितां दिशेत्।
स्वदेहस्यापि यद्दाहान्नास्तिता न स्वसंविदा ॥ १२५ ॥

अतो जगद्बाधकथा स्वाबोधादेव केवलम्।
उच्चैर्न वाच्या विद्वत्सु
महाहास्यास्प(दं)दा हि सा॥ १२६ ॥

न स्वसंविदेति। तदुक्तं सुधायाम्। 'किन्तु मुद्गरप्रहारादिना घटस्येवेश्वरज्ञानेच्छाप्रयत्नैर्विनाश एव' इति ॥ १२५ ॥ १२६ ॥

इतोऽन्यस्सर्वसंहारो न श्रौतो नापि यौक्तिकः।
घटादिसर्वनाशो हि स्वस्वकारणशेषवान् ॥ १२७ ॥

स्वस्वकारणेति। 'वायुना हृतगन्धा भूः सलिलत्वाय कल्पते' इत्यादिभिः भागवते नाशप्रकारोक्तेः ॥ १२७ ॥

दाहेन कार्यनाशेऽपि भस्मशेषः प्रदृश्यते।
स्वस्वावयवनाशेऽपि सूक्ष्मसूक्ष्मतदंशकाः।
शिष्टा भवन्ति तद्वस्तु कथं स्यादसदेव हि ॥ १२८ ॥

अतो या या त्वयोच्येत सा सा नाशपरंपरा।
कथं मुञ्चेदुपादानसूक्ष्मांशांशपरंपराम् ॥ १२९ ॥

कथमिति। अवयवसंयोगनाशेन कार्यनाशे अवयवानां, अवयवनाशेन तन्नाशे अवयवोपादानानां, अन्ततः मूलप्रकृतेरवशेषः इति कुत्रापि निःशेषनाशोऽलीक इति भावः ॥ १२८ ॥ १२९ ॥

परंपरा द्विरूपेयं प्रकृतौ पर्यवस्यति।
सर्वस्यान्ते यतस्सैव शिष्टा नष्टा च नैव सा ॥ १३० ॥

द्विरूपा कार्यकारणनाशरूपा। **नैव नष्टेति।** प्रकृतेर्नित्यत्वं च महाप्रलयानन्तरं पुनः सृष्टावुपादानत्वात् ॥ १३० ॥

नाशत्वाद्विमतो नाशस्स्याद्भावान्तरशेषवान्।
घटनाशवदित्येषा विदोषा युक्तिरस्ति हि ॥ १३१ ॥

जीवब्रह्मैक्यमाशासानेन मायिना विरुद्धधर्मोपलक्षितसर्वप्रपञ्चस्य ज्ञाननिवर्त्यत्वरूपमिथ्यात्वं यदुच्यते तत्र निवृत्तिरूपो विनाशः कीदृश इति प्रष्टव्यम्। किं असङ्कोचेन सर्वनाशः अथ ब्रह्मभिन्नस्य सर्वस्य भावस्य नाशः उत भावकार्यस्य, यद्वा ब्रह्मभिन्नस्य सादेरनादेः सर्वस्य नाशः इति विकल्प्य दूषयति। विमतः ज्ञानेन जायमानो निवृत्तिलक्षणः। विदोषा अव्यभिचरितव्याप्तियुता ॥ ॥ १३१ ॥

निश्शेषवस्तुनाशस्य नाशमात्रेऽप्यदर्शनात् ।
वक्राभासोक्तिमात्रेण नैव स्याद्धि स यौक्तिकः ॥ १३२ ॥

व्यभिचाराभावमेव विशदयति **अदर्शनादिति। वक्राभासेति** व्याप्तिरहितत्वाद्वक्रत्वं दृष्टान्तीकृतशुक्तिरूप्ये दृग्विषयत्वरूपदृश्यत्वस्य हेतोः तथा निवृत्तिरूपस्य साध्यस्य चाभावात् । असत्त्वेन सन्निकर्षस्य, नाशस्य चासंभवात् । तदुक्तं न्यायामृते 'विज्ञाननाश्यता मिथ्यारूप्यादौ नानुभूयते । किन्त्वधिष्ठानवत्सत्ये तदज्ञानेऽनुभूयते' इति। तेनैव हेतुना प्रातिभासिकत्वस्यापि साधनसौलभ्येन आभाससाम्यं च । **सः** नाशः ॥ १३२ ॥

अदृष्टकल्पनादोषो यतस्सर्वत्र सञ्चरेत् ।
श्रुतयश्च पुराणानि मन्मतस्यैव साक्षिणः ॥ १३३ ॥

श्रुतयः 'कालश्च नित्यः प्रकृतिश्च नित्या' इत्याद्याः । **पुराणानि** 'अव्याकृतं विशति यर्हि गुणत्रयात्मा कालं परं स्वमनुभूय परः स्वयंभूः' 'नित्या वेदाश्च समस्ताश्च' 'न क्वाप्यनीदृशं विश्वं तत्तत्कालानुसारतः' इत्यादीनि ॥ १३३ ॥

किञ्च सर्वविनाशो न नाशस्यास्याविनाशनात् ।
नापि भावस्य सर्वस्य नाशो ब्रह्माविनाशनात् ॥ १३४ ॥

असङ्कोचेन सर्वनाश इति पक्षं दूषयति **किञ्चेति।** तदुक्तमनुव्याख्याने 'अनादेरस्य विश्वस्य निवृत्तिर्यदि चेष्यते । निवृत्तिश्च निवर्तेत' इति । न चेष्टापत्तिः अभावविपत्तेरेव प्रतियोग्यापत्तिरूपत्वेन विश्वस्य पुनरुन्मज्जनप्रसङ्गात् । 'न हि सहस्राक्षोऽपि क्षयं क्षेप्तुः क्षमः' इत्यस्य उन्मत्तवाक्यत्वप्रसङ्गाच्च ॥ **नापीति।** 'नाशोऽयं विमतोऽपि स्यान्नाशत्वात्कर्तृशेषवान्' इत्यनुव्याख्यानात् । ब्रह्मेत्युपलक्षणं कालप्रकृत्यादीनां नित्यानां च ग्रहणम् ॥ १३४ ॥

ब्रह्मभिन्नस्य भावस्य नाशे जीवोऽपि नंक्ष्यति ।
मिथ्याभूतोऽस्ति तद्भेदः परमार्थो न कुत्रचित् ॥ १३५ ॥

ननु जीवो न ब्रह्मभिन्न इत्यत आह **मिथ्येति** । परमार्थतो भिन्नत्वं पक्षविशेषणं अतो न जीवस्य ज्ञाननिवर्त्यत्वसिद्धिरिति चेदेवं तर्हि जगतोऽपि तत्सिद्धिर्न स्यात् । तत्रापि पारमार्थिकभेदस्य त्वयाऽनभ्युपगमेन वियदादेः पक्षीकरणायोगादित्याह **नेति** । तथा च पारमार्थिकत्वविशेषणस्य परित्यागावश्यंभावात् जीवनाशप्रसङ्गो दुष्परिहर इति भावः ॥ १३५ ॥

भावकार्यस्य सर्वस्य नाश आशास्यते यदि ।
जीवस्य जीवधर्माणां कालादेर्गगनस्य च ।
विनाशोऽनादिभावानां भवेदाकस्मिकस्तदा॥ १३६ ॥

'एकमेवाद्वितीयं' इति श्रुतावेकशब्दस्य स्वकार्यपतितमन्यदिति परेण व्याख्यानात्तदनुसारेण शङ्कते **भावकार्यस्येति। अनादिभावानामिति।** तेषां कार्यत्वाभावादिति भावः। **जीवस्येति** 'जीव ईशो विशुद्धा चिदि'ति त्वया तस्यानादिषु परिगणनादिति भावः । **जीवधर्माणामिति** अनुच्छित्तिधर्मा इति श्रुत्या यावद्द्रव्यभाविनां तेषां तत्स्वरूपत्वेनानादित्वादिति भावः । कालादीत्यत्रादिपदेन वर्णप्रकृत्यादीनां ग्रहणम् । **विनाश इति** अद्वैतपालनार्थं तेषामपि नाशस्य त्वया वक्तव्यत्वात्, ज्ञानान्येन विनाशस्य च मिथ्यात्वासंपादकत्वेन त्वदसंमतेरिति भावः । अत उक्तं **आकस्मिक इति** ॥ १३६ ॥

ब्रह्मान्यानादिनाशे तु नश्येद्ब्रह्मापि तादृशम् ।
अतस्सर्वविनाशोऽयं विद्वदग्रे न शोभते ॥ १३७ ॥

अनादीति अभावद्वैतपक्षे भावेत्यपि पूरणीयम् । **ब्रह्मापीति** । ब्रह्म ज्ञाननिवर्त्यं अनादिभावत्वात् अज्ञानादिवदिति साधनसौलभ्यादिति भावः। ब्रह्मान्यत्वेन हेतुविशेषणेऽप्रयोजकतेत्यूह्यम् । **अयं** भाविनाशः । **न शोभते इति** तस्यापि भाविकालवृत्तित्वेन कालनाशोक्तेर्व्याहतत्वेन सर्वनाशासंभवादिति भावः। साक्ष्यादिप्रमाणबलेन तेषां ब्रह्मवदेव सत्यत्वसिद्धेरिति भावः ॥ १३७ ॥

अणुत्वेशवशत्वादेरनादेरविनाशनात् ।
जीवब्रह्मैकताशा च दुराशैवाभवत्तव ॥ १३८ ॥

ब्रह्मभिन्नभावरूपजडविनाशपक्षे ऐक्यासिद्धिं दोषमाह **अणुत्वेति।** आदिपदेन ब्रह्मधर्माः सर्वज्ञत्वादयः। तथा च स्वभावभूतविरुद्धधर्माणां चेतनत्वेन निवृत्त्यसिद्ध्या भागत्यागासंभवेन नैक्यसिद्धिरिति भावः। ऐक्यस्यौपाधिकस्य निरुपाधिकब्रह्मस्वरूपत्वासंभवेन भावरूपत्वेन च तन्नाशापत्तिश्च ॥ १३८ ।।

अनादिभावभूतानामेतेषां परमात्मवत्।
अज्ञानोपादानता ते न मिथ्यात्वं च (न)
युक्तिमत् ॥ १३९ ॥

अविद्यातत्कार्यान्यतरत्वस्य तव मिथ्यात्वलक्षणत्वेन तथा ज्ञानमज्ञानस्यैव निवर्तकं इति च नियमेन अनादीनां अज्ञानोपादानकत्वासंभवेन तेषां अनिवृत्तिरेवापद्यते इत्याह अनादीति। तदुक्तं वादावल्यां 'अनादिभावरूपस्य विज्ञानविलापनाऽसंभवाच्च ब्रह्मवदि'ति ॥ १३९ ॥

सादेरनादेस्सर्वस्य ब्रह्मणोऽन्यस्य वै क्षयः।
उक्तरीत्या स नैवाभूद्यो मायावादिनां मतः ॥ १४० ॥

प्रकारान्तरेणैव प्रलयप्रतिपादकप्रागुक्तश्रुतिस्मृतिविरोधश्च वज्रलेप इत्याह उक्तेति ॥ १४० ॥

साद्यदृष्टैस्सहान्यस्य कार्यमात्रस्य च क्षये।
यः पुनः कारणाभावात्सृष्ट्यभावस्तु कथ्यते।
चित्रं स तार्किकोक्तोऽपि प्रतितर्कहतो भवेत् ॥ १४१ ॥

तार्किका एव प्रतिपन्नाः। परान्तकाले जायमाने महालये सर्वादृष्टनाशो न भवति। किन्तु तदानीन्तनज्ञानिमात्रस्य। इतरेषां अज्ञानिनां अदृष्टस्योर्वरितत्वात् पुनः सृष्ट्यन्तराणि भवन्ति। चरमब्रह्मलयाख्यान्तलये तु सर्वादृष्टविनाशः। अतो निमित्ताभावान्न पुनः सृष्ट्यन्तरमिति। तदेतदप्रामाणिकं कुकल्पनामात्रम्। महालयातिरिक्तस्य तदभिमतचरमलयस्यैवाभावात् सृष्टिप्रलयप्रवाहस्य अनादिनित्यत्वेन प्रमितत्वादिति दूषयति नवभिः **सादीत्यादिभिः।** सादिभिः

सर्वादृष्टैः सह भूभूत्तरादेः। **क्षये** अन्तलये नाशे सति। **सः** अन्तलयः। प्रतितर्कः अग्रे, विमतः प्रलयः अदृष्टशेषवान्, इति पद्ये (१४७) वक्ष्यते। प्रत्यनुमानस्य श्रुतिसचिवत्वेनैव तेन तत्कल्पनाया बाध इति भावः ॥ १४१ ॥

ब्रह्मणः शतवर्षाख्यपरांतो यो महालयः।
सर्वकार्यकरण्डस्य ब्रह्माण्डस्यास्य सप्तभिः ॥ १४२ ॥

युक्तस्यावरणैरस्मिन् जायमाने पुनः पुनः।
अनादितोऽनुवृत्ते च स्पष्टं सृष्ट्यन्तरान्विते ॥ १४३ ॥

कार्यमात्रलये तावत्कार्यादृष्टस्य सर्वथा।
लयो नाजायत किल कथं सोऽन्ते भविष्यति ॥ १४४ ॥

यः महान् लयः, अस्मिन् कार्यादृष्टस्य सर्वथा लयो नाजायत किल, कथं सः अन्ते भविष्यति इति श्लोकत्रयस्यैकान्वयः। अनुवृत्ते सृष्ट्यन्तरान्विते इत्यनेन परंपराया अविच्छेदेन नित्यत्वं निदर्शयति ॥ १४२ ॥ १४३ ॥ १४४ ॥

न ह्येतेभ्यो लयेभ्यश्च स्यादन्योऽभ्यधिको लयः।
एभ्यो ब्रह्मादिदेवेभ्यो
ज्ञानी कोऽभ्यधिको वद ॥ १४५ ॥

एभ्यः प्रमितेभ्यः। **अभ्यधिकः** क इति। अन्यस्यैवाप्रामाणिकत्वात् तस्याधिकत्वं तु दूरे इति भावः ॥ १४५ ॥

कालस्यान्त्यस्य शृङ्गं न नापि तद्गलयस्य च।
अदृष्टकल्पनादोषो ह्यदृष्टं कल्पयत्यहो ॥ १४६ ॥

शृङ्गं ज्ञापक आगमः। **दोषः अदृष्टं कल्पयतीति।** दोषेण त्वत्कल्पनायाः पराहतत्वात् प्रमाणबलेन सृष्ट्यन्तरकारणमदृष्टं निराबाधं सिध्यतीति भावः ॥ ॥ १४६ ॥

विमतः प्रलयोऽदृष्टशेषवान्प्रलयत्वतः।
यथाऽयं प्रलयश्चेति युक्तिं कोऽत्येति तत्सताम् ॥ १४७ ॥

युक्तिं 'धाता यथापूर्वमकल्पयदि'त्यादि प्रमाणानुगृहीताम् ॥ १४७ ॥

किञ्चान्त्या सापि सृष्टिस्ते सर्वसृष्ट्युपमा भवेत्।
ज्ञानिमात्रावृता सा न पशुपक्ष्यादिसंवृता।
तस्यां च ज्ञानिमात्रस्यादृष्टनाशस्तु पूर्ववत् ॥ १४८ ॥

सर्वादृष्टविनाशस्तु हेत्वभावान्न यौक्तिकः।
तस्माद्वैदिकतर्काग्रे शुष्कतर्को न शोभते ॥ १४९ ॥

किञ्च त्वदभिमतायां अन्तिमसृष्टावपि न ज्ञानिमात्राः किन्तु अज्ञानिनः पशुपक्ष्यादयः प्राक्तनसृष्टिष्विव सन्त्येव। अज्ञानिनां च नादृष्टनाशः तव संमतः। अन्तलये सर्वादृष्टनाश इति रिक्थं वच इत्याह द्वाभ्यां **किञ्चेत्यादिना** ॥ इदं चोपलक्षणम्। विशेषानभ्युपगन्तुस्तस्य मते प्रलयकाले ईश्वरसञ्जिहीर्षाधीनत्वस्य दुर्वचत्वात्प्रलयोपाधिकत्वस्याङ्गीकारात् अन्योन्याश्रयेण प्रलयस्यैवासिद्धिरिति दोषोऽवगन्तव्यः। तदुक्तमनुव्याख्याने 'न हि कालविशेषोऽस्ति तत्पक्षे' इति ॥ ॥ १४८ ॥ १४९ ॥

सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्।
इति श्रुतिरनाद्यन्तकालीनाऽन्वग्रहीद्धि नः ॥ १५० ॥

अनादीति प्रामाण्योक्तिः। **नः** प्रक्रियामिति शेषः। **श्रुतिः** 'व्यदधाच्छाश्वतीभ्यः समाभ्यः'। 'शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते' 'यथेदानीं तथा चाग्रे पश्चादप्येतदीदृशम्' इत्यादीनि प्रमाणान्यप्यत्रानुसन्धेयानि ॥ १५० ॥

ततो वैकुण्ठमगमद्भास्वरं तमसः परम्।
यत्र नारायणस्साक्षान्न्यासिनां परमा गतिः ॥ १५१ ॥

शान्तानां न्यस्तदण्डानां यतो नावर्तते यतिः।
इति भागवते वैकुण्ठाख्या भगवतः पुरी ॥ १५२ ॥

तमश्शब्दोदिताज्ञानाद्बहिर्भूताऽतिभास्वरा।
पुनरावृत्तितश्शून्या गतिश्च परमोच्यते।
इतोऽतिरिक्तः परमो मोक्षः कस्स्याद्विवेकिनाम् ॥ १५३ ॥

अर्चिरादिमार्गेण प्राप्यो विष्णुलोकोऽपरमुक्तिरिति अद्वैतिनः। तदुक्तं चन्द्रिकायां (१-२-४) 'त्वन्मतेऽर्चिरादेरुपासकगतित्वेन ब्रह्मविद्गतित्वाभावादि'ति। तदेतत्स्मृतिवाक्यैर्दूषयन् वैकुण्ठलोकप्राप्तेरितरा परममुक्तिर्नास्तीति प्रमेयं स्मृतिभिः श्रुतिभिश्च सविस्तरं समर्थयते **ततइतिपूर्वैः**। पुरी परमोच्यते इति संबन्धः। तमसः परं इत्यस्यार्थः अज्ञानाद्बहिर्भूता इति। अङ्गीकृतश्च परेण तमःशब्दस्याज्ञानार्थकत्वं 'नासदासीदि'ति श्रुतिमुदाहृत्य अज्ञानस्यानिर्वचनीयत्व-सिद्धये तम आसीदिति वाक्यशेषमुदाहरता। न ह्यविद्याऽस्तमयादपरो मोक्षस्तेनेष्यत इति भावः ॥ १५१ ॥ १५२ ॥ १५३ ॥

मर्त्यो मृत्युव्यालभीतो लोकान्सर्वांश्च निर्भयान्।
नाद्राक्षीत्किल पादाब्जं प्राप्य विष्णोर्यदृच्छया।
स्वस्थश्शेते मृत्युरस्मादपैतीत्याह देवकी ॥ १५४ ॥

इतोऽपि कृष्णचरणप्राप्तिरेवामृतं सताम्।
जीवन्मुक्तो च यन्मृत्युस्ततो मुक्तिरियं परा ॥ १५५ ॥

'मर्त्यो मृत्युव्यालभीतः पलायन् लोकान्सर्वान्निर्भयान्नाध्यगच्छत् ॥ त्वत्पादाब्जं प्राप्य यदृच्छयान्ते स्वस्थः शेते मृत्युरस्मादपैति' इति भागवते (१०-४-२७) देवकीवाक्यमर्थतः संगृह्णाति **मर्त्य इति**। **परेति** पुनरावृत्तिराहित्यस्यैव परममुक्तिस्वलक्षणत्वादिति भावः ॥ १५४ ॥ १५५ ॥

आब्रह्मभवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ १५६ ॥

इति गीतोदितां वाणीमनुस्मर न विस्मर ।
जीवन्मुक्तौ तु यज्जन्म ततो मुक्तिरियं परा ॥ १५७ ॥

ननु अन्तरिक्षस्वर्गादिष्वपि मुक्ताः सन्ति इति स्थितिः । 'केचिदत्रैव मुच्यन्ते' इत्यादिवचनादिति चेत्सत्यम् । तथाऽपि अत्र मामुपेत्येत्यस्य श्वेतद्वीपस्थवासुदेवं प्राप्येति तथा तत्तल्लोकस्थ स्वमूर्तिविशेषं प्राप्येति चार्थस्य विवक्षितत्वात् न कोऽपि क्षुद्रोपद्रव इति मन्तव्यम् । विस्तरः सतत्त्वरत्नमालायाम् [श्लो. ४७४, ४९६] ॥ ॥ १५६ ॥ १५७ ॥

सा च विष्णोस्समीपाप्तिस्तदंघ्रिप्राप्तिरेव वा ।
तल्लोकेषु स्थितिर्वाऽभूत्तेनैक्यं त्वष्टमो रसः ॥ १५८ ॥

अस्पष्टवचनस्यार्थं स्पष्टोक्तेरनुसारतः ।
प्राहुस्सर्वे यतः पूर्वे तन्मा कुर्वेकताभ्रमम् ॥ १५९ ॥

एवं परममुक्तावपि सायुज्यादिभेदसद्भावेऽपि तवैक्यवार्ता गुहानिहितेत्याह **सा चेति** ॥ १५८ ॥ १५९ ॥

अनन्तासनवैकुण्ठश्वेतद्वीपाभिधास्त्रयः ।
ज्योतिष्मन्तो यत्र लोकास्तत्र माममृतं कृधि ॥ १६० ॥

इति श्रुतौ यतो विष्णोर्लोकेष्वमृततोदिता ।
ततस्तल्लोकगमनं महामोक्षो भवेद् ध्रुवम् ॥ १६१ ॥

ज्योतिष्मन्तः 'त्रिपादस्यामृतं दिवि' इति वाक्ये दिवि इत्यस्य तथा व्याख्यानात् । 'न तद्भासयते सूर्यो न शशाङ्को न पावकः । यद्गत्वा न निवर्तन्ते तद्धाम परमं मम' इति गीतायां लोकानां परमत्वोक्त्याऽपि सिद्धमर्थमाह **महामोक्ष इति** ॥ ॥ १६० ॥ १६१ ॥

यतोऽत्रैव श्रुतिस्स्पष्टं विष्णोर्लोके महीयते ।
इत्याह तदिमे लोकास्तस्यैव स्युर्न संशयः ॥ १६२ ॥

इमे त्रयः । अतः लोकशब्दः समुदायैकवचन इति भावः ॥ १६२ ॥

उक्तस्मृतेश्च संमतया लोकोऽयं वैष्णवो भवेत् ।
अतस्सलोकतां मोक्षो सालोक्यं च श्रुतिर्जगौ ॥ १६३ ॥

गच्छेद्ब्रह्मसलोकतामिति श्रुतौ सालोक्यमोक्षस्य विवरणाद्विष्णुलोकप्राप्तिरेव परममोक्ष इत्यवसीयते । न हि निर्विशेषब्रह्मभावे पराभिमते लोकशब्दव्यवहारोऽस्तीति भावः ॥ १६३ ॥

आब्रह्मभुवनाल्लोकाः पुनरावर्त्तिनोऽर्जुन ।
इत्युक्तेस्स च लोकोऽयं विष्णोर्लोको न संशयः ॥ १६४ ॥

परिशेषाच्च अस्य विष्णुलोकत्वसिद्धिरित्याह **आब्रह्मेति** ॥ १६४ ॥

सर्वलोकक्षये यस्तु मोक्षोऽसौ नेक्ष्यते क्वचित् ॥ १६५ ॥

यस्तु मोक्षः निर्विशेषलक्षणशून्यभावापत्तिरूपः । निर्विशेषत्वाच्छून्यवच्छून्य इति परेण भाषितत्वात् । **असौ क्वचित्** कुत्रापि श्रुतौ **नेक्ष्यते** नोपलभ्यते । अतः अप्रामाणिक एवेति भावः । यद्वा सर्वलोकक्षये लोकानां प्रलये नाशप्रतिपादनावसरे **असौ** विष्णुलोकः **न ईक्ष्यते** कुत्रापि न श्रूयते । अतः अयं विष्णोर्लोको मोक्ष इति पूर्वेणान्वयः ॥ १६५ ॥

पवमानोऽत्र यत्प्रार्थ्यो वायोश्च तदनुज्ञया ।
तल्लोकप्रापकत्वं तत्सिद्धं गुरुशिरोमणेः ॥ १६६ ॥

न केवलं 'विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया' इति वचनेन किन्तु मुमुक्षुणा मोक्षदानार्थं अत्र सूक्ते प्रार्थितत्वान्यथाऽनुपपत्त्या च श्रीमध्वस्य मोक्षप्रदातृत्वं सिध्यतीत्याह **पवमान इति** ॥ १६६ ॥

अन्ते ज्ञानादब्रह्मलोकमभिसंपद्यते किल ।
आवर्तते न स पुनः पुनरावर्तते न सः ।
द्विरुक्त्येत्थं निरणयत्पुनरावृत्तिशून्यताम् ॥ १६७ ॥

विष्णोर्वैकुण्ठलोकप्राप्तिरेव परममोक्ष इत्येतच्छन्दोगोपनिषत्समाख्ययाऽपि साधयति **अन्ते** इत्यादिना अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तदश्वत्थस्सोमसदनस्तदपराजिता पूर्ब्रह्मणः प्रभुविमितमिति, स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते इति च वाक्ये उक्तार्थे समाख्यात्वेन व्याख्याति **अन्ते इति**। स खल्वेवं वर्तयन्यावदायुषं इत्यर्थः। द्विरुक्त्या अभ्यासरूपलिङ्गेन ॥ १६७ ॥

लोकोऽयं ब्रह्मणो विष्णोरपराजितपूः किल।
कुयुक्त्या मृत्युना दोषैः पराजिग्ये यतो न सा ॥ १६८ ॥

ब्रह्मेत्यस्य परं ब्रह्मेत्यर्थ इत्याह **विष्णोरिति**। **कुयुक्त्या** विमतो न परममोक्षः असदुपासनेन प्राप्तत्वादित्येवंरूपया मायिप्रयुक्तया। **नेति**। अपरमुक्ताव-संभाव्यमानसुबहुलक्षणकथनेन कुयुक्तेराभासीकरणात् ॥ १६८ ॥

सत्त्वचित्त्वविभुत्वाद्यैस्सत्प्रभोस्संमिता किल।
हिरणमय्याः पुरस्तस्याः परं ब्रह्म प्रभुः किल ॥ १६९ ॥

इति च्छन्दोगोपनिषज्जगौ यत्तज्जगत्प्रभोः।
वैकुण्ठाख्यैव नगरी सा पुरीति मतिर्मम ॥ १७० ॥

तान्येव प्रतिज्ञातपरममुक्तिलक्षणान्याह **सत्त्वेत्यादिना**। **सत्त्वं** निर्दोषत्वलक्षणं साधुत्वम्। 'सद्भावे साधुभावे' चेत्यभिधानात्। **चित्त्वं** प्रभुविमितमिति विशेषणबलाल्लब्धार्थः। प्रभुणा विष्णुना विशेषेण चित्त्वादिधर्मैरुपमितमित्यर्थः। लक्ष्म्यात्मकमित्यर्थः। लक्ष्म्याः समासमत्त्वेन यथायोग्यं साम्यं विवक्षितम्। तत्स्फोरणायैव विष्णोः लक्ष्मीविभुत्वोक्तिः ॥ १६९ ॥ १७० ॥

यत्राश्वत्थोऽमृतस्यन्दी यत्रारण्यौ सुधार्णवौ।
साऽश्वत्थप्रियदुग्धाब्धिशायिनः पूर्न संशयः ॥ १७१ ॥

श्रुतौ अश्वत्थेतिपदेन अश्वत्थप्रियत्वस्य सोमसवनमितिपदेन सुधास्यन्दि-दुग्धाब्धिशायित्वस्य च इत्येवं विष्णुधर्मप्रत्यभिज्ञानाच्चास्य तत्पुरत्वसिद्धिरित्याह

यत्रेति। 'ॐ गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॐ' इति सूत्रभाष्ये 'तस्यैव हि तल्लक्षणत्वेनोच्यते' इति सुधार्णवद्वयाश्रयलोकवत्त्वस्य स्मृतिसमाख्यया विष्णुलक्षणत्वस्य समर्थितत्वादिति भावः। निर्वचनेन अरण्यशब्दयोर्ज्ञान-सुखरूपार्थकत्वलाभादिति भावः ॥ १७१ ॥

किञ्च श्रुतिर्यतस्स्पष्टममृतेनावृतां पुरीम्।
आह तेनापि मुक्तस्य पुरी सेयं न संशयः ॥ १७२ ॥

जात्येकवचनं चेदमावृतामिति कीर्तनात्।
अतोऽमृतैः पूर्णपुरी नारायणपुरी ध्रुवम् ॥ १७३ ॥

अमृतेन मुक्तवर्गेणावृतं व्याप्तं इति श्रुतौ कीर्तनाच्चैवमित्याह **किञ्चेति**। 'यो वैतां ब्रह्मणो वेद अमृतेनावृतां पुरीं' इति श्रुतावित्यर्थः। **इदं** अमृतेनेदं पदम्। **आवृतां** पूर्णाम्। मुक्तैः पूर्णाम्। तथा च 'अरश्च ह वै ण्यश्च' इति पूर्वोदाहृतश्रुत्युक्तो ब्रह्मलोको विष्णोः परब्रह्मणो लोक एव न कार्यब्रह्मणः संसारिण इति दर्शयति **अत इति** ॥ १७२ ॥ १७३ ॥

देवानां पूरयोध्येति यदयोध्याभिधां पुरः।
प्रादात्तस्याः श्रुतिः पूर्वं तद्विष्णोरेव सा पुरी ॥ १७४ ॥

नानाजनपदाकीर्णं वैकुण्ठं तद्धरेः पदम्।
तन्मध्ये नगरी दिव्या साऽयोध्येति प्रकीर्तिता।
इति पाद्मस्य वचनाद्यदयोध्या हरेः पुरी ॥ १७५ ॥

श्रुतिः 'यो वैतां' इति श्रुतिः। **पूर्वं** पूर्वभागे। देवानां मुक्तदेवानां, 'यत्र पूर्वे साध्याः सन्ति देवाः' इति श्रुतिसिद्धानाम् ॥ १७४ ॥ १७५ ॥

विभ्राजमानां हरिणीमिति सैव श्रुतिः पुनः।
हरिणीमाह तेनापि हरेरेव पुरी भवेत् ॥ १७६ ॥

सैव श्रुतिः 'यो वै तामि'ति श्रुतिः। 'हरेरियं' इति निर्वचनलब्धां हरिणीम् ॥
॥ १७६ ॥

पुरीं हिरण्मयीं ब्रह्म विवेशेति यतः श्रुतिः।
ब्रह्मणोऽन्ते प्रवेशार्हामाह तेनापि सा पुरी ॥ १७७ ॥

ब्रह्म मुक्तः चतुर्मुखः कार्यब्रह्म ॥ १७७ ॥

विष्णोरेव पुरी ब्रह्मनाम्नस्तस्यैव पूस्त्वतः।
क्वचिद्ब्रह्मपुरीत्युक्ता सैव ब्रह्मा विशेद्धि याम् ॥ १७८ ॥

ब्रह्मपुरीशब्दस्य छन्दोगोपनिषदुक्तनिर्वचनेनापि विष्णुपुरीत्वं सिध्यतीत्याह **विष्णोरिति। ब्रह्मनाम्नः** 'आत्मब्रह्मादयः शब्दास्तमृते विष्णुमव्ययम्। न संभवन्ति इत्युक्तेः। ब्रह्म ब्रह्मपुरीं विशेदित्युक्तौ प्रथमब्रह्मशब्दस्य बाधकवशात् कार्यब्रह्मपरत्वमेव। 'ब्रह्मैव सन् ब्रह्माप्नोति' इत्यत्रेवेति भावः ॥ १७८ ॥

ये तु लोकान्तरप्राप्तिमोक्षं नाचक्षतेऽबुधाः।
तेषां वृथार्चिराद्यध्वनोर्ध्वोर्ध्वगमनं भवेत् ॥ १७९ ॥

अबुधाः मिथ्योपासनासाध्य इति अन्यथाज्ञानिनः। **वृथा** ब्रह्मविद्गतिरूप-निर्विशेषब्रह्मभावापत्तिरूपत्वाभावात् अपुरुषार्थः ॥ १७९ ॥

ब्रह्मज्ञानेन सर्वस्य नाशे ब्रह्माभवत्स्वयम्।
क्व गच्छेदपरिच्छिन्नो मार्गः कस्यापवर्गदः ॥ १८० ॥

नाशे बाधे। **स्वयमिति** 'स्वेन रूपेणाभिनिष्पद्यत' इत्यस्य 'केवलेनैवैवात्मनाविर्भवति न तु धर्मान्तरेणे'ति परेण व्याख्यानान्निर्विशेषभावस्यैव मोक्षत्वकथनादिति भावः। इदं च व्याख्यानं स्वव्याहतम्। 'मुक्तानां परमा गतिः' इति नामव्याख्याने विष्णुरेव प्रकृष्टा गन्तव्या देवता इति भाषितत्वादिति मन्तव्यम् ॥
॥ १८० ॥

अतो वैकुण्ठादिलोकप्राप्तिर्मुक्तिर्विवेकिनाम्।
अन्या तु मुक्तिराम्नायन्यायच्छेदाय केवलम् ॥ १८१ ॥

आम्नायन्यायेति। उपक्रमादिन्यायैः विष्णोर्लोकप्राप्तिरेव मोक्ष इत्यत्राम्नायानां तात्पर्यावधारणादिति भावः ॥ १८१ ॥

खगेन्द्रध्वजपादाब्जयुगमूलनिषेवणम्।
यतो भागवते स्पष्टमपवर्गाख्यमीरितम् ॥ १८२ ॥

भागवते 'स वै महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः। ज्ञानेन वैयासकिशब्दितेन भेजे खगेन्द्रध्वजपादमूलम्।' इति श्लोके [१-१८-१६] ॥
॥ १८२ ॥

अतो वैकुण्ठलोकस्थमुकुन्दपदसन्निधौ।
स्थितिरेव मुमुक्षूणां मोक्षो व्यासानुशासनात् ॥ १८३ ॥

अयं श्लोकः भागवतस्य प्रामाण्यं तेन च मुक्तिस्वरूपतत्साधनानि निर्धारयति। तत्प्रकारं दर्शयति नवभिः **अत इत्यादिना। स्थितिरेव** इति एवकारेण शून्यभावो मोक्ष इति माध्यमिकमतं, निर्विशेषब्रह्मभाव इति मायिमतम्, सततोर्ध्वगतिरिति जैनमतं च निरस्तं ध्येयम्। एवं 'रथो ध्वजः' इत्यादि सुखविहारसाधनोक्त्या सुखध्वंसो मोक्ष इति तार्किकमतमपहस्तितं ध्येयम्। एवं मुक्तखगानां तदिन्द्रस्य गरुडस्य च सद्भावकथनेन मोक्षे तदभावं वर्णयतां, एवं पादमूलेऽवस्थितिरेव न तु तत्समानानन्द इति कीर्तनेन आनन्दसाम्यं वदतां रामानुजीयानां च मतं पराकृतं इत्याद्यूह्यम् ॥ १८३ ॥

अतीतकल्पमुक्तं चाप्येषा वागेव यद्वदेत्।
पुराणस्य सदेदृक्त्वात्तेन भेज इतीरितम् ॥ १८४ ॥

एषा वागेवेति। 'पुराणानि तदर्थानि सर्गे सर्गे' इत्युक्तेः। **भेजे** अतीतकल्पे विद्यमानः परीक्षित् इत्युपस्कारेण योज्यम्। 'अतीतानागतानां समानरूपत्वात्प्राप्त-पदानां मुक्त्याऽऽवृत्तावप्यविरोधः' इति भाष्यवचनात् ॥ १८४ ॥

आगामिनोऽपि निर्णीत्यै वागेवं वर्तते किल।
अपवर्गाख्यमित्युक्तेरग्रेऽन्योऽर्थो न शोभते ॥ १८५ ॥

एतत्कल्पीयपरिक्षितः कर्तृत्वेन ग्रहणेऽपि 'एष्यत्तु निश्चितं यत्तदतीतत्वेन भण्यते' इति न्यायसूचनादतीतत्वोक्त्यविरोध इत्याह **आगामिनोऽपीति।** परान्तकाले संपद्यमानस्यापीत्यर्थः। अपवर्गाख्यमिति अभिधानवृत्तिकथना-दुपचारेणापरमुक्तिरत्रोच्यते इति चोद्यानवकाश इत्याह **नेति** ॥ १८५ ॥

ज्ञानसाध्यत्वकथनात्सिद्धा परममोक्षता ॥ १८६ ॥

ब्रह्मविद्गतिरपरमोक्ष इति मायिनाऽपि दुर्वचमित्याह **ज्ञानेति** ॥ १८६ ॥

सेव्यसेवकभावश्च यतो भेज इतीर्यते।
अतो जीवेशभेदस्य मुक्तावप्यनुवर्तनम् ॥ १८७ ॥

साकारत्वं च पादोक्त्या रथोक्त्या भोगसाधनम्।
तारतम्यं च जीवेषु खगेन्द्रत्वस्य कीर्तनात्।
खगादिजीवराशिश्च मुक्तावस्तीति गम्यते ॥ १८८ ॥

एतत्समस्तं तत्रापि सिद्धं वाक्यार्थवेदिनाम् ॥ १८९ ॥

अनुवर्तनमिति। भेदस्यानौपाधिकत्वस्य पारमार्थिकत्वस्य चोक्त्या भेदस्यौपाधिकत्वं आचक्षाणो भास्करः आविद्यकत्वं वदन् मायी च दूषितौ ॥ ॥ १८७ ॥ १८८ ॥ १८९ ॥

महाभागवतेऽनल्पबुद्धिः पाण्डववंशजः।
अधिकारी व्यासपुत्रः शुको योगीश्वरो गुरुः ॥ १९० ॥

तादृशाचार्यसंपत्तौ तस्य ज्ञानेन यत्फलम्।
महामोक्षः कथं नासौ यन्मार्गोऽद्यापि योगिनाम् ॥ १९१ ॥

'अथो विहायेमममुं च लोकं विमृश्य तौ हेयतया पुरस्तात्। कृष्णांघ्रिसेवामभिमृश्यमान उपाविशत्प्रायममर्त्यनद्यां' इति पूर्वं प्रकृतस्य 'स' इत्यत्र परामर्शात् परीक्षितः नित्यानित्यवस्तुविवेकादिमत्त्वं, महाभागवतः इत्यनेन भक्तिपूर्वकाध्ययनं अदभ्रबुद्धिरित्यनेन सामर्थ्यं विद्वत्त्वं च इति अधिकारि-संपत्समृद्धिरभिहिता इत्याह **अधिकारीति।** एतैरेव विशेषणैस्तत्त्वज्ञानयोग्यता परीक्षिदिति पाण्डववंशजत्वकसूचनेन वक्तृप्रीतिविषयतेति ग्रन्थस्य श्रोत्रानुकूल्यं, शुकस्य वैयासकिरिति निर्देशेन व्यासोपदिष्टप्रमेयानामेव तत्पुत्रेण वर्णितत्वेन वक्त्रानुकूल्यं च प्रदर्शितं इति विभावनीयम्। प्रायोपविष्टं प्रति तन्मोक्षार्थ-मुपदिष्टत्वेन प्रसङ्गानुकूल्यं च। तस्मात्परमप्रमाणत्वेन श्लोकनिरूपितं प्रमेयजातं वस्तुतत्त्वमिति सर्वमवदातम्। एवमीदृशज्ञानसाध्यत्वेनाभिहितोऽपवर्गो-ऽपरममोक्ष इति वादः उन्मत्तप्रलाप इत्यतिरोहितम् ॥ १९० ॥ १९१ ॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः।
यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ १९२ ॥

अनुकृत्यधिकरणे सूर्याद्यप्रकाश्यत्वेन हेतुना कृष्णस्यानिर्देश्यसुखरूपत्व-समर्थितत्वात्तत्प्राप्तिरेव परममोक्ष इत्याह **नेति** ॥ १९२ ॥

इति गीतासु कृष्णेन स्वलोकगमनस्य यत्।
पुनरावृत्तिशून्यत्वं परमत्वं च कीर्तितम्।
अतस्तत्परमं धाम तदेव च परात्परम् ॥ १९३ ॥

गीतासु इति बहुवचनेन 'मामेवेष्यसि' 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमि'त्यादीनि वचनानि संग्राह्याणि ॥ १९३ ॥

यत्र त्वस्येति वाक्यं च स्पष्टश्रुत्युक्तमार्गतः।
आचचक्षे परं मोक्षमिममेव न चापरम् ॥ १९४ ॥

स्पष्टश्रुतीति 'यथाकामं चरति यथाकामं पिबति यथाकामं रमते' इत्यादि भाष्योदाहृतश्रुतीत्यर्थः, 'श्यामावदाताः शतपत्रलोचनाः' इति तदुदाहृत-

स्पष्टस्मृतयोऽपि ग्राह्याः। **इममेव** 'लोकं वैकुण्ठनामानं दिव्यं षाड्गुण्यसंयुतं' इत्युक्तमेव। **अपरं** निर्विशेषभावरूपम् ॥ १९४ ॥

वाक्यार्थस्य प्रकारश्च पूर्वमेव निरूपितः।
तयोर्निरवकाशस्य प्राबल्यं सावकाशतः ॥ १९५ ॥

सावकाशतः तर्कमुखतया योजनावकाशवतः यत्र त्वस्येति वाक्यात् ॥ ॥ १९५ ॥

अन्यथा सुखभोगस्य ज्ञानमात्रस्य सर्वथा।
निषेधात्तार्किकस्यैव मोक्षस्यान्नावयोर्मते ॥ १९६ ॥

अन्यथा तर्कात्मकत्वानङ्गीकारे, दर्शनस्पर्शनरसनघ्राणादीनां निषेधात्मकत्वापत्त्या। **तार्किकस्य** मोक्षे ज्ञानसुखादिगुणाभावमङ्गीकुर्वाणस्य। इदं चापाततः। तार्किकः सुखाद्यनङ्गीकारेऽपि शिलासदृशमपि भवतु मुक्तानां स्वरूपमेव वोररीकुरुते। अयं तु मायी 'न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता' इति गौडपादोक्तरीत्या मुक्तस्वरूपमेवापलपतीति ततोऽपि निकृष्ट इति हृदयम् ॥ ॥ १९६ ॥

अविद्याऽस्तमयाधारो भावान्तरविभेदवान्।
ध्वंसाधारत्वतः कुंभध्वंसाधारकपालवत्।
अनुमेयं मुक्तिकाले भेदं साधयति स्फुटम् ॥ १९७ ॥

'विमतो भिन्नो मुक्तत्वात्' इति तत्त्वोद्योतोक्तमनुमानं मनसि निधाय मुक्तभेदसाधकमनुमानमाह **अविद्याऽस्तमयाधार इति**। संसारान्मुक्त इत्यर्थः। 'अविद्याऽस्तमयो मोक्षः सा संसार उदाहृतः' इति तदुक्तेः। ननु साध्ये भावान्तरपदेन स्वव्यतिरिक्तभावविवक्षायामप्रसिद्धविशेषणता। मुक्तस्य तद्भेदसिद्धिं विना तेषामेतद्व्यतिरिक्तत्वासिद्धेः। सिद्धौ च सिद्धसाधनत्वादिति चेन्न। स्वप्रागभावदशायां येन भेदेन विशिष्टस्तेनैव मोक्षेऽपीत्ययमर्थो विवक्षित इति टीकोक्तरीत्या साध्यतात्पर्यस्य विवक्षितत्वात्। **कुम्भेति** प्रतियोगिध्वंसयोः

समानदेशवृत्तित्वनियमाद्घटध्वंसाधारः कपाल एव। तस्य च प्रागवस्था घटावस्था। तदानीं विद्यमानो भेदः जडसंसारिपरमात्मप्रतियोगिकः। स सर्वोऽपि कपालदशायामनुवर्तते इति दृष्टान्ते साध्यसिद्धिः। तस्यैव संसारान्मुक्तेऽपि सिद्ध्या प्रतियोगिविशेषघटितस्य उद्दिष्टभेदस्य सिद्धिः॥ यद्वा बन्धध्वंसाधारत्वं हेतुः। तथात्वे निगडमुक्तो दृष्टान्तः इति तट्टीकोक्तरीत्या प्रयोगो वा बोध्यः। अनुमा इयं इति पदच्छेदः ॥ १९७ ॥

ब्रह्मा तु सर्वजीवांस्तांस्त्रिविधान्स्वोदरस्थितान्।
निवेश्य विष्णोरुदरे कुक्षिस्थैरपरोक्षिभिः ॥ १९८ ॥

एवं पूर्वोक्तं महाप्रलये सर्वजीवानां स्थितिप्रकारमनूद्य भागवतसमाख्यया विशदयति **ब्रह्मेत्यादिभिः**। **अपरोक्षिभिः** स्वस्वयोग्यभगवद्रूपविशेषदर्शन-भोगाभ्यां विनष्टानिष्टसञ्चितप्रारब्धलक्षणाशेषकर्मभिः ॥ १९८ ॥

साकं वैकुण्ठवाहिन्यां परितोऽन्तःपुरं हरेः।
मुक्तामुक्तस्थलोपाधौ चिद्रूपजलसंपदि ॥ १९९ ॥

चिद्रूपेति। लक्ष्म्यात्मकेत्यर्थः ॥ १९९ ॥

विरजायां महानद्यां निर्दोषायां भवच्छिदि।
मग्नो विध्वस्तसंसारो लिङ्गदेहस्य भङ्गतः ॥ २०० ॥

विध्वस्तेति। 'प्रारब्धकर्मशेषस्तु विरजातरणावधिरि'त्युक्तेः ॥ २०० ॥

दिव्यस्वरूपसंपन्नः शेषवीन्द्रेन्द्रपूर्वकैः।
चिद्रूपैः सनकाद्यैश्च भृग्वाद्यैश्च समन्वितः ॥ २०१ ॥

चिद्रूपैः 'आनन्दमात्रवपुषः सृतिविप्रमुक्तान्' इति भगवत्पादवचनात् ॥ ॥ २०१ ॥

कुक्षिं प्रविश्य स्वपितुरुषित्वा शतवत्सरान्।
सृष्टिकाले पूर्वमुक्ता ब्रह्माद्या योगिनो यथा।
जाताः स्वयञ्च स्वगणैः सह तद्वत्प्रजायते ॥ २०२ ॥

शतवत्सरान् 'तावत्येव निशा तात यन्निमीलति विश्वसृगि'त्युक्तेः ॥ २०२ ॥

शुद्धप्रकृत्यंशतः स्युर्भूषणायुधराशयः।
मुक्तानां किल सर्वेषां लिङ्गभङ्गे हरीच्छया ॥ २०३ ॥

यथेति 'यथापूर्वं प्रजायते' इति वचनात्। हरीच्छयेति 'ज्ञानिनां मोक्षदश्च सः' इत्युक्तेः ईश्वरेच्छाया एव प्रधानावरणत्वात्। शुद्धेति बन्धकव्यापाररहितेत्यर्थः। भूषणेति। 'सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः।' इति द्वितीयस्कन्धे हरिणा चतुर्मुखाय प्रदर्शितस्य वैकुण्ठस्य वर्णनात्। 'सन्दर्शयामास परं न यत्पदमि'ति वचनात् तस्यैव परममुक्तित्वं प्रमीयते ॥ २०३ ॥

अतः सारूप्यमोक्षोऽयं सर्वेषामपि योगिनाम्।
सालोक्यसामीप्यसायुज्यानि योग्यतया किल ॥ २०४ ॥

किलेति योग्यतयेति च वचनेन जीवानां अनादिस्वरूपयोग्यतां मुक्तौ तारतम्यं चापलपन्तो रामानुजीया निरस्ताः। 'मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने' इति स्मृतौ 'सर्वेऽस्मै देवा बलिमावहन्ति' इति श्रुतौ च चतुर्मुखस्य सर्वमुक्तानामाधिपत्यसिद्धेः ॥ २०४ ॥

अस्मद्गुरुर्मुख्यवायुर्हरेर्नाभिसरोरुहात्।
उत्पद्य चतुरास्यत्वं प्राप्य शास्त्यखिलं जगत् ॥ २०५ ॥

चतुरास्यत्वं प्राप्येति 'स्वधर्मनिष्ठः शतजन्मभिः पुमान्विरिञ्चतामेति' इति वक्ष्यप्रमाणानुसारेणेति भावः ॥ २०५ ॥

एवं चक्री जगच्चक्रं सदावर्तयति प्रभुः।
आद्यः स्थिरचराणां यो वेदगर्भः सहर्षिभिः ॥ २०६ ॥

योगेश्वरैः कुमाराद्यैः सिद्धैर्योगप्रवर्तकैः।
भेददृष्ट्याऽभिमानेन निस्सङ्गेनापि कर्मणा ॥ २०७ ॥

कर्तृत्वात्सगुणं ब्रह्म पुरुषं पुरुषर्षभम्।
स सङ्गत्य पुनः काले कालेनेश्वरमूर्तिना ॥ २०८ ॥

सदेति। 'व्यदधाच्छाश्वतीभ्यः समाभ्यः' इति श्रुतेः। 'न क्वाप्यनीदृशं विश्वमि'ति स्मृतेश्च। आद्य इत्यादि भागवतवचनम् ॥ २०६ ॥ २०७ ॥ २०८ ॥

जाते गुणव्यतिकरे यथापूर्वं प्रजायते।
इति भागवते स्पष्टं कथेयं समुदीरिता ॥ २०९ ॥

समुदीरिता समाख्यारूपेण वर्णिता ॥ २०९ ॥

साधनं चास्य जीवेशभेददृष्टिर्हरौ गुरौ।
अभिमानाभिधा भक्तिर्निवृत्तं कर्म चोच्यते ॥ २१० ॥

मुख्यं तदुभयं कर्म त्वमुख्यं तत्र साधनम्।
अतस्तृतीयं तत्रोक्तमपिशब्दोऽप्यगर्हयत् ॥ २११ ॥

समुच्चयार्थं गर्हार्थमपिशब्दोऽयमीरितः।
न चेच्चशब्दं प्रब्रूयात्सोऽपि च्छन्दो भिनत्ति न ॥ २१२ ॥

अभिमानोऽप्युक्तरीत्या भक्तिरेव भवेदसौ।
मोक्षसाधनपंक्तौ यः पठितो दिव्ययोगिना ॥ २१३ ॥

एवं परान्तकाले स्यान्मुक्तत्वं योग्ययोगिनाम्।
परान्तकालो यन्मुक्तिकालः श्रुतिषु कथ्यते।
निवृत्तं कर्म यन्मुक्त्यै ततोऽन्योर्थो न शोभते ॥ २१४ ॥

तदेव साधयति साधकं चेति। भेददृष्ट्या [भाग. ३-३३ ११-१५] इत्यस्यार्थः जीवेशेति। पञ्चभेदेत्यर्थः। [एतेषां श्लोकानां अर्थः तात्पर्योक्तः

अभिमानेन पूर्णज्ञानेन। सङ्कृत्य लये परमेश्वरं प्रविश्य। **यथापूर्वं प्रजायते** उच्चनीचादिभावेन जायते **अगुणव्यतिकरे** बहिः श्वेतद्वीपे निर्गच्छन्ति।] 'पञ्चभेदाश्च विज्ञाय — मुक्तिर्न चान्यथा' इति स्मृतेः। 'जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः' इति श्रुतेः। **अभिमानाभिधेति** अभितो मानः इति व्युत्पत्त्येति भावः। **गुराविति**। 'यस्य देवे परा भक्तिर्यथा देवे तथा गुरावि'ति श्रुतेः। **निःसङ्गेनेति** निवृत्तेनेत्यर्थः। 'निष्कामं ज्ञानपूर्वं तु निवृत्तमिह चोच्यते। निवृत्तं सेवमानस्तु ब्रह्माभ्येति सनातनमि'ति वचनात्। अपिशब्देन ज्ञानसमकक्षतां गर्हयामास। ॐ भाक्तं वा अनात्मवित्तथा हि दर्शयति इति सूत्रात्। **जायते** जनि प्रादुर्भावे इति धातोः ज्ञानानन्दाद्यात्मकस्वस्वरूपेणाविर्भवतीत्यर्थः। **अन्यः अर्थः** मिथ्याभूतभेददर्शनेन देहाभिमानेन च यथापूर्वं इह संसारे देहसंबन्धरूपं जन्म प्राप्नोतीत्येवंरूपः। **न शोभते** तिरस्कार्यः। 'न भारती मेङ्ग मृषोपलक्ष्यते न कर्हिचिन्मे मनसो मृषा गतिः।' इत्यादिकथितमहिमातिशयोपेतस्य अभिमानाद्यशेषदोषदूरस्य चतुर्मुखस्य परान्तकाले प्राप्यगतेः मोक्षत्वावश्यंभावात् तस्याः संसारत्वकथनस्य प्रमाणविरुद्धतयाऽपहसनीयत्वादिति भावः। अतः योगीश्वरस्य चतुर्मुखस्य सनकादियोगिनां साधनवर्णनपरत्रितयस्य अस्मदुक्तरीत्या क्रमेण ज्ञानं भक्तिः वैराग्यं इत्येवार्थाश्रयणस्य समुचितत्वादिति भावः॥ २१० ॥ २११ ॥ २१२ ॥ २१३ ॥ ॥ २१४ ॥

पुमान्विरिञ्चतामेति मामेवैति ततः परम्।
इत्युक्त्या च पुनर्जन्म तस्यैव स्यात्कथं वद ॥ २१५ ॥

मां लक्ष्मीं स्वात्मवाचित्वे यथाहमिति रुद्रवाक्।
न शोभते न हि स्वात्मप्राप्तिः स्वस्य लये सति ॥ २१६ ॥

पदं वैष्णवमेतीति वैकुण्ठगतिकीर्तनात्।
पुनरावृत्तिवार्ताऽस्य निवृत्तैवाभवत्तव ॥ २१७ ॥

सुस्पष्टभागवतवचनाच्चैवमित्याह **पुमानिति**। अनेन 'स्वधर्मनिष्ठः शतजन्मभिः पुमान् विरिञ्चतामेति ततं परं हि माम्। अव्याकृतं भागवतोऽथ वैष्णवं पदं' [४-२४-२९] इति रुद्रवाक्यमर्थतः सङ्गृह्णाति। **शतजन्मभिरिति** एकोनशतकल्पसाधनानन्तरं इत्यर्थः। **ततः परं** विरिञ्चिपदेन साधनानन्तरम्। **मां** लक्ष्मीं एति। द्वारमात्रतयेत्यर्थः। न तु तत्र लयः। वैष्णवं पदमेति इति उत्तरत्र श्रुतेः। रुद्रस्य चतुर्मुखे विलयस्य प्रमितत्वेन **मां** इत्यस्य स्वात्मानं रुद्रमित्यर्थस्तु अशक्यशङ्कः॥ २१५ ॥ २१६ ॥ २१७ ॥

ब्रह्मणा सह मुक्तः सन्भोगान्भुङ्क्ते विपश्चिता।
श्रुतिश्चैषा ब्रह्मणोऽन्ते मुक्तिमाह न संसृतिम्॥ २१८ ॥

श्रुतिविरुद्धश्च परपरिकल्पितोऽर्थ इति वक्ति **ब्रह्मणेति**। **श्रुतिः** सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति श्रुतिः। अत्र मुक्तमात्रस्य चतुर्मुखेण सहैव भोगकथनात् चतुर्मुखस्यैव पुनः संसारे आवृत्तिकथनं कथं नासङ्गतमित्याशयः॥ ॥ २१८ ॥

दत्तं किल ब्रह्मपदं रामेणास्मद्धनूमते।
तच्च न स्याद्यदि ब्रह्मा स एव स्यात्पुनः पुनः॥ २१९ ॥

नैष दोषः। ब्रह्मणा पुनः कल्पान्तरे मुक्तेन सह मुक्तानां भोगोपपत्तेरिति चेन्नैवम्। हनूमते रामेणागामिकल्पे एव ब्रह्मपददानानुपपत्तेः। न हि एकस्मिन्नेव ब्रह्मकल्पे चतुर्मुखद्वयावस्थानं सङ्घटीतीत्याह **दत्तमिति**॥ २१९ ॥

न चेच्छ्रुतिः कथं प्राह पवमानः प्रजापतिः।
इत्याद्या पवमानस्य प्रजापतिपदं वद ॥ २२० ॥

आद्यपदेन 'मारुतस्य वेधसः' इति श्रुतेर्ग्रहणम्॥ २२० ॥

तस्माल्लये हरेः कुक्षिं प्रविश्यान्ते लयस्य सः।
वैकुण्ठादिपुरस्थः स्यादित्येवार्थः पुमर्थकृत्॥ २२१ ॥

स्यादिति। स्वरूपेण प्रादुर्भवतीत्येवार्थः। एवकारेण पुनः संसारसंबन्धं वारयति॥ २२१ ॥

परान्तकाले सर्वेऽपि मुच्यन्ते योगिनः किल।
ब्रह्मैवं सति योगीन्द्रो मुक्ताग्रेसरतामियात् ॥ २२२ ॥

एवं सति योगिनामपि मुक्तत्वे सति। **योगीन्द्रो** ब्रह्मा न केवलं मुक्तो भवति किन्तु मुक्ताग्रेसरतां इयादित्यर्थः ॥ २२२ ॥

असुरान्दमयन्नुग्रान्सुरान्शान्तांस्तथोन्नयन्।
परावृणक्ति पूर्वेषां सख्यानि त्वरया परैः   ॥ २२३ ॥

एतीति वेदे तमसि दैत्यानां श्रूयते व्यथा।
यदृच्छाकृततन्मोक्षप्रयत्नच्छेद एव च   ॥ २२४ ॥

श्रुत्यन्तरेण जीवानां अनादियोग्यतां त्रैविध्यं, तदनुसारेण फलं, परमात्मनस्तत एवावैषम्यं इत्यादिकं साधयति **असुरानित्यादिभिः**। 'श्रृण्वे वीर उग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः। एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् परा पूर्वेषां सख्या वृणक्ति वितर्तुराणो अपरेभिरेति। अनानुभूतीरवधून्वानः पूर्वीरिन्द्रः शरदस्तर्तरीति। उभयलिङ्गाधिकरणे एतदर्थसङ्ग्राहकं भाष्यं 'असुरान्दमयन्विष्णुः स्वपदं च सुरान्नयन्। पुनः पुनर्मनुष्यांस्तु सृतावर्तयत्यसौ इति भविष्यत्पर्वणि' इति। एवं अनुव्याख्याने 'अनादियोग्यतां चैव कलिवाणीश्वरावधिम्। को निवारयितुं शक्तो युक्त्यागमबलोद्धतामि'ति। श्रुतिद्वयस्यार्थः न्यायसुधायां विवृतः। '**वीरः** अध्यवसितान्तगामी। **इन्द्रः** परमेश्वरः। **उग्रमुग्रं** सर्वान् दुष्टप्रकृतीन्। **दमयन्** नित्यनरकं प्रापयन्। **अन्यमन्यं** सर्वान् सत्स्वभावान्। **अतिनेनीयमानः** संसारं भृशमतिक्रामयन्। स्वयोग्यतातिरेकेणैधमानं द्वेष्टीत्येधमानद्विट्। **शृण्वे** श्रूयते। कुतः उभयस्य देवासुरवर्गस्य राजा यतः। किञ्च मनुष्यान्विशः प्रजाः चोष्कूयते नित्यं परिवर्तयति'। **परा पूर्वेषां** अतीतमन्त्रे **पूर्वेषां** पूर्वनिर्दिष्टानामुग्राणां **सख्या** सख्यानि **परावृणक्ति** परित्यजति। **अपरेभिः** अपरैः साधुभिः सह सख्यानि **वितर्तुराणः** अतिशयेन त्वरमाणः **एति**। **अनानुभूतीः** सम्यगनुभवरहितान् **अवधून्वानः** अवमे संसारे वर्तयन्। **इन्द्रः पूर्वीः शरदः** अतीतसंवत्सरान् तीर्णः वर्तमानांश्च **तर्तरीति**।

आगामिनश्च तरिष्यतीति ॥ अत्र मन्त्रद्वयेन सुराणामनादितो भगवद्भजनाभावः नित्यनरकप्राप्तिश्च श्रूयते। देवानां सदा भगवद्भजनमोक्षावाप्तिश्च। मनुष्याणां सदा संसार' इति। एतत्सुधाऽनुरोधेन मन्त्रद्वयं व्याख्याति **एतीति** श्रुतिप्रतीकग्रहणम्। **व्यथेति** दमायन्नित्युक्तेः। तदुक्तं भाष्ये 'असुरा आसुरेणैव स्वभावेन च कर्मणा। ज्ञानेन विपरीतेन तमो यान्ति विनिश्चयादि'ति। **प्रयत्नच्छेद** इति एधमानद्विडित्युक्तेः। तदुक्तं भाष्ये 'अयोग्यमारोढुं प्रयतन् प्रपतन्हि दृश्यते। एवमयोग्यस्य परमात्मैश्वर्यस्य ब्रह्मादिपदस्य चाकांक्षायां पतनमनुमीयते' इति ॥ २२४ ॥

देवानामूर्ध्वलोकश्च वीप्सया नियमोऽपि च।
अतः सर्वविमोक्षश्च सर्वैक्यञ्च कथं वद   ॥ २२५ ॥

लोकप्राप्तिश्च येषां न तेषामैक्ये तु का कथा।
राजोभयस्य स किल नोन्नीतैरप्यभेदवान् ॥ २२६ ॥

नियम इति। तदुक्तं सूत्रे 'तद्भूतस्य तु तद्भावः' इति तद्भाष्ये च 'नासुरा दैवीं न देवा आसुरीं न मनुष्या दैवीमासुरीं च गतिमीयुरात्मीयामेव जातिमनुभवन्तीति नियमश्रुतेरि'ति ॥ २२५ ॥ २२६ ॥

एधमानद्विडित्युक्त्या स्वात्मसाम्यं सहेत न।
तस्माद्ब्रह्मत्वमेतेषां दुरापमिति मे मतिः।
ईषद्वृद्धिं च यो द्वेष्टि स किं दद्यान्महोन्नतिम् ॥ २२७ ॥

महोन्नतिमिति। 'स्वकीयमिच्छमानं तु राजानो घातयन्ति हि' इति भाष्योक्तेः ॥ ॥ २२७ ॥

अतः श्रुतिसतीभावसिद्धश्रीशानुभाववित्।
तद्भावं भावयेन्नैव योऽवाग्धून्वन्दुराशयात् ॥ २२८ ॥

नैवेति 'न देवपदमन्विच्छेत्कुत एव हरेर्गुणान्' इति भाष्योक्तेः ॥ २२८ ॥

आरुरुक्षन्ति मायाभिरुत्सिसृप्सन्ति ये दिवम् ।
तान्दस्यून्विधुनोम्यज्ञ पूर्वस्माच्च पदादधः ।
इति भागवतोक्त्या च श्रुत्या चैतत्समर्थय ॥ २२९ ॥

भागवतोक्त्या (८-११-५) मायाभिर्जिगीषन्तं बलिं प्रतीन्द्रवचनेन । आधिकारिकनये भाष्योक्ता मूलश्रुतिः 'मायाभिरुत्सिसृप्सतः इन्द्र द्यामारुरुक्षतः । अव दस्यूँरधूनुथा' इति (ऋ सं. ८-१४-२४) । अस्यार्थः टीकोक्तः 'हे परमेश्वर ! त्वं कुविद्याभिरुत्तमत्वं प्राप्तुमिच्छतः स्वर्गमारोढुं चेच्छतो दस्यूनन्धेतमस्यवाक्षिपः' इति ॥ दस्यून् अधूनुथा इति पदच्छेदः ॥ २२९ ॥

असुराणामूर्ध्वलोकाप्राप्तिस्तमसि च स्थितिः ।
नियता श्रूयते सर्वमोक्षो दुर्वच एव तत् ॥ २३० ॥

सर्वमोक्षः 'द्वेषाच्चैद्यादयो नृपाः' इति भागवतवचनादापाततः प्रतीयमानः । **दुर्वचः** उक्तनिरवकाशश्रुतिस्मृतिविरोधादिति भावः । 'द्वेषं परित्यज्य' इत्यादिप्रकारान्तरेण व्याख्येय इति भावः ॥ २३० ॥

मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।
तानहं द्विषतः क्रूरान्संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥ २३१ ॥

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ २३२ ॥

इति कृष्णोऽपि गीतायामसुराणामधोगतिम् ।
स्वाप्राप्तौ नियमं चाह द्वेषिणां यत्पदे पदे ।
अतः पूर्वोक्तवाक्यार्थे समाख्येयं बलीयसी ॥ २३३ ॥

'मामात्मेत्यनेनासुरस्वभावानामन्धतमसावाप्तिपर्यवसानमभिधीयते' इति सुधामनुरुध्यार्थमाह नियममिति । **द्वेषिणां** ऐक्यमनुसन्दधताम् ॥ २३१ ॥ २३२ ॥ ॥ २३३ ॥

क्वाचित्कद्वेषिमोक्षोक्तिरपि भक्तान् जयादिकान् ।
शापादिना तथाभूतानुद्दिश्यैवेति शंसति ॥ २३४ ॥

भक्तानिति यथोक्तं भागवततात्पर्ये (७-१-२९) । 'अतो यद्यसुरावेशात्कृतमेतेन दुष्कृतम् । अनादिभक्तो यस्मान्मे मोचयिष्ये ततस्त्वहमि'ति ॥ २३४ ॥

यद्वाङ्निरवकाशेयं तस्याश्चोक्तैव तद्गतिः ॥ २३५ ॥

इयं उक्तानेकश्रुतिस्मृतिरूपा । निरवकाशा उपलक्षणम् । बहुत्ववती च । तदुक्तमनुव्याख्याने (३-४-४१) 'वाक्यं श्रुतिविरोधेन स्वविरोधेन चाञ्जसा । बह्वागमविरोधाच्च न द्वेषान्मुक्तिवाचकमि'ति ॥ २३५ ॥

यज्ञेन यज्ञमयजन्तेति वेदवचस्यपि ।
उक्तोऽयमर्थो विस्पष्टं ततो मुक्ताः सहस्रशः ।
सन्ति नैकत्वमेतेषां यतोऽत्रानेकतोच्यते ॥ २३६ ॥

तेषु पूर्वे पूर्वमुक्ताः पश्चान्मुक्तास्तथापरे ।
ज्ञातयोऽज्ञातयश्चेति ते मुक्ताः क्वचिदीरिताः ॥ २३७ ॥

'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ।' इति वाक्येन मुक्तबहुत्वसिद्धिः, बद्धमुक्तव्यवस्था इत्यादिकं सिध्यतीत्याह **तत इति** । नाकशब्दस्य दुःखराहित्यविशिष्टसुखवाचित्वं च 'अप्रियं वृजिनं दुःखमकं तोद इतीरितमि'त्यनुव्याख्यानेन बोध्यम् । [३-४-१६] 'ज्ञातिभिर्वाऽज्ञातिभिर्वा' इति श्रुत्या मुक्तेष्वेव विभेद उक्त इत्याह **ज्ञातय इति** । सहमुक्ता इत्यर्थः ॥ पूर्वं मुक्ता अज्ञातयः ॥ २३६ ॥ २३७ ॥

सखायः किल ते सर्वे मुक्तावपि मनोजवे ।
असमाः स्वच्छरूपत्वाद् ह्रदा इव मनोहराः ॥ २३८ ॥

'अक्षण्वतः कर्णवन्तः सखायः मनोजवेष्वसमा बभूवुः । आदघ्नास उपकक्षास उत्वे ह्रदा इव स्नात्वा उत्वे ददृश्रे इत्यादीनि च वाक्यानि तारतम्यं विमुक्तिगं व्यक्तं वदन्ति तत्केन साम्यं मुक्तेषु गम्यते'। [३-४-१६] इत्यनुव्याख्यानदिशा श्रुतिं व्याख्याति **सखाय इति** । 'श्रुत्वा विष्णुं कर्णफलं प्राप्तत्वात्कर्णसंयुताः । अक्षण्वन्तो दर्शनाच्च विष्णोर्मुक्ताश्च ये गणाः । तारतम्यं च तेषां च श्रुतावुदितमञ्जसा । क्षीरसागरदघ्नास्तु केचित्तिष्ठन्ति मुक्तिगाः । उपस्थिता ब्रह्मवनं केचिदश्वत्थमण्डलम् । ऐरे ह्रदे केचिदपि देवा एव सदा हरिम् । नागभोगशयं मुक्ता ददृश्रेऽधिकमोदिनः । सागरादिस्थिता विष्णुं पश्यन्ति क्वचिदेव हि' इति ऐतरेयभाष्योक्तस्मृत्याऽस्य मन्त्रस्यार्थो ज्ञेयः । 'क्षीरसागरदघ्नाः' इति सामीप्यमुक्तिः । 'उपस्थिता' इति सालोक्यम् । 'ऐरे ह्रदे' इति सायुज्यम् । इत्येवं तारतम्योक्तिः ॥ २३८ ॥

मनोज्ञकर्णवन्तश्च मनोज्ञाक्ष्यादिसुन्दराः ।
प्रत्ययो यत्प्रकृत्यर्थप्राशस्त्यं च वदेत्किल ॥ २३९ ॥

प्रशस्तता च कर्णादेर्ज्ञानानन्दात्मतैव हि ।
अतो निराकारतैषां नैव वाच्या कदाचन ।
श्रोत्रनेत्रफलस्याप्तेरपि ते तत्पदोदिताः ॥ २४० ॥

प्रत्यय इति 'भूमनिन्दाप्रशंसासु भवन्ति मतुबादयः' इत्युक्तमतुप्प्रत्ययः ॥ ॥ २३९ ॥ २४० ॥

स्पष्टैतद्वाक्यबलतो यत्र त्वस्येति वागपि ।
उक्तरीत्या तर्कमुद्रामाश्रित्यैवेति गम्यते ॥ २४१ ॥

तर्केति 'यदि भेदो न स्याद् भोग एव न स्यादि'त्यादितर्केत्यर्थः ॥ २४१ ॥

मुक्तिकाले यतस्तेषां महिमान इति श्रुतौ ।
महिमोक्तः शून्यभावो मुक्तानामुचितो न तत् ॥ २४२ ॥

न चेष्टापत्तिः 'महिमानः सचन्त' इति भोगादिरूपमहिम्नः प्रमितत्वात् इत्याह **महिमान इति** ॥ २४२ ॥

नन्दन्ति किल ते सर्वे क्लेशलेशश्च तेषु न ।
अतो मुक्तकथैवेयं तत्पूर्वा वाक्च मौक्तवाक् ॥ २४३ ॥

नन्दन्तीत्युत्तरश्रुतिबलान्मुक्तत्वनिश्चयं इत्याह **अत इति**। **पूर्ववाक्** 'अक्षण्वन्त' इति वाक् **मौक्ता** मुक्तसंबन्धिनी ॥ २४३ ॥

परंज्योतिरुपप्राप्य निष्पन्ननिजरूपवान् ।
पर्येति मुक्तिस्थानेषु स्त्रीभिर्यानैश्च संयुतः ॥ २४४ ॥

रममाणो हसन् क्रीडन् ज्ञात्यज्ञातिजनैः सह ।
इति मुक्तस्य सौभाग्यं श्रुतिराह पदे पदे ॥ २४५ ॥

'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वा' इति श्रुतिर्मुक्तिमहिमानं वर्णयन्ती 'यत्र त्वस्येति' श्रुतेः परोक्तं निर्विशेषभावपरत्वं पराचष्टे इत्याह **परमिति**। न चेयं अपरममुक्तिविषया । शङ्कराचार्यैरपि परममुक्तिविषयतापरतया व्याख्याततत्वात् । विस्तरो भे.प.ब्र.सूत्राणि इति ग्रन्थे । [१७९] ॥ २४४ ॥ २४५ ॥

अतो द्वितीयशून्यत्वमद्रष्टृत्वमवक्तृताम् ।
अश्रोतृत्वं श्रुतिप्रोक्तचित्रभोगेष्वभोक्तृताम् ॥ २४६ ॥

भोगेषु विषयसप्तमी ॥ २४६ ॥

शून्यवाद्युक्तमोक्षाभां मुक्तिं को नाम वैदिकः ।
ब्रूयाच्छ्रुतिं बाधितार्थां स्पष्टश्रुतिसमाख्यया ।
योग्यार्थे प्रणयेन्नो चेन्मीमांसा किंनिबन्धना ॥ २४७ ॥

बाधितार्थां समाख्यया बाधितः परोक्तोऽर्थः यस्याः सा ताम् ॥ २४७ ॥

अतश्छन्दसि मर्यादामेवमेवेति शाब्दिकः ।
नैवाह शब्दव्यत्यासं विभक्तिव्यत्ययादि च ।
अबाधितार्थलाभार्थमेव प्राह पदे पदे ॥ २४८ ॥

शब्दव्यत्यासं नैवाह । विभक्तिव्यत्ययादि च अबाधितार्थलाभार्थमेवाहेति योजना । पदे पदे 'व्यत्ययो बहुलं छन्दसि' इत्यादौ ॥ २४८ ॥

तस्मात्स्वाचित्कैक्यवाक्यमुपादाय बहुश्रुतीः ।
नोपेक्षयेत्तादृगर्थं तस्यैकस्य परं वदेत् ॥ २४९ ॥

उपेक्षयेत् स्वार्थान्न प्रच्यावयेत् । तादृगर्थं बहुश्रुत्यनुगुणम् ॥ २४९ ॥

व्यत्यासेन व्यत्ययेन वृत्त्या वा लोकसिद्धया ।
कथं मीमांसकस्यार्थः सर्वानुभवबाधितः ॥ २५० ॥

सर्वानुभवबाधित इति । 'न हि भोगाभावः विज्ञातारमरे केन विजानीयादिति विज्ञातुरविज्ञानं चापेक्षितमि'ति तत्त्वनिर्णयोक्तेरिति भावः ॥ २५० ॥

यतः साधनवैचित्र्यं देवर्ष्यादिषु दृश्यते ।
अतः फलेऽपि वैचित्र्यं ततो मुक्ताः परावराः॥ २५१ ॥

सैषाऽऽनन्दस्य मीमांसा भवति इति ब्रह्मवल्लीश्रुत्या सिद्धे आनन्दतारतम्ये युक्तिमप्याह यतः इति। तदुक्तमनुव्याख्याने [३-४-१६] 'युक्तं च साधनाधिक्यात्साध्याधिक्यं सुरादिषु । नाधिक्यं यदि साध्ये स्यात्प्रयत्नः साधने

कुतः । यत्नश्च दृश्यते तेषां महानेव महात्मनाम् ॥ यत्र साधनबाहुल्यं साध्यबाहुल्यमत्र च । दृष्टं नियमतो नो चेत्र यत्नं कुर्युरञ्जसा' इति ॥ २५१ ॥

न चेन्मुक्तौ तारतम्यं कृतहान्यकृतागमौ ।
भवेतां हि महादोषौ भ्रान्ताश्च स्युर्महोद्यमाः ॥ २५२ ॥

कृतहानिः उत्तमाधिकारिणाम् । अकृताभ्यागमः मन्दाधिकारिणाम् ॥ ॥ २५२ ॥

स्वरूपानन्दवैचित्र्यमीमांसां कुर्वती श्रुतिः ।
मुक्तानां तारतम्यस्यानङ्गीकारे प्रकुप्यति ॥ २५३ ॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन ॥ २५४ ॥

श्रुतिः 'अथात आनन्दस्य मीमांसा भवति' इत्यादिका । मुक्तानां, 'ते ये शतं' इति निर्दिष्टानाम् । एवं 'यतो वाचो निवर्तन्ते' इति निर्दिष्टस्य ब्रह्मणश्च ॥ २५३ ॥ ॥ २५४ ॥

इत्यन्तोक्तपरब्रह्मस्वरूपानन्दपङ्क्तिगा ।
सर्वाप्यानन्दमीमांसा सा स्वरूपानन्दगोचरा ॥ २५५ ॥

भवेद्धि सर्वथा नो चेत्प्रायपाठस्य का गतिः ।
प्रायपाठविरोधो हि महान्दोषो विदां मते ॥ २५६ ॥

अत्र परब्रह्मानन्दस्तावत्स्वरूपानन्द एवेति सिद्धम् । तस्य नित्यमुक्तस्य प्राकृतानन्दाप्रसक्तेरेव । तत्प्रायपाठेन पूर्वोक्ता मनुष्योत्तमादयोऽपि मुक्ता एवेति सिध्यतीत्याह इतीति ॥ २५५ ॥ २५६ ॥

सत्यज्ञानानन्दपदैरानन्दमयचर्चया ।
उपक्रमेऽपि यद्ब्रह्मस्वरूपानन्द ईरितः ॥ २५७ ॥

न केवलमुपसंहारस्य किन्तूपक्रमस्य बलेनापि स्वरूपानन्दाध्यवसाय इत्याह सत्येति। अनन्तपदोक्तस्यानन्दमयस्य स्वरूपानन्दपूर्णत्वस्यैवोक्तेः। 'स्वरूपे च युज्यते प्रचुरप्रकाशो रविरितिवदि'ति भाष्यवचनात् ॥ २५७ ॥

अतो मध्ये कृता चिन्ता स्वरूपानन्दगोचरा।
भवेदवश्यं संसारमात्रगोष्ठी कथं श्रुतेः ॥ २५८ ॥

गोष्ठीऽति तेन संसारिमात्रपरतया व्याकुर्वाणं रामानुजीयं भाष्यं प्रलापमात्रमिति ध्वनयति ॥ २५८ ॥

तद्दृष्टान्ततया संसार्यानन्दोऽपि विचार्यते ॥ २५९ ॥

संसार्यानन्दे तारतम्यस्येहैव दर्शनात्संप्रतिपत्तेर्दृष्टान्ततयोक्तिरित्याह तदिति ॥ २५९ ॥

तत्तद्रूपस्य तादृक्त्वाभावे बहिरयं क्रमः।
कथं स्यान्नियमेनैव यो वेदेन प्रमीयते ॥ २६० ॥

तत्रापि विवादे बाधकमाह तत्तदिति। तदुक्तं भाष्ये [२-३-३१] यथा बालस्य सदेव पुंस्त्वं यौवनेऽभिव्यज्यते एवं सतामेवानन्दादीनां व्यक्त्यपेक्षया तदुक्तिः। 'बलमानन्द ओजश्च सहो ज्ञानमनाकुलम्। स्वरूपाण्येव जीवस्य व्यज्यन्ते परमाद्विभोरि'ति ॥ २६० ॥

उक्तो हि मानुषानन्दो न सदा विद्यते नृणाम्।
संसारिणां क्वचिद्दुःखमपि संभावितं यतः ॥ २६१ ॥

अतस्तादृङ्मौक्तसुखं नियतं हि श्रुतेर्मतम्।
न चेद्ब्रह्मादिजीवानां रूपस्यानन्दरूपता।
केन सिद्ध्येद्यदि स्पष्टा श्रुतिरेषा बहिर्गता ॥ २६२ ॥

नियतत्वान्मौक्तानन्दस्येदं श्रुतौ तात्पर्यकथनं तत्रैव मुख्यमित्याह उक्त इति। केनेति। मुक्तेः तत्रानन्दस्य तत्तारतम्यस्य च श्रुत्येकगम्यत्वादिति भावः ॥ २६१ ॥ ॥ २६२ ॥

कथं ब्रह्मसुखं तेषामवाङ्मनसगोचरम्।
न हि तक्षकचूडास्थं रत्नमन्येन लभ्यते।
अतस्तार्किकजीवाः स्युः सर्वे जीवास्तवापि हि ॥ २६३ ॥

'यतो वाचो निवर्तन्ते' इत्यत्रोक्त आनन्दो विष्णोरेव न मुक्तजीवानाम्। न च स साधनसहस्रेणापि प्राप्यः। 'लक्षणं परमानन्दो विष्णोरेव न संशयः। अव्यक्तादितृणान्तास्तु विप्लुडानन्दभागिनः' इत्युक्तेः। तत्र दृष्टान्तः तक्षकेति। तदाहरणप्रयत्नोऽनर्थफलक एव यथा तथाऽत्रापीति भावः। अतः मोक्षसुखे प्रमाणान्तराप्रसक्तेः तदसिद्धेरेवेत्यर्थः। अपीत्यभ्युपगमः। वस्तुतो निर्विशेषत्ववादिनस्तन्मतेऽपि आनन्दविषयकानुभवानभ्युपगमात् ॥ २६३ ॥

जीवस्वरूपानन्दस्य तादृक्त्वे किं गतं तव।
ऐक्यायोगाद्यदि भयं भेदोऽस्तु सततं सताम्।
अपौरुषेये निर्बन्धो न स्वस्वमतसिद्धये ॥ २६४ ॥

तादृक्त्वे श्रुत्युक्तिबलेन परिच्छिन्नत्वे। तथा सति न ऐक्यसिद्धिरिति चेन्माऽस्तु। तथा सति अपौरुषेयत्वेन निर्दोषश्रुतेरानर्थक्यं स्यादिति चेन्न। भेदार्थकत्वेनैव तत्सार्थक्योपपत्तेः। तदुक्तं न्यायामृते 'निर्दोषताऽन्यथासिद्धेरि'ति ॥ ॥ २६४ ॥

अकामहतता कस्मान्मुक्तलिङ्गमपोद्यते।
कथमवृजिनत्वं च मुक्तादन्यस्य शोभते ॥ २६५ ॥

अकामहतता तैत्तिरीयोक्ता। अवृजिनत्वं बृहदारण्योक्तम्। अन्यस्येति 'अपापत्वं च नैवास्ति यावत्संसारमस्य हि' इत्यनुव्याख्यानोक्तेः ॥ २६५ ॥

ब्राह्मणस्य हि देहोऽयं नोपभोगाय कल्पते ।
इह क्लेशाय महते प्रेत्यानन्तसुखाय च ॥ २६६ ॥

'अतःपदस्थसुखवत्पदाकामे सुखं कुत' इति वक्ष्यमाणोपपादनाय परोक्तप्रक्रियाव्यभिचारप्रदर्शनपरं श्लोकमुदाहरति **ब्राह्मणस्येति।** अत्र रामानुजमतमनूद्य अनुभवविरोधो दोषोऽभिहितोऽनुव्याख्याने 'कुत्रचित्कामिनः पुंसः कामाभावात् क्वचित् क्वचित् । इन्द्रादिसुखभोगोऽस्तीत्यनुभूतिर्हि कुप्यति ।' इति तत्र सुधा 'कुत्रचिदिन्द्रादिपदव्यतिरिक्ते कामिनः पुंसः क्वचित् क्वचिदिन्द्रादिपदे कामाभावादिन्द्रादिपदसमानसुखानुभवोऽस्तीति व्याख्यानेऽनुभवविरोधः स्यादि'ति । स्मृतिविरोधोऽप्यत्रोदाह्रियते **इहेति।** इहामुत्रार्थभोगविरागपुरःसरं साधनपरस्य। स्वाध्यायप्रवचनरूपतपसः साधनस्य कमपिक्षयाऽतिक्लेशसाध्यत्वात् । तदुक्तं **क्लेशायेति** उक्तं च सुधायां ज्ञानापेक्षया कर्मणः लघूपायत्वं 'अभ्युदयस्य धर्मादिलघूपायसाध्यस्ये'ति । कर्मणा ज्ञानमातनोतीत्यागमेन ज्ञानस्य लघूपायान्तरसाध्यताऽध्यवसादि'ति च। **अनन्तसुखाय** मोक्षाय। ज्ञानस्य मोक्षहेतुत्वादिति भावः ॥ २६६ ॥

इत्युक्त्या नेह सुखिनो विरागा अपि योगिनः ।
अतः पदस्थसुखवत्पदाकामे सुखं कुतः ॥ २६७ ॥

योगिनः ब्राह्मणाद्याः । **अतः** रामानुजोक्तस्यार्थस्य भारतादिप्रमाणविरोधात् अनुभवविरोधाच्च । **पदाकामे** परोक्ते अकामहतशब्दार्थे संसारिणि ॥ २६७ ॥

स भुङ्क्ते विषयान्सर्वान्प्रशास्ति च जगत्त्रयम् ।
अयं पञ्चाग्निमध्यस्थः तपस्तपति सर्वदा ।
सुखलेशोऽपि नास्यास्ति सुखं तादृक्कथं वद ॥ २६८ ॥

सः इन्द्रादिपदप्राप्तिमान् । **अयं** तत्पदाकामः पदान्तरप्रेप्सावान् तपोनिरतः साधकः । **अस्य** कायक्लेशेन तप्यमानस्य । **तादृक्** पदाधिष्ठात्राऽनुभूयमानसुखसदृशम् ॥ २६८ ॥

तदिह क्लेशभाग्योगी सुखं तस्यास्ति मुक्तिगम् ।
तस्मान्मुक्तसुखेष्वेव तारतम्यं तवाप्यभूत् ॥ २६९ ॥

तत् अकामहतशब्दस्य संसारिषु साधकेषु विरक्तेष्वपि मुख्यतोऽसंभवात् । **तस्मात्** मुक्तेष्वेव संभवेन श्रौततत्पदस्य मुक्तपरत्वसिद्धेः । **तारतम्यं** उभयश्रुत्युक्तम् ॥ २६९ ॥

अतः कामार्थसंपत्त्या ह्यकामहततास्त्वियम् ।
अकामस्य वृथा कामहततावाङ्न चेत्तव ॥ २७० ॥

'कामाहतिः कुतोऽन्यत्र प्राप्तकामस्य सा भवेत्' इत्यनुव्याख्यानोक्तमाह **अत इति।** पदान्तरे कामनावतः सतः तत्पदाकामत्वमात्रेण अकामहतत्वस्य अपेक्षितपदान्तरस्य अप्रयत्नेन प्राप्तिमन्तराऽयोगादिति भावः । तदुक्तमनुव्याख्याने 'अप्रयत्नेन कामानामवाप्तिः सा यदा भवेत् । तदैवाकामहतता कुत एवान्यथा भवेदि'ति । एतच्च मुक्तावेव संभवति नान्यत्रेति भावः ॥ २७० ॥

विरक्ताः सर्वसंपत्तौ विरक्ताः स्युर्न कुत्रचित् ।
तत्तत्पदेष्वकामास्ते
वि(भ)रक्ताः क्व व्यवस्थया ॥ २७१ ॥

तव नीचपदाकामात्सुखं शतगुणोत्तरम् ।
भवेदुच्चपदाकामे कथं स्युस्तादृशर्षयः ॥ २७२ ॥

सर्वसंपत्ताविति इहामुत्रार्थफलभोगविरागः इति मुमुक्षोरधिकारिणः सर्वपदारागस्यैव विधानादिति भावः । न हि त्वदभिमतस्य देवादिपदेषु रागिणोऽपि तदुच्चेन्द्रादिपदेषु विरागमात्रेण सर्वसंपत्तौ विरक्त इति वाचोयुक्तिः संभावनाऽर्हेत्याह **विरक्ता इति। कुत्रचित्** कुत्रचिदेव । विरक्ताश्चेत्सर्वत्रैव विरक्ता भवेयुः । न तु त्वदुक्तदिशा व्यवस्थया । **कथमिति।** एवमीदृशानां कतिचित्पदकामिनां लम्पटा इत्येव वक्तुं युक्तं न तु ऋषयो विरक्ता इतीति भावः ॥ २७१ ॥ २७२ ॥

यदि सर्वपदाकामाः सर्वे तर्हि सुखे समाः।
भवेयुस्तारतम्येन सुखिता तेषु किंकृता ॥ २७३ ॥

किंकृतेति। तारतम्यहेतुतया त्वदभिमतस्य व्यवस्थया वैराग्याभिमतस्य दूषितत्वादिति भावः ॥ २७३ ॥

अतस्तत्तत्पदाकामः सकामोऽन्यपदेषु च।
भवेदसौ महायोगी का गीस्तं बाधितं वदेत् ॥ २७४ ॥

महायोगीति विपरीतलक्षणया। कामलंपट एवेति भावः। **गीः** अवृजिनः अकामहतः इति श्रौतनिर्देशः ॥ २७४ ॥

भोग्यार्थतारतम्ये स्यात्तारतम्यं सुखस्य च।
तत्त्यागेऽपि सुखस्योच्चनीचतेत्यद्भुतं वचः ॥ २७५ ॥

भोग्यार्थेति। 'मुत्राम विषयोत्थं यत् प्रकृष्टविषयात् प्रमुत्' इति बृहद्भाष्योक्तदिशेति भावः ॥ २७५ ॥

किं कूपस्थजलाकामात्सुखं शतगुणोत्तरम्।
तटाकस्थजलाकामे पिपासारहिते वद ॥ २७६ ॥

सूक्ष्मभाण्डोदनाकामात्सुखं शतगुणोत्तरम्।
स्थूलभाण्डोदनाकामे बुभुक्षारहितेऽस्ति किम् ॥ २७७ ॥

'देवपदाकामादिन्द्रपदाकामस्यानन्दविशेषादर्शनादि'ति सुधोक्तं लोकनिदर्शनाभ्यां संवादयति **कूपस्थेति सूक्ष्मेति** च ॥ २७६ ॥ २७७ ॥

कथञ्चित्कामशून्यो यः सोऽकामहत उच्यताम्।
पदं न पदलभ्यन्ते ततोऽप्येतदलौकिकम्।
श्रुत्युक्तावृजिनत्वं तु घटते न कथञ्चन ॥ २७८ ॥

'तस्मात्तस्मादकामत्वमिति चाश्रुतकल्पना। अकामहत इत्युक्तेः श्रुतहानिरपि स्फुटा' इत्यनुव्याख्यानोक्तदोषेण दूषयति। **कथञ्चिदिति** अनेन श्रुतहानिर्दोष उक्तः। तदुक्तं सुधायां 'श्रुतावकामहत इत्युक्तेः परेण चाकाम इति व्याख्याततत्वाच्छ्रुतस्य हतशब्दस्य हानिरपि स्फुटाऽऽपद्यते' इति। **पदं इति** 'तस्मात्तस्मात्पूर्वनिर्दिष्टादतिशयेनोत्तरोत्तरस्याकामत्वम् श्रोत्रियत्वादिकं चेति व्याख्याने त्वश्रुतकल्पनं स्यात्। तस्मादित्यतिशयेनेति चाश्रुतस्य कल्पनीयत्वादि'ति सुधोक्तेरिति भावः। अवृजिनत्वमित्युपलक्षणम्। सुधोक्तं श्रोत्रियत्वं च ग्राह्यम्। एतच्च विवृतं अधस्तात् (२६५ श्लो.)। 'अक्षण्वन्तः कर्णवन्तः प्राप्तसमस्तेन्द्रियफलाः' इति सुधोक्तस्य श्रोत्रियत्वस्य संसारिष्वसंभवादिति च ध्येयम् ॥ २७८ ॥

तत्तच्छ्रुत्यर्थकथनं न श्रुत्यै रोचते सताम्।
भारतीहृदयं त्वेको भारतो वेत्ति नापरः ॥ २७९ ॥

तत् तस्मात्। **तच्छ्रुत्यर्थकथनम्।** **तैः** रामानुजीयैः **तच्छ्रुतेः** आनन्दवल्ल्याः। **अर्थकथनं** केवलं संसारिपरतया व्याख्यानम्। **श्रुत्यै** श्रवणेन्द्रियाय। **भारतः** वायुः ॥ २७९ ॥

अनुसन्धीयतां चर्चा महती मूलशास्त्रगा।
बुद्धावारोहसिद्ध्यर्थं ततः किञ्चिदिहोद्धृतम् ॥ २८० ॥

मूलशास्त्रं भाष्यानुभाष्यतट्टीकाः। **उद्धृतम्।** तच्चास्माभिस्तत्र तत्र विवृतौ संक्षिप्य दर्शितम् ॥ २८० ॥

अतो मिथो जीवभेदो जीवब्रह्मविभिन्नता।
तत्तदानन्दवैचित्र्यात्सिद्धा सिद्धान्तवेदिनाम् ॥ २८१ ॥

वैचित्र्यात् संसारे मुक्तौ च ॥ २८१ ॥

तस्माच्छ्रौतञ्च यौक्तञ्च मध्वस्य मतमाफलात्।
हृद्यञ्च निरवद्यञ्च तत्सर्वमतिमङ्गलम् ॥ २८२ ॥

आफलात्। आङ् अभिविधौ। मुक्तावपीत्यर्थः॥ २८२॥

ते प्रसादो हरे सेवानुरूप इति सप्तमे।
प्रह्लादो यत्स्फुटं मुक्तौ फलं सेवानुगं जगौ ॥ २८३॥

'नैषा परावरमतिर्भवतो ननु स्याज्जन्तोर्यथाऽऽत्मसुहृदो जगतस्तथाऽपि। संसेवया सुरतरोरिव ते प्रसादः सेवाऽनुरूप उदयो न परावरत्वम्' [भा.स. ९-३७] इति प्रह्लादवचनं मौक्ततारतम्ये प्रमाणयति **ते इति। सेवाऽनुरूप इति** 'यावत्सेवा परे तत्त्वे तावत्सुखविशेषता' इति भगवत्पादोक्तेः। **परावरत्वं** वैषम्यम्। **उदयः** मुक्तौ सुखानुभवः॥ २८३॥

तत्रैव मुक्तौ फलसंपद उच्चावचा इति।
दातैव यत्फलासाम्यं प्राह भागवते स्फुटम्।
युक्तिश्रुतिस्मृतिभ्यस्तत्सिद्धा मुक्तोच्चनीचता॥ २८४॥

ॐ फलमत उपपत्तेरिति सामान्यतः सर्वफलदातृत्वेन 'ज्ञानिनां मोक्षदश्च सः' इति विशिष्य मोक्षदातृत्वेन च प्रमितस्य कृष्णस्य वचनेनैव मुक्तौ तारतम्यं सिध्यतीत्याह **तत्रेति।** 'नाहं तु सख्यो भजतोऽपि जन्तून् भजाम्यमीषामनुवृत्तये यथा। तथैव मत्तः फलसंपदः स्युरुच्चावचाः कल्पतरोरिवार्थिनाम्' इति भागवतं तात्पर्यतः सङ्गृह्णाति **दातैवेति। फलसंपदः** संसारे तथा मुक्तौ च॥ २८४॥

मनोजवेष्वसमता यत्सख्यं चोदितं श्रुतौ।
तन्मत्साराद्यभावश्च तत्र तेषां प्रसिद्ध्यति ॥ २८५॥

मनोजवेषु 'मनोजवः प्रज्ञाऽतिशयः बहुवचनमाद्यर्थे ज्ञानादिगुणेषु असमास्तारतम्योपेता बभूवुः' इति सुधोक्तोऽर्थो ध्येयः। परस्परं सखायः। **तत्र** मुक्तौ तरतमभावसद्भावेऽपि। अत्र यदुक्तं परकालयतिना 'अत्र आनन्दातिरिक्त-तारतम्यमेवोच्यते' इति। तत्तुच्छम्। अशाब्दत्वात्। अंशेन साम्यं अंशान्तरेण वैषम्यमित्युक्तौ स्वरूप एव भेदप्रसक्तेः। संसारिभिरेव समत्वाभाव उच्यते इत्यप्यसारम्। निर्मूलत्वात्कल्पनायाः। मुक्तानामेव पूर्वं प्रकृतत्वात्।

मिथस्तारतम्यस्यैव प्रतीतिसिद्धत्वात्। अत्र विस्तरोऽस्मत्कृते विजयीन्द्रविजय-वैभवे (प. ५४)॥ २८५॥

हरिसाम्योक्तिवत्क्वापि साम्योक्तिर्दुःखवर्जनात्।
उक्ता निरवकाशास्ता यच्छ्रुतिस्मृतियुक्तयः।
तत्सिद्धतारतम्यं तन्मुकुन्दोऽपि न मोचयेत् ॥ २८६॥

क्वापि श्वेतद्वीपगतवनक्रीडारता उपकक्षास इत्यादि श्रुतावुक्तम्। **हरिसाम्योक्तिवत्** परमं साम्यमुपैतीत्यत्रेव। न च तत्रापि विवदितव्यम्। 'दुःखाभावः परानन्दो लिङ्गभेदः समा मता' इति गीताभाष्योदाहृतप्रमाणेन प्रमितत्वात्। 'सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च' इत्यादिनिरवकाशप्रमाणसिद्धत्वादित्याह **उक्ता इति। मुकुन्दोऽपि** अनादिसंसारबन्धान्मोचकोऽपि। **नेति** 'स्वतन्त्रेच्छोऽपि भगवान्मानेऽसौ मानवान् किल' इति पूर्वमुक्तेः। उक्तं च सुधायां 'यावत्प्रमाणसिद्धं तावतः सुघटस्य दुर्घटस्य वा घटनायां पटुरिति ब्रूम' इति। अनादेर्बन्धस्य मोचकत्वं प्रमितं नैवं अनादेस्तारतम्यस्य मोचकत्वमिति हृदयम्॥ २८६॥

गुरोः शिष्यस्य पान्थस्य काकस्य च पशोरपि।
द्वितीयाशैवयद्दृष्टा सुखं कस्याद्वितीयता ॥ २८७॥

'भयं द्वितीयाभिनिवेशतः स्यादि'ति भागवतस्यापार्थं परिकल्प्य द्वितीयराहित्यमेव मोक्ष इति यन्मायिभिरुच्यते तत् तद्वाक्यस्यानुरूपानेकार्थान्तर-परत्वं सुबहुधा समर्थ्य पूर्वं भेदसौरभे दूषितम् [श्लोक ३६०-३८१] लौकिकदृष्टान्तप्रदर्शनेन साहित्यमुद्रया च तद् द्रढयति **गुरोरित्यादिना** चतुर्भिः॥ द्वैताभाव एव चेन्मोक्षस्वरूपं स्यात्तर्हि तदभिमतमोक्षस्य अनर्थरूपतैव पर्यवस्यति न त्वेव पुरुषार्थत्वमिति भावः। **गुरोः** 'आ माऽऽयन्तु ब्रह्मचारिणः स्वाहा' इति प्रार्थयमानस्य। **शिष्यस्येति** 'तद्विज्ञानार्थं गुरुमेवाभिगच्छेदि'त्यादिश्रुतेरिति भावः॥ २८७॥

नश्वरं यदिहैश्वर्यमतोऽनश्वरसंपदे।
स्वर्गार्थीकुरुते यज्ञं सुखं कस्याद्वितीयता ॥ २८८॥

एकार्थनाशेऽप्यन्यार्थे स्त्रीनाशे स्त्र्यन्तरे स्पृहा।
दग्धे गेहे नूत्नगेहे सुखं कस्याद्वितीयता ॥ २८९ ॥

इह संसारे। **स्वर्गार्थी** मुमुक्षुः। **यज्ञं** जिज्ञासारूपम्। 'यज्ञेन यज्ञमयजन्त देवाः। — । ते ह नाकं महिमानः सचन्त' इत्युक्तेः ॥ २८८ ॥ २८९ ॥

धत्ते प्रियां मुकुन्दोऽङ्के गात्रार्धे तु शिवां शिवः।
सख्या सखायो नन्दन्ति सुखं कस्याद्वितीयता ॥ २९० ॥

मुकुन्दः नित्यमुक्तः। **अङ्के** अङ्कस्थिता लक्ष्मीरिति वर्णनात्। लक्ष्म्याः सुखाविर्भावार्थम् द्वितीयस्य मुकुन्दस्यापेक्षा इत्यत्र तात्पर्यम्। न तु मुकुन्दस्य निरपेक्षस्य सुखार्थं द्वितीयाया लक्ष्म्या इति ध्येयम्। यद्वा कस्य सुखपरिपूर्णस्वरूपस्य नारायणस्यैकस्यैव स्वतन्त्रस्य अद्वितीयस्य अन्यनैरपेक्ष्येण सुखम्। न तु तदितरस्य कस्यापीति योजना ॥ २९० ॥

यदि सांसारिकद्वैतमिव मुक्तौ द्विता भवेत्।
तदाऽन्योन्यं दर्शनं स्यात्सख्यं विषयभोक्तृता ॥ २९१ ॥

मुक्तिस्वरूपनिर्धारणाय प्रवृत्तेन याज्ञवल्क्येन मैत्रेयीं प्रति उपदिष्टं मोक्षस्य निर्विशेषभावात्मकत्वखण्डनपरं मन्त्रं तात्पर्यतो व्याख्याति **यदीति** 'यत्र हि द्वैतमिव भवति। तदितर इतरं पश्यति। यत्र त्वस्य सर्वमात्मैवाभूत्। तत्केन कं पश्येत् केन कं जिघ्रेद्विज्ञातारमरे केन विजानीयात् येनेदमखिलं वेद तं च केन विजानीयात्' इत्यस्य मन्त्रस्य तर्कमुद्रयाऽऽक्षेपपरत्वमुक्तमनुव्याख्याने (४-२-१) 'आचिक्षेप मतं तच्च यस्मिन्न विषयादनम्। घ्राणादिभोगाभावस्य त्वनिष्टत्वहृदा श्रुतिः। येनेदमखिलं वेद विज्ञातारं स्वमेव च। केन तं च विजानीयादित्यनिष्टं च सर्वथा' इति। अस्यार्थः सुधायामुक्तः **यत्र** यदि, **द्वैतं** भवति, **तत्** तर्ह्येव, इतर इतरं पश्यतीत्यादिना व्याप्तिमभिधाय हिशब्देन तस्याः प्रमितत्वं चोक्त्वा, **यत्र** यदि तु अस्य आत्मनः अपेक्षितं **सर्वमात्मैवाभूत्** स्वव्यतिरिक्तं न स्यात्। **तत्** तर्हि **केन** साधनेन **कं** अर्थं पश्येत्। न केनापि किञ्चिदित्यनिष्टप्रसङ्गोऽभिधीयते इति। तदनुरोधेन मन्त्रं विवृणोति **यदीति** इवशब्दस्योपमार्थत्वमाश्रित्योक्तं

सांसारिकद्वैतमिवेति। अस्वातन्त्र्येण सादृश्यं, तच्च स्वरूपकथनम्। व्याप्तेरनङ्गत्वात्। तदुक्तं सुधायां 'द्वैतस्यास्वातन्त्र्यमभिप्रेत्य द्वैतमिवेत्युक्तम्। न तु द्वैताभावमभिप्रेत्य। कुतः। क्वचिदभिधानादाविवशब्दस्याभाववाचिताऽनुक्तेरित्यर्थः। अस्वातन्त्र्यं चात्र स्वरूपमात्रमुक्तम्' इति। अत्र द्वैतेनोपमीयमानत्वकथनेन द्वैतस्य पारमार्थिकत्वं बोध्यते। स्वीकृतं चैतत्परेणापि 'न हि विष्णुमित्रो वन्ध्यापुत्रवदवभासते इति कश्चिदाचक्षीत (ब्र.सू.शां.भा. २-१-१८)। चन्द्रमुखयोर्वस्तुत्वोपलम्भात् (आनन्दगिरि)। अत्र विस्तरः भे.प.ब्र.सू. इति ग्रन्थे (पु.८७)। यद्वा न्यायामृतोक्तरीत्या इव शब्दोऽल्पार्थकः [१-३०-२०७] पुराणे 'दशरात्रैर्भुक्तमिव न सम्यक् स्वल्पभोजनादि'ति। 'इवोपमायामल्पार्थे इत्यमरोक्तेः'। इति तत्र व्याख्यानात् ॥ २९१ ॥

यदा त्वात्मैक एव स्यान्मुक्तौ नान्यत्तु किञ्चन।
तदा कं केन पश्येत्स कं जिघ्रेत्स्वं च केन वा ॥ २९२ ॥

पश्येदकरणस्तस्मान्मोक्षस्यापुरुषार्थता।
अतोऽवश्यं भवेद्द्वैतं मुक्तौ संसारवत्सताम् ॥ २९३ ॥

एवं प्रसङ्गाङ्गव्यतिरेकव्यतिरेकव्याप्तिमुक्त्वा अनिष्टं प्रसञ्जयति **यदा त्विति।** तदुक्तं तत्त्वनिर्णयटीकायां 'यदि निर्विशेषचैतन्यमात्रमवशिष्यते न किमपि वस्तु इति मतं स्यात्तदा दर्शनघ्राणादिरूपभोगोऽस्य न स्यादिति। न चेष्टापत्तिः। भोगस्य प्रमाणसिद्धत्वात्। तदुक्तमनुव्याख्याने 'सोऽश्नुते सर्वकामांश्च कामान्नी कामरूप्यथ। इत्यादिश्रुतयश्चोक्तमर्थमेव वदन्ति हि' इति। मोक्षस्यापुरुषार्थापातात् इत्याह **तस्मादिति।** अत इति विपर्ययपर्यवसानम् ॥ २९२ ॥ २९३ ॥

इति श्रुतिस्तर्कमुद्रामाश्रित्य द्वैतमेव यत्।
स्थिरीकरोति मुक्तानां कस्य स्याददद्वितीयता ॥ २९४ ॥

द्वैतमेवेति तत्त्वनिर्णयटीकोक्तनिर्वचनानुसारेण भिन्नं, भेद इति वाऽर्थः। स्वस्वरूपज्ञाने तत्प्रतिनिधिर्विशेषो वा ॥ २९४ ॥

यदि वस्तुस्थितिकथा वृथाऽभूत्तर्हि ते श्रुतिः ।
विज्ञातारमरे केन विजानीयादिति स्फुटम् ॥ २९५ ॥

वृथेति । लिङादिप्रत्यया निरर्थकाः स्युः । इवशब्दस्य त्वदभिमताभावार्थकत्वे आत्मैवाभूदित्यस्य वैयर्थ्यप्रसङ्गः । तदुक्तमनुव्याख्याने 'न चाभावतः क्वचित् । आत्मैवाभूदिति ह्यस्मादविशेषप्रसङ्गतः' इति । अनिष्टप्रसङ्गत्वं स्फुटं चात्रेत्याह **विज्ञातारमरे इति** स्वपरज्ञानाभावस्य तवाप्यनिष्टत्वावश्यंभावात् । 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदि'ति अज्ञानस्यानिष्टत्वप्रमितेः ॥ २९५ ॥

यत्स्वज्ञानं च नेत्याह ततस्तार्किकमोक्षवाक् ।
अभूदियं वेदवाणी कृपाणी ते भवेद्ध्रुवम् ॥ २९६ ॥

तार्किकेति । तेन ज्ञानमात्रनास्तित्वाङ्गीकारात् ॥ **कृपाणी** अपसिद्धान्तपर्यवसायिनी ॥ २९६ ॥

न प्रेत्य संज्ञेति च वाक्प्राकृतज्ञानशून्यताम् ।
मुक्तस्याह परं नोचेज्जिग्युस्तार्किकबालकाः ॥ २९७ ॥

नन्वेवं तर्हि 'न प्रेत्य संज्ञाऽस्ती'ति मुक्तौ ज्ञानाभावप्रतिपादकस्य याज्ञवल्क्यवचनस्य का गतिरित्यत आह **नेति ।** तदुक्तं तत्त्वनिर्णयटीकायां 'मुक्तस्य तु भूतानां विनिवृत्तत्वात्तन्निमित्तं वृत्तिज्ञानं उपलक्षणं एतत् उत्पत्त्यादिकं च नास्तीति याज्ञवल्क्येनोक्तमिति । मुक्तविषयकं अस्मदादिसंसारिकर्तृकमपरोक्षज्ञानं नास्तीति वाऽर्थः ॥ २९७ ॥

किञ्च न प्रेत्यसंज्ञाऽस्तीत्युक्तिर्मोहनिपातनम् ।
इति श्रुतेश्च न ज्ञानमात्रं सा वाङ्निषेधति ॥ २९८ ॥

अवश्यं चैतदेवं । अन्यथा 'अत्रैव मा भगवान्मोहान्तमापिपत्' इति ज्ञानाभावमाक्षिपन्त्या मैत्रेय्याः आक्षेपो निरुत्तरः स्यादिति भावः । तदुक्तमनुव्याख्याने 'मैत्रेय्युक्तोत्तरं च किमि'ति ॥ २९८ ॥

यत्र वस्तु द्वैतमिव द्वित्रलग्नं मनो भवेत् ।
तत्रेतरः पुमान्पश्येदितरार्थानपि स्फुटम् ॥ २९९ ॥

यत्र त्वेकाग्रमनसः सर्वमिष्टं च योगिनः ।
आत्मैवाभूत्तत्र केन ततोऽन्यं कं स पश्यति ॥ ३०० ॥

यद्वा असंप्रज्ञातसमाध्यवस्थाकथनपरेयं श्रुतिरिति वर्णकान्तरमाह **यत्रेति ।** अपरोक्षज्ञानिनोऽसंप्रज्ञातसमाधिस्थस्य स्थितिरुक्ता गीतायां 'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते' इति । सर्वमिष्टमिति आत्मन्येव च सन्तुष्ट इत्युक्तेरिति भावः । 'यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः' इति च ॥ २९९ ॥ ३०० ॥

कं जिघ्रति स्वकं रूपं केन वाऽसौ प्रपश्यति ।
येनेदमखिलं वेद पश्येद्वा केन तं गुरुम् ।
इत्यात्मरतमस्तौद्वा यत्र त्वस्येति वागियम् ॥ ३०१ ॥

स्वकं रूपं बाह्यदेहेन्द्रियादिकम् । स्वस्वरूपज्ञानस्य तदाऽप्यविकलत्वादिति ध्येयम् । **केन तं गुरुमिति ।** केन अधिकप्रयोजनेन प्रत्युत्थानादिना गुरुं पश्येदिति भावः । तदुक्तं प्रमेयदीपिकायां 'अपहायेत्यनेन गुर्वादिपूजायामाधिक्यं निषेधति । आधिक्यस्यैव पूर्वत्यागोपयोगित्वादि'ति ॥ ३०१ ॥

अक्षासक्तः किमश्रौषीन्मातुर्मृतिमुदीरिताम् ।
किं पश्येत्पश्यतोऽपि स्वं घटस्थहृदया नटी ।
शरकृत्केन कं जिघ्रेत्कं जानीयात्कमीक्षते ॥ ३०२ ॥

आत्मन्येव मनोयोगं युञ्जानस्य समाधिस्थस्य बाह्येन्द्रियैः विषयाणां सन्निकर्षसद्भावेऽपि मनसः तैः इन्द्रियैः सन्निकर्षाभावेन न दर्शनस्पर्शनादिकं इत्यत्र लोकसिद्धदृष्टान्तान् दर्शयति **अक्षासक्त इति ।** मनसः श्रवणेन्द्रियेण सन्निकर्षाभावात् । स्वं स्वात्मानम् । पश्यतः जनान् । **शरकृत्** यथोक्तं 'तदैवमात्मन्यवरुद्धचित्तो न वेद किञ्चिद्बहिरन्तरं वा । यथेषुकारो नृपतिं व्रजन्तमिषौ

गतात्मा न ददर्श पार्श्वे' इति [भाग. ११-९-१३] योगिनः चित्तैकाग्र्यं भक्त्युद्रेकेन, अक्षासक्तादीनां तु व्यसनादिनेति त्वन्यदेतत् ॥ ३०२ ॥

मुक्ताः स्वात्मरता जिघ्रन्तीक्षन्ते कं विजानते ।
सेनामन्यमनाः सेनां नाज्ञासीदिति लौकिकम् ।
आत्मैकासक्तचित्तोऽपि तथेति किमलौकिकम् ॥ ३०३ ॥

अप्राकृतप्राकृताभ्यां द्वाभ्यां हीतो भवे भवेत् ।
द्वीताः संसारिणस्तस्मात्तत्संबन्धिवपुस्त्विदम् ॥ ३०४ ॥

ध्याननिरतमुक्तपरतयाऽपि योजयति **मुक्ता इति । सेनां** इनेन राज्ञा सहितां सेनां सैन्यम् ॥ ३०३ ॥ ३०४ ॥

बाह्यं द्वैतमिति प्रोक्तमस्वभावत्वतश्च तत् ।
इवशब्दोदितं जीवे यदा भवति तन्नृणाम् ॥ ३०५ ॥

यदा संसारे । तत् अस्वभावभूतं बाह्येन्द्रियादिकम् ॥ ३०५ ॥

तदा त्वितरशब्दोक्तो बाह्येन्द्रियगणोऽप्ययम् ।
पश्येत्स्वरूपादितरमर्थं देहघटादिकम् ॥ ३०६ ॥

यत्र त्वात्मात्मकं सर्वमभूद्देहेन्द्रियादिकम् ।
तत्र मुक्तौ केन बाह्येनाक्ष्णा बाह्यार्थमीक्षते ।
कं वा जिघ्रेद्विजानीयादित्यर्थो वा श्रुतेर्भवेत् ॥ ३०७ ॥

यत्र यदा भोगार्थं स्वेच्छया बाह्यशरीरग्रहणाभावस्तदा । 'एवं मुक्तभोगो बाह्यशरीरकृतश्चिन्मात्रकृतश्च भवतीति बादरायणो मन्यते' इति भाष्योक्तेः । 'रजःप्रभृतीनामवृत्तिर्नाम बन्धकतया व्यापाराभावः' इति सुधोक्तमनुसन्धेयम् [४-२-१] सर्वथा स्वरूपेन्द्रियैरेव विषयभोग इति तात्पर्यम् ॥ ३०६ ॥ ३०७ ॥

यथोदं शुद्धमासिक्तं शुद्धे स्यात्तादृगेव हि ।
एवं मुनेर्जानतश्च शुद्धोऽप्यात्मा परात्मनि ।
प्रविष्टस्तादृगेव स्यान्न तदात्मेति या श्रुतिः ॥ ३०८ ॥

निरवकाशबहुश्रुतिविरुद्धं चैक्यमित्याह **यथेति** 'यथोदं शुद्धे शुद्धमासिकं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतम' इति श्रुतिः तत्त्वनिर्णयटीकायां व्याख्याता । 'तादृगेव भवति न तु तदेव भवति । एवं विजानतो मुनेः विजानतां मुनीनां, आत्मा अधिपतिः । हिरण्यगर्भोऽपि मुक्तः परमात्मानं प्राप्य तादृगेव भवति । किमुतान्य इत्यर्थः' इति ॥ ३०८ ॥

परमं साम्यमेवेति ब्रह्मणा सह चेति वाक् ।
उपसंक्रम्य चेत्युक्तिरुपसंक्रामतीति वाक् ॥ ३०९ ॥
साक्षाज्ज्ञानफलं मोक्षं शंसन्त्यस्तत्र तत्र हि ।
कथं घटेरन्सर्वैक्ये बह्व्योर्थान्तरवर्जिताः ॥ ३१० ॥

'तदा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इत्यस्या अर्थः तत्रैवोक्तः । 'पुण्यमनिष्टम् । निरञ्जनो निर्लेपः । साम्यं परमात्मना निर्दुःखत्वादिसादृश्यमुपैतीति भेदोक्तिरि'ति । 'सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चिता' इति श्रुतौ ब्रह्मणा सहेति भेदोक्तिः । न च ब्रह्मणा ब्रह्मरूपेण सर्वान् कामान् सह युगपदश्नुते इति व्याख्येयम् । ब्रह्मात्मैकत्वं प्राप्तस्य कामावाप्त्यनङ्गीकारात् । एत'मन्नमयमात्मानमुपसंक्रम्य' इति भृगुवल्लीवाक्येन एत 'मन्नमयमात्मानमुपसंक्रम्य' इति ब्रह्मवल्लीवाक्येन चेत्युभयत्र समीपप्राप्त्युक्त्या भेदः प्रतीयते । साक्षाज्ज्ञानं साक्षात्कारः । तत्फलं परमं मोक्षम् । 'एते अन्नमयाः कोशा इत्येतद्व्याख्यानं पूर्वोत्तरापरामर्शमूलम् । न हि शरीरादिकोशप्राप्तिर्ब्रह्मविद्याफलमिति संभवति' इति सुधोक्तेः । न चात्र उपसंक्रमणशब्दस्य अतिक्रमोऽर्थः । उपपूर्वस्य क्रमेः प्राप्त्यर्थत्वात् ॥ ३०९ ॥ ३१० ॥

यदि जीवन्मुक्तिपरा सर्वाऽपीयं मम श्रुतिः ।
यत्र त्वस्येति या वाक्ते तर्हि सुप्तिपरास्तु सा ॥ ३११ ॥

यत्र जागरणे नानापदार्थद्वैतवन्नृणाम् ।
तज्ज्ञानं च भवेत्तर्हि स्यादन्योन्यनिरीक्षणम् ॥ ३१२ ॥

श्रुतिः समुदायैकवचनम् । ते परममुक्तिपरत्वेन त्वदभिमता ॥ ३११ ॥ ॥ ३१२ ॥

यत्र सर्वं च करणमात्मसाक्ष्येव केवलम् ।
बाह्यानां मन आदीनां यदा ह्युपरतिस्तदा ॥ ३१३ ॥

तत्र सुप्तौ केन किं वा पश्येज्जिघ्रेच्च कं तदा ।
स्वद्रष्टारं च कं पश्येदज्ञानावरणात्तदा ।
येनेदमखिलं वेद जानीयात्तं च केन सः ॥ ३१४ ॥

स्वद्रष्टारं स्वकर्मकज्ञानाश्रयं जाग्रत्पुरुषम् । स्वात्मज्ञानस्य सुप्तावपि सत्त्वात् । यद्वा परीत्या चिदचित्संवलनं अहङ्कारं इत्यर्थः । तस्याविद्यापरिणामस्य सुप्तावभावादेव ॥ ३१४ ॥

अथवा प्राह सा मुक्तौ सुखरूपेन्द्रियादिकम् ।
एकीभवन्ति च परे मुक्ताश्च क्षीरनीरवत् ॥ ३१५ ॥

मुक्तौ वस्तुस्थितिनिरूपणपरत्वेनापि श्रुतिं योजयति **सुखेति** । कशब्दस्य सुखवाचित्वम् । केन सुखात्मकेन तत्तदिन्द्रियेण कं सुखरूपं मुक्तान्तरं विषयभूतं सुखहेतुं गन्धादिकं वा । एकीभवन्ति इत्यनेन 'कर्माणि विज्ञानमयश्चात्मा परेऽव्यये सर्व एकीभवन्ति' इति श्रुतिं अभिप्रैति । क्षीरनीरवदिति स्थानैक्यम् । एवं मत्यैक्यं सादृश्यैक्यं चोपलक्षणीयम् । न तु स्वरूपैक्यमत्र विवक्षितम् । बाधितत्वेनासंभवात् तदुक्तमनुव्याख्याने [४-२-१] 'कथं च यः पूर्वमसौ न पश्चाद्भवेत्स एवेत्यपि युक्तिमेति' इति । परमते ब्रह्मभावस्य सदा सत्त्वेन च्विप्रत्ययानुपपत्तिः । परे इति सप्तम्यनुपपत्तिश्चेत्यादिकं ध्येयम् ॥ ३१५ ॥

प्रविष्टत्वात्तदुदरे सर्वेषां स्वपतां हृदि ।
अर्थोऽप्येवमभूत्स्वस्थः क्लिष्टार्थो नास्ति कश्चन ।
पुनरावृत्तिरेवासीत्त्वद्वत्त्ववचनस्य च ॥ ३१६ ॥

पुनः एकीभवन्ति इत्यस्य सुषुप्तौ प्राज्ञेनात्मना संपरिष्वङ्गरूपोऽर्थोऽस्तु इत्याह **प्रविष्टत्वात्तदुदर इति** । विमतं वाक्यं सुषुप्तिसंबन्धि मुक्तिसंबन्धायोग्यत्वात् मायिवत् इति प्रयोगोऽभिमतः । न च दृष्टान्तः साधनविकलः । 'ततो यान्त्यधमां गतिं' इति स्मृतिसिद्धत्वात् । श्रुतेर्बाधितार्थवर्णनोद्यतस्य मायिनो मोक्षाशा दूरोत्सारितेति व्यङ्ग्योक्तिः ॥ ३१६ ॥

मम वाक्यानि न पुनरावर्तंते कदाचन ।
तेषु तेषु प्रकरणेष्वनुक्त्याऽन्यफलस्य हि ॥ ३१७ ॥

स्वमते तु नैष दोष इत्याह **ममेति** । विमतानि वाक्यानि मुक्तिसंबन्धीन्येव तदितरफलसंबन्धादर्शनात् । ज्ञानितत्त्ववादिवत् इत्यपि प्रयोग ऊह्यः । 'ब्रह्मसंस्थोऽमृतत्वमेत्येव' 'मामेवैष्यसि सत्यं ते' इति श्रुतिस्मृत्यनुगृहीतत्वान्न कश्चित्क्षुद्रोपद्रवः ॥ ३१७ ॥

मुमुक्षोऽस्त्वस्य केनेदं फलं वक्त्यनपेक्षितम् ।
अन्यत्र हि विरक्तास्ते सर्वविद्याविशारदाः ॥ ३१८ ॥

श्रुत्युक्तं जक्षणक्रीडनादिकं न संसार इव दुःखमिश्रं तादृशभोगस्य सत्यसंकल्पेन मुक्तेनाप्रेप्सितत्वात् प्रत्युत जिहासितत्वादित्याह **विरक्ता इति** ॥ ॥ ३१८ ॥

अज्ञानाख्यांजनच्छेदः पुण्यपापविमोचनम् ।
सर्वकामाशनं चैव स्वरूपव्यक्तिरेव च ।
जीवन्मुक्तौ कर्मफले कथं स्याद्धीमतां मते ॥ ३१९ ॥

कर्मफले कर्मणा क्लेशपूर्वकसाधनेनैव लभ्यं फलं विषयभोगादिकं न तु सङ्कल्पमात्रेणैव यत्र तस्यां जीवन्मुक्तौ। **छेद इति** ईश्वरेच्छारूपावरणस्यानपगमादिति भावः। **विमोचनं इति** प्रारब्धाणामवरोधादित्यर्थः। **सर्वेति** स्वयोग्यसर्वेत्यर्थः। **व्यक्तिरिति** स्वेन रूपेणाभिनिष्पत्तिरिति भावः ॥ ३१९ ॥

यदि कामाशनं तेषां ममन्थुः क्षीरसागरम्।
यज्ञाशनार्थं कलहस्तत्र तत्र कथं वद ॥ ३२० ॥

तेषां जीवन्मुक्तानां देवानाम्। कलहः दक्षाध्वरे रुद्रादीनामिव। 'यज्ञभागं न लभतां' इति दक्षस्य शापनिमित्तकः ॥ ३२० ॥

त्वगस्थिमात्रगात्राणां वातपर्णोदकाशिनाम्।
सदा शरीरसन्तापतपस्यासक्तचेतसाम् ॥ ३२१ ॥

मुनीनां नारदादीनां साक्षात्कृतपरात्मनाम्।
जीवन्मुक्तिदशास्थानां कथं कामान्निताववद ॥ ३२२ ॥

तपसि इति। दशकल्पं तपश्शीर्णं रुद्रेण लवणाम्भसा इत्याद्युक्तेः ॥ ३२१ ॥
॥ ३२२ ॥

अतो निरवकाशानि वचनान्यखिलानि मे।
ब्रूयुर्मुक्तिमनावृत्तिं नावर्तन्ते कथञ्चन ॥ ३२३ ॥

अनावृत्तिं परमम्। नेति। जीवन्मुक्तिसुषुप्त्याद्यन्यावस्थातात्पर्यका नैव भवन्तीति भावः ॥ ३२३ ॥

यत्समीपाप्तिसाहित्यसाम्यानि च विभिन्नयोः।
ततः परममोक्षे च भेदोऽयं सुस्थिरोऽभवत् ॥ ३२४ ॥

यत् तस्मात् ॥ ३३४ ॥

सर्वीभूय परं ब्रह्म सर्वान्कामान्किलाश्नुते।
मुक्तस्तद्ब्रह्मरूपेण भुंक्ते तानखिलान्किल ॥ ३२५ ॥

'उपाधिनाशे मुक्तौ तन्नाशात्स्वाभाविकाभेदः सिध्यती'ति भास्कराद्वैतिमतं निराह **सर्वीभूयेति**। स्वरूपैक्यं प्राप्येत्यर्थः ॥ ३२५ ॥

सहशब्दो यौगपद्यं वदेदात्मेच्छया किल।
तस्य क्रमिकभोगांश्च भुंक्तेऽयं युगपत्किल।
ये प्राहुरित्थं श्रुत्यर्थमनर्थं किं न ते विदुः ॥ ३२६ ॥

युगपदिति। तदुक्तं वादावल्यां 'तदेवं जीवेश्वरभेदस्यौपाधिकत्वे स्वाभाविकाभेदेनेश्वरस्य जीवगतसुखदुःखप्रसङ्गस्यावर्जनीयत्वात्तदङ्गीकारस्य च प्रमाणविरुद्धत्वात्स्वाभाविक एव जीवेश्वरभेदो नौपाधिकः' इति ॥ ३२६ ॥

तुषान्नं कण्टकान्नं च मलं नारकभोजनम्।
नानायोनिस्थजीवानां हीनाहीनाशनानि च ॥ ३२७ ॥

इमे सर्वात्मकब्रह्मकामा मुक्तस्य चेत्तव।
मुक्तिर्न बन्धात्तर्ह्येषा मुक्तिर्मुक्तेरभूदहो।
तस्मादीदृग्विधव्याख्या प्रत्याख्या मुक्तिसंपदः ॥ ३२८ ॥

मुक्तस्येति ईश्वराभिन्नत्वात् तस्यापि सर्वजीवदुःखभोगोऽवर्जनीय इति भावः ॥ मुक्तेर्मुक्तिः निर्दुःखत्वादिमोक्षस्वरूपापलापः ॥ ३२७ ॥ ३२८ ॥

कथं च परमं साम्यं जीवन्मुक्तौ हि दुःखिनाम्।
निर्दुःखब्रह्मणा साकमिति चिन्त्यं विवेकिभिः ॥ ३२९ ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ ३३० ॥

इति गीतासु यत्स्पष्टं स्वसाधर्म्यं हरिर्जगौ।
सर्गप्रलयशून्यानां महामोक्षस्थदेहिनाम् ॥ ३३१ ॥

जीवन्मुक्ताश्च जायन्ते म्रियन्ते च तदा तदा।
अतः परममुक्तस्य प्रशंसेयत्र संशयः ॥ ३३२ ॥

परमं साम्यं निर्दुःखत्वेन जन्ममरणाभावेन च ॥ ३२९ ॥ ३३० ॥ ३३१ ॥ ॥ ३३२ ॥

तथाऽन्योपनिषत्प्राह शरवत्तन्मयो भवेत्।
इति मुक्तिप्रकरणे शरवन्मुक्तचेतनः ॥ ३३३ ॥

लक्ष्यवद्ब्रह्म तस्यान्तःप्रवेशः क्षीरनीरवत्।
इदमेवास्य सायुज्यं मयटोऽर्थोऽप्ययं किल ॥ ३३४ ॥

सायुज्यमोक्षेऽपि शरस्य लक्ष्य इव भगवदुदरे प्रविश्य स्थितिमात्रमेवेति उपनिषदुक्तदृष्टान्तेनाह **तथेति**। **किले**ति प्रसिद्धिः। न हि शरो लक्ष्याभिन्नो भवतीति भावः ॥ ३३३ ॥ ३३४ ॥

जातिभेदो वर्णभेदो मुक्तभेदोऽस्ति तत्र च।
भेदेनादर्शनादेव तदेकीभाववाक्छ्रुतौ।
अदृष्टान्तोक्तितो यस्मात्सदृष्टान्ता बलीयसी ॥ ३३५ ॥

'यतः स्वरूपतश्चान्यो जातितः श्रुतितोऽर्थतः। कथमस्मि स इत्येव संबन्धः स्यादसंहितः' इति भगवत्पादोदाहृतमोक्षधर्मवचनं हृदि कृत्वाऽऽह **जातिभेद इति** जीवत्वविरुद्धेश्वरत्वजातिभेदः। दृष्टान्ते अयस्त्वचेतनत्वजाती। **वर्णभेदः** ईश्वरे शुद्धस्फटिकसङ्काशः 'रुक्मवर्णं' इत्याद्युक्तः। जीवे त्वतादृशः। अन्यत्र स्पष्टम्। **मुक्तभेदः** संसारात्यन्ताभावः, संसारध्वंस इत्यादिरूपः। यद्वा प्रविष्टानां मुक्तानां परस्परं भेदः। **भेदेनादर्शनादिति**। तदुक्तं तत्त्वनिर्णये 'परे ब्रह्मणि जीवाख्यब्रह्माण्यप्यपियन्ति हि। मुक्तौ पृथक् स्थितान्येव तदन्येषामदर्शनम्।

अप्ययोऽयं समुद्दिष्टो न स्वरूपैकता क्वचिदि'ति। **अदृष्टान्तोक्तिः** दृष्टान्तकथनरहिता एकीभवन्तीत्यादिः। **सदृष्टान्ता** शरलक्ष्यदृष्टान्तसहिता ॥ ३३५ ॥

कथं जीवेशभेदो न यं मुक्तोऽपि न मुञ्चति।
द्वा सुपर्णेति सैवाह पुनस्तद्भेदमञ्जसा।
तस्माद्वेदान्तवाक्यानामस्मिन्नर्थे महान्भरः ॥ ३३६ ॥

न मुञ्चति भेदस्य धर्मिस्वरूपत्वादेवेत्यर्थः। **पुनः** मुक्तावपि तत्रोक्तस्य सुखरूपत्वरूपसुपर्णत्वस्य स्वाद्वेकभोजित्वस्य सखित्वस्य सयुक्त्वस्य च मुक्तस्यैव मुख्यतः संभवादिति भावः ॥ ३३६ ॥

त्वमेवाहमिति प्रोक्तो भृत्यस्तत्प्रेम भावयेत्।
अतो मुक्तैक्यवाक्यं च मुक्तस्यात्याप्तता परम् ॥ ३३७ ॥

ममात्मा भद्रसेनोऽयमित्युक्तिर्द्वेष्टि किं द्वयम्।
एकीभूता इति प्रोक्ते किं गवामद्वितीयता ॥ ३३८ ॥

तत्प्रेम। अमात्ये प्रिये ममात्मा भद्रसेन इति कथनमात्रेण न राज्ञोऽमात्येन स्वरूपैक्यं सिध्यतीत्याह **ममेति** ॥ ३३७ ॥ ३३८ ॥

द्वेषान्धाय वने वासो योषात्यागोऽपि रोचते।
न चेद्द्वितीयशून्यत्वमोक्षाय यतते कथम् ॥ ३३९ ॥

द्वेषान्धाय अन्यस्मिन्द्वेषेण स्वस्यानिष्टमपि रोचयमानाय। परमात्मनः सर्वोत्तमत्वादिमहिमानमसहमानाय मायावादिने। **योषात्यागः** 'स्त्रीभिर्वा' इत्याद्युक्तमौक्तभोगस्य त्यागः भागत्यागलक्षणयाऽपलापः ॥ ३३९ ॥

चोरस्याभाषणं लिङ्गमस्पर्शनमदर्शनम्।
कथं मोक्षमशिक्षन्त न चेदेतादृशीं दशाम् ॥ ३४० ॥

चोरस्य प्रकाशतस्करस्य मायिनः। तदुक्तं तत्त्वनिर्णये 'कामक्रोधाभिभूतत्वादहङ्कारवशं गताः। याथातथ्यमविज्ञाय शास्त्राणां शास्त्रदस्यवः। ब्रह्मस्तेना

निरानन्दा अपक्वमनसोऽशिवाः। वैगुण्यमेव पश्यन्ति' इत्यादि। **अभाषणं** प्रपञ्चस्य अनिर्वचनीयत्वोक्तिः। **अस्पर्शनं** 'अशब्दमस्पर्शं' इति श्रुतेरन्यथाव्याख्यानेन सुखगन्धस्य ब्रह्मणः सर्वथा स्पर्शादिनिषेधः। **अदर्शनं** आत्मनोऽदृश्यत्वोक्तिः। यद्वा स्वस्य भाषणस्पर्शनभाषणानां अपलापः। चोरस्य स्पष्टम्॥ ३४०॥

पूर्वोत्तरविरुद्धोक्तिं मत्तो वक्ति न जात्वपि।
किमेकाकी न रमत इत्याद्युक्तीः स नात्यगात्॥ ३४१॥

'धर्माय यशसेऽर्थाय ज्ञानाय यतते जनः। लुप्त्यै समस्तभाग्यानां कोनून्मतः प्रवर्तते' [गुणसौरभं ८७२] इति प्रागुक्तं स्मारयति **पूर्वेति**। स द्वितीयमैच्छत इति स्पष्टोक्तिमपलप्य 'द्वितीयाद्वै भवती'त्यस्य सर्वथा द्वितीयाभावार्थवर्णनेन स्वस्यैव सर्वहितापलापी महोन्मत्त एवेति भावः॥ ३४१॥

ज्योतिः प्राप्य स पर्येति स्त्रीज्ञात्यज्ञातिसंयुतः।
सहाश्नुते सर्वकामा नित्याद्या मौक्तिकोक्तयः॥ ३४२॥

मौक्तिकोक्तयः मुक्तेः सद्वितीयत्वप्रतिपादिकाः। ता इति शेषः। किं नात्यगादिति पूर्वेण संबन्धः॥ ३४२॥

राजन्निगडबद्धस्य तन्मुक्तस्य च राड्भवान्।
यथा बद्धगतिः कृष्णो मुक्तानां परमा गतिः॥ ३४३॥

स्वाधीनं स्वसमं कर्तुं नोत्सहस्व कदाचन।
सारूप्यदोऽपि किं श्रीशो दत्ते श्रीवत्सकौस्तुभौ॥ ३४४॥

उत्सहस्व उत्सहते। 'वर्तस्वाध्यधि सर्वं' इत्यत्रेव लोड्लडर्थकः॥ ३४३॥ ॥ ३४४॥

सदा सेव्यपि नाकांक्षेदङ्गनालिङ्गनं प्रभोः।
इच्छन्त्यच्छहृदो मुक्तावपि नैक्यं तदीशितुः॥ ३४५॥

नेति'अभेदज्ञानादप्रीतिरेवोत्तमानां भवति। घातयन्ति हि राजानो राजाहमिति वदन्तम्' इति तत्त्वनिर्णयोक्तेः॥ ३४५॥

हृष्टोऽपि राजा न स्वीयां जायां दिशति कस्यचित्।
प्रपन्नाय प्रसन्नोऽपि स्वात्मैक्यं न दिशेद्धरिः॥ ३४६॥

कस्यचित् सायुज्यमोक्षभाजोऽपि। 'बहिष्ठान्भुञ्जते भोगात्रानन्दादीन् कदाचन' इत्यादि प्रमाणविरोधात्॥ ३४६॥

न राजवाहनं कांक्षेन्न तत्सिंहासनं भटः।
गरुडारूढता शेषशायिता तत्कदापि न ॥ ३४७॥

सुरेश्वरौ हरेःसेवापरौ सर्वत्र सर्वदा।
नरोल्पकः कथं मुक्तौ तौ मुक्तावारुरुक्षति ॥ ३४८॥

गरुडवाहनत्वशेषशायित्वयोः परमात्मनः स्वरूपलक्षणत्वेन तदाकांक्षायाः स्वरूपैक्याकांक्षापर्यवसानेन महातमःसाधनत्वमित्याह **सर्वत्र सर्वदेति**॥ ३४७॥ ३४८॥

न यत्र माया किमुतापर इत्यखिलेशितुः।
पुरे कामक्रोधपूर्वकार्यस्याभावमञ्जसा ॥ ३४९॥

किमुतेति वदन्योगी मायाऽभावाख्यहेतुना।
कारणाभावरूपेण साधयामास यौक्तिकः ॥ ३५०॥

इतोऽपि नैषा जीवन्मुक्तिः। तत्र मायायाः कार्त्स्न्येन निषेधादित्याह **नेति**। **पुरे** वैकुण्ठे। **अपरे** मायाकार्या अयोग्यकामक्रोधादयः। **यौक्तिकः**। मुक्ताः कामाद्यशेषदोषहीनाः तत्कारणमायारूपप्रकृतिगुणातीतत्वात्। 'गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान्। जन्ममृत्युजराव्याधिविमुक्तोऽमृतमश्नुते' इति स्मृतेः। इति युक्त्यनुसन्धाता शुकमुनिः॥ ३४९॥ ३५०॥

ईषन्मायावशेषं च दोषं स मनुते मुनिः।
सिद्धेश्वरस्य किं स्वोक्तहेत्वसिद्धिर्मनःप्रिया।
चण्डालाङ्गुलिसङ्गेऽपि चण्डालस्पर्श एव हि॥ ३५१ ॥

जीवन्मुक्तिपरत्वे तत्र मायालेशसद्भावेन हेतोः स्वरूपासिद्धिप्रसङ्गादित्याह **हेत्विति**। मायालेशसद्भावेऽपि मायास्पर्शावश्यंभावेन मायाऽतीतत्वहेतोरसिद्धिर्दुष्परिहरैवेत्यत्र लोकदृष्टान्तमाह **चण्डालेति** ॥ ३५१ ॥

कार्याभावस्य चाञ्जस्यं सर्वथाऽभाव एव यत्।
अतोऽसौ कारणस्यापि सर्वथाऽभावमाक्षिपेत्॥ ३५२ ॥

सर्वथाऽभावः कार्यत्वावच्छिन्नाभावः। **सर्वथाऽभावं** कारणत्वावच्छिन्नाभावम्। **आक्षिपेत्** साधयेत्। विमतः मायात्वावच्छिन्नाभाववान् तत्कार्यरागद्वेषादित्वावच्छिन्नाभाववत्वात् इति प्रयोगवत् ॥ ३५२ ॥

एवं च मायात्यन्ताभावस्थानं नित्यमुक्तताम्।
चिद्रूपत्वं न किं लेभे जडं मायामयं हि ते ॥ ३५३ ॥

तल्लक्ष्म्यात्मकलोकोऽपि सोऽभूद्यन्नित्यमुक्तचित्।
लयेऽप्यलीना सैवैका तत्पतिर्यत्पुरःपतिः ॥ ३५४ ॥

एवं च युक्तितो वैकुण्ठादिलोकाश्चिदात्मकाः।
लक्ष्म्यात्मकाः सत्यरूपा नित्याश्चासन्नसंशयः॥ ३५५ ॥

एतेनैव अनन्तासनश्वेतद्वीपवैकुण्ठाख्यलोकत्रयस्य 'त्रिपादस्यामृतं दिवि' इति श्रुत्युक्तं चित्प्रकृत्यात्मकत्वं द्योतमानत्वनिमित्तेन सिद्धमित्याह **एवं चेति**। मायात्यन्ताभावस्थानं कर्तृ, हेतुगर्भं विशेषणम्। तथा च वैकुण्ठादित्रयं स्थानं, नित्यमुक्तचित्प्रकृत्यात्मकं, अत एव प्रलयेऽप्यलीनं मायात्यन्ताभाववत्त्वात् व्यतिरेकेण पृथिव्यादिलोकवत्। इति अनुमानं 'चित्प्रकृत्यात्मनि ततो दिवीति

कथितं श्रुतौ' इति छान्दोग्यभाष्योदाहृतप्रमाणानुगृहीतमत्रानुसन्धेयम् ॥ ३५३ ॥ ३५४ ॥ ३५५ ॥

वैकुण्ठं नाम लोकं तद्दिव्यं षड्गुणसंयुतम्।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥ ३५६ ॥

गुणत्रयविवर्जितमिति। 'न वर्तते यत्र रजस्तमस्तयोः सत्त्वं न मिश्रं' इति [४-२] अनुव्याख्यानव्याख्यानसुधायां 'रजःप्रभृतीनामवृत्तिर्नाम बन्धकतया व्यापाराभावः' इति निरूपितमत्र विभावनीयम् ॥ एवं तत्र वाक्यार्थचन्द्रिका 'ननु ब्रह्माण्डान्तः सर्वत्र परिणामभूतानां रजःप्रभृतिगुणानां व्याप्तत्वाद्ब्रह्माण्डान्तःस्थत्वाद्भगवल्लोकस्य कथं तेषामवृत्तिरित्यतः स्वरूपेण सतामपि तेषां केनचिद्विशेषेणावृत्त्यनुपपत्तेर्नानुपपत्तिरित्यभिप्रेत्य तथाऽवृत्तिमाह रज आदीनामिति' इति ॥ ३५६ ॥

नित्यसिद्धैः समाकीर्णं त्व(चि) न्मयैः पाञ्चकालिकैः।
सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभम् ॥ ३५७ ॥

वापीकूपतटाकैश्च वृक्षषण्डैश्च मण्डितम्।
अप्राकृतं सुरैर्वन्द्यमयुतार्कसमप्रभम् ॥ ३५८ ॥

त्वन्मयैः त्वमेव मयः प्रकृष्टो येषां तैः। 'मायेत्युक्ता प्रकृष्टत्वात् प्रकृष्टं हि मयाऽभिधं' इति तत्त्वनिर्णयोक्तेः ॥ ३५७ ॥ ३५८ ॥

प्रकृष्टसत्त्वराशित्वात्कदा द्रक्ष्यामि चक्षुषा।
इत्थं वैकुण्ठनगरीमस्तौषीच्चतुराननः ॥ ३५९ ॥

प्रकृष्टेति प्रकृष्टानां संसारान्मुक्तानां सत्त्वानां पशुपक्ष्यादीनां प्राणिनां राशिः समूहः यत्र तथाभूतत्वात् ॥ ३५९ ॥

पञ्चरात्रे चतुर्वक्त्रस्तोत्रेष्वाद्यमिदं किल ॥ ३६० ॥

चतुर्वक्त्रस्तोत्रेषु चतुर्भिर्मुखैः कृतेषु चतुर्षु स्तोत्रेषु ॥ ३६० ॥

ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः।
ज्ञानविज्ञानयोश्चैव षण्णां भग इतीरणा।
इत्युक्ते षड्गुणः पूर्णज्ञानविज्ञानशक्तिमान् ॥ ३६१ ॥

संयुतत्वोक्तितश्चाभूत्सम्यग्युक्तो हि तैर्गुणैः।
अप्राकृतःसुरैर्वन्द्यो लोकोऽसौ न ह्यचेतनः ॥ ३६२ ॥

विशेषणत्रयं ह्येतच्छ्रियः श्रीशस्य चोचितम्।
अतोऽपि श्रीपतेर्लोकः श्रीरूपोऽयं भवेद्ध्रुवम् ॥ ३६३ ॥

विशेषणानि यथायथं श्रीपतौ तदधिष्ठिते लक्ष्म्यात्मकलोके च अनुयन्ति ॥ ३६१ ॥ ३६२ ॥ ३६३ ॥

पठन्सहस्रनामानि शंभुब्रह्मोर्ध्वधामगः।
इति यं धूर्जटिः स्तौति किं तद्धाम विचार्यताम् ॥ ३६४ ॥

शंभुब्रह्मोर्ध्वता धाम्नस्ताभ्यामुत्तमतैव हि।
अहङ्कारात्मकाच्छंभोर्ब्रह्मणो महदात्मकात्।
न हि वैकुण्ठपूरूर्ध्वं तद्गुणैरेव सोपरि ॥ ३६५ ॥

ऊर्ध्वेति ब्रह्मरुद्रापेक्षया गुणैरुत्कृष्टलक्ष्म्यात्मकेत्यर्थः। सा पूः ॥ ३६४ ॥ ३६५ ॥

ब्रह्मादयो बहुतिथमिति भागवतोक्तितः।
ब्रह्मादिभ्यो गुणैरुच्चा यच्छ्रीरेव हरेः प्रिया।
एवञ्च लक्ष्मीरूपत्वं लोकस्य न कथं वद ॥ ३६६ ॥

उक्तोत्कृष्टत्वे भागवतं प्रमाणयति ब्रह्मादय इति। 'यदपाङ्गमोक्षकामा यथोक्तविधिना भगवत्प्रपन्नाः सा श्रीः' इत्यादिवाक्यशेषः। [भा. प्र. १६-३२] ॥ ३६६ ॥

हरेरनुव्रता एव मुक्तास्तत्रापि ते किल।
सर्वे चतुर्बाहवश्च श्यामकोमलमूर्तयः ॥ ३६७ ॥

मणिप्रवेकाभरणा निष्ककण्ठाः सुवर्चसः ॥ ३६८ ॥

मुक्तस्थानवर्णनपरान् अनुव्याख्यानोदाहृतान् [४-२-१] भागवतश्लोकानर्थतः संगृह्णाति हरेरित्यादिना। 'न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः। श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः। सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः। प्रवालवैदूर्यमृणालवर्चसां परिस्फुरत्कुण्डलमौलिमालिनाम्। भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनाम्। विद्योतमानप्रमदोत्तमाभिः स विद्युदभ्रावलिभिर्यथा नभः। श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः ॥' [भा. ९-१०-१३] असुराः साधवः सन्ति। अवदाताः निर्मलाः। उन्मिषदिति। रश्मिमद्रत्नप्रवरहाराभरणाः इत्यर्थः ॥ ३६७ ॥ ३६८ ॥

श्रीवत्सकौस्तुभाभावात्पूर्णशक्त्याद्यभावतः।
विलक्षणाः परं सर्वेऽप्याकारे सदृशाः किल ॥ ३६९ ॥

सारूप्यं न सर्वात्मनेत्याह श्रीवत्सेति। 'श्रीवत्सलक्ष्मं गलशोभिकौस्तुभं' [भा. १०-३-१०] इति तद्धारकत्वस्य परमात्मनः स्वरूपलक्षणत्वोक्तेः ॥ ३६९ ॥

जगद्व्यापारवर्जं च विना श्रीवत्सकौस्तुभौ।
इति सूत्रे भागवते चोक्त्या विष्णोर्विलक्षणाः ॥ ३७० ॥

विलक्षणाः 'सर्वत्राखिलसच्छक्तिः स्वतन्त्रोऽशेषदर्शनः'। इत्युक्तभगवद्धर्मविलक्षणधर्माः। नित्यं अतादृशा इत्यर्थः ॥ ३७० ॥

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च।
इति गीतासु ये प्रोक्तास्त एते योगिनः किल ॥ ३७१ ॥

एवं च जननाभावान्मरणाभावतस्तथा ।
जडदेहाद्यभावाच्च दुःखाभावाच्च सर्वदा ॥ ३७२ ॥

किञ्चित्साधर्म्यमेवेत्यत्र गीतां संवादयति **इदमिति** ॥ ३७१ ॥ ३७२ ॥

ज्ञानानन्दमयाकारा नित्यं च सुखभुक्त्वतः ।
मुक्तिर्विलक्षणा बन्धाज्जीवाः सर्वे द्वयोः समाः ।
त्रिविधाः सन्ति संसारे शुद्धा एव विमुक्तिगाः ॥ ३७३ ॥

योगिन इत्यनेन ज्ञानानन्दमयाकारा इत्येतत्संबध्यते। स्वरूपानन्दस्याभिव्यक्तिर्मुक्तौ । तदभावो बन्धे इति हेतोर्मुक्तेर्बन्धाद्वैलक्षण्यमित्याह **नित्यमिति।** **जीवाः** मुक्तियोग्याः देवर्षिपितृपनरा इति तत्त्वसंख्यानोक्ताः । 'इति मुक्तास्तु पञ्चधा । एवं विमुक्तियोग्याश्च' इति कथनेन लब्धमर्थमाह **समा** इति । उभयेऽपि पञ्चधैवेत्यर्थः । **त्रिविधाः** इति 'त्रिविधा जीवसङ्घास्तु देवमानुषदानवा' इति भगवत्पादोदाहृतभविष्यत्पर्ववचनात् ॥ ३७३ ॥

अश्वो मान्यो गजो मान्यो धेनुर्मान्या दिवौकसाम् ।
वृक्षः कल्पतरुर्मान्यः सर्पो मान्यो हरेः प्रियः॥ ३७४ ॥

पक्षी विष्णुरथो मान्यो लोको मान्यो हि योऽर्थ्यते ।
स्त्रियश्चाप्सरसो मान्याः श्वानावपि च नाकिनाम्॥ ३७५ ॥

मान्यौ किल श्यामनामा शबलाख्यश्च यः श्रुतः ।
भूलोके स्थितपश्वादेः स्वर्गलोके स्थिते यदा॥ ३७६ ॥

पूज्यता प्राकृतेऽप्यर्थे तदा विष्णोस्त्रिधामसु ।
स्थितानां शुद्धसत्त्वानां ज्ञानानन्दस्वरूपिणाम् ।
श्रुतिस्मृतीतिहासाद्यैः स्तुतानां किं न पूज्यता ॥ ३७७ ॥

अत्र रामानुजीया आहुः। 'स्वरूपतः श्वसूकरत्वं श्लाघ्यमित्यत्र नियामकाभावादि'त्यादि । तत्खण्डयति **अश्व** इत्यादिभिः । नियामकाभावोऽसिद्धः । 'पारावतान्यभृतसारसचक्रवाकदात्यूहहंसशुकतित्तिरिबर्हिणां यः' इत्यादिना नानाजातीयानां वैकुण्ठे सद्भावस्य भागवते वर्णितत्वात् [३/१५-१८] 'ज्योतिर्मयेषु देहेषु स्वेच्छया विश्वमोक्षिणः । भुञ्जते सुसुखान्येव' इति ब्रह्मवैवर्ते, कल्याणतरं रूपं कुरुते इत्यादिश्रुतिषु च तेषां श्लाघ्यत्वस्य वर्णितत्वादित्यभिप्रेत्याह **मान्य इति।** दिवौकसामित्येतत्प्रत्येकं अश्व इत्यादिना संबध्यते । स्वर्गे विद्यमानाः प्राकृतदेहसंबन्धवन्तोऽपि यदा श्लाघ्याः किमु तदा अप्राकृतविष्णुलोकस्था इत्याह **पूज्यतेति** ॥ ३७४ ॥ ३७५ ॥ ३७६ ॥ ३७७ ॥

उत्तरोत्तरवस्तूनामुत्तमोत्तमतोचिता ।
मुकुन्दनगरीस्थानां मुक्ततैव गुणोचिता ॥ ३७८ ॥

दिव्या दिव्यतटाकेषु दिव्या दिव्यवनेषु च ।
दिव्या दिव्यनगर्यां च दिव्यज्ञानसुखात्मकाः॥ ३७९ ॥

मत्स्याद्या मृगपक्ष्याद्या हस्त्यश्वरथपूर्वकाः ।
अर्थास्तत्तदलङ्कारमत्स्यकूर्मादिरूपिणः ।
विष्णोराकृतिवत्स्वस्थाः सन्ति चेत्सन्तु किं तव ॥ ३८० ॥

विष्णोराकृतिवत् । मत्स्यादिरूपवत् । तत्र हेतुः दिव्यज्ञानसुखात्मका इति । अप्राकृतत्वमात्रे दृष्टान्तः ॥ ३७८ ॥ ३७९ ॥ ३८० ॥

श्रुत्या स्मृत्या च या वर्ण्या
सा शून्या पूर्न वैष्णवी ॥ ३८१ ॥

श्रुत्या ॐ संकल्पादेव तु तच्छ्रुतेः इति सूत्रोपात्तया **स्मृत्या** 'अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्धसु' [भा.२/६-१८] 'तद्धाम परमं मम' [गीता] इत्यादिकया ॥ ३८१ ॥

पूर्णा पुरोचितैः सत्त्वैः सुपुरत्वाद्धरेः पुरी ।
यथा संप्रतिपन्नेति किं न स्यादनुमा मम ॥ ३८२ ॥

हरेः पुरी वैकुण्ठस्था अयोध्या। **पूर्णा** गन्धमाल्यादिभिः सङ्कल्पमात्रोपस्थितैः। **सत्त्वैः** मुक्तपशुपक्ष्यादिभिः। **संप्रतिपन्ना** रामचन्द्रेण परिपाल्यमाना अयोध्या। **सुपुरत्वात्** प्रत्यक्षेण परमात्मनाऽधिष्ठितत्वात्। न च दृष्टान्तः साध्यविकलः। अयोध्यास्थानां गर्दभपिपीलिकादीनामपि सन्निहितनिश्चितमुक्तिपदत्वात् इति तात्पर्यनिर्णयोक्तेः ॥ ३८२ ॥

स सत्त्वराशिर्मुक्तत्वव्याकोपस्य न कारकः।
प्रकृष्टत्वाद्यथा विष्णोर्मत्स्याद्या व्यक्तिराशयः ॥ ३८३ ॥

सः मुक्तौ विद्यमानः। **सत्त्वराशिः** पिपीलिकाऽऽदिः। **मुक्तत्वव्याकोपस्य न कारकाः**। प्रकृतिबन्धरहिता एवेति यावत्। तदुक्तं तत्रैव 'ते जरामृतिहीनाश्च सर्वदुःखविवर्जिताः। संसारमुक्ता न्यवसंस्तत्र नित्यसुखाधिकाः'। **यथा विष्णोरिति**। सर्वत्र अधिकदृष्टान्तः इति। निर्दुःखत्वादिनैव साम्यम् ॥ ३८३ ॥

प्रकृष्टश्च स संसारदूरत्वात्तद्वदेव हि।
दुःखमेव हि संसारे ततः क्वानुपपन्नता।
तच्च मायात्ययस्थानस्थत्वात्तद्वत्प्रसिद्ध्यति ॥ ३८४ ॥

साम्यमेव विशदयति **संसारदूरत्वादिति**। अविवक्षितविशेषसंसारसंसर्गाभाववत्त्वात्। अभावश्च दृष्टान्ते अत्यन्ताभावः। पक्षे ध्वंसः। **तच्च** संसारदूरत्वम्। **स्थानस्थत्वादिति**। अत्रापि पूर्ववद्विवेक्तव्यम्। परमात्मनः नित्यं स्थितिः। मुक्तानां तु मुक्त्यनन्तरमिति ॥ ३८४ ॥

भिन्ना मिथः परेशाच्च मुक्ता विसदृशत्वतः।
सत्त्वराशिर्यथाऽत्रत्यो यथा वा राजतद्भटौ ॥ ३८५ ॥

यथाऽत्रत्यः श्रीरामाधिष्ठितायोध्यास्थः। 'गुणैश्च सर्वैरुदिताश्च सर्वे यथा यथा योग्यतयोच्चनीचाः' इति निर्णयोक्तेः ॥ ३८५ ॥

प्रकृष्टसत्त्वराशित्वादित्याह स्मृतिरेव यत्।
प्रकृष्टः सत्वराशिश्च यस्यासौ हि तथाऽभिधः ॥ ३८६ ॥

स्मृतिः पञ्चरात्रम् ॥ ३८६ ॥

तत्कुतर्ककुवाक्येभ्यो न बिभ्यत्यनुमा इमाः।
अतोऽनुमानमालेयं तामलङ्कुरुते पुरीम् ॥ ३८७ ॥

माला आगमानुग्रहसौरभसमृद्धा ॥ ३८७ ॥

श्रीरेव लोकरूपेण विष्णोस्तिष्ठति सर्वदा।
अतो हि वैष्णवा लोका नित्यास्ते चेतना अपि ॥ ३८८ ॥

पशुपक्ष्यादिरूपेण जीवा एव पृथक्स्थिताः।
संसृतौ व्यत्ययस्तेषां मुक्तौ तत्तत्स्वरूपता ॥ ३८९ ॥

व्यत्ययः कर्मवेगेन अन्यथारूपम्। **मुक्ताविति**। 'मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिरि'ति लक्षणवत्यामित्यर्थः ॥ ३८८ ॥ ३८९ ॥

इत्यादिमानैस्तत्प्रोक्ते चर्चा युक्तिबुभुत्सया।
अतो युक्तियुतं श्रौतं सर्वं मान्यमिति स्थितम् ॥ ३९० ॥

तत् तस्मात्। **प्रोक्ते** प्रकर्षेण सोपपत्तिकं वर्णिते **बुभुत्सया** मन्दानां बोधनेच्छया। **मान्यं** शुष्कतर्कत्वाभावात् ॥ ३९० ॥

स्पष्टा श्रुतिश्चार्थमेनं वक्ति तच्चातुरीं शृणु ॥ ३९१ ॥

श्रुतिः 'रूपं रूपं प्रतिरूपो बभूव' इत्यादिरग्रे 'पुरुरूपस्य' इत्यादिना वक्ष्यमाणा ॥ ३९१ ॥

सुरधेनुद्रुमाहीन्द्रवीन्द्रनद्यादिरूपिणः।
मुक्ताश्च पशुपक्ष्याद्याः सन्ति चेत्किं ततो गतम् ॥ ३९२ ॥

निर्दुःखानन्दचिद्रूपा मुक्तास्ते चित्रयोनयः।
मत्स्यकूर्मवराहाद्या इव निर्दोषमूर्तयः ॥ ३९३ ॥

द्रुमाः उपकक्षासः इत्यादिश्रुतिसिद्धाः। **अहीन्द्रेति** 'मुक्तेन्द्रहिमगुमदनाहीन्द्रदेवेन्द्रसेव्ये' इति वायुस्तुतिनिरूपिताः। **किं ततो गतमिति।** न काऽपि श्रुतहानिः न वाऽश्रुतकल्पनेति भावः ॥ ३९२ ॥ ३९३ ॥

ब्रह्मलोकाप्तचण्डालाद्यशेषप्राणिसार्थपः।
इति नामार्थतत्त्वज्ञा मुक्तौ चेत्थं प्रचक्षते।
स्वर्नीतगर्दभश्वादिरिति नामान्तरं किल ॥ ३९४ ॥

नामान्तरं पूर्वोक्तात् ब्रह्मलोकेत्यादिनाम्नः अन्यत् वासुदेवसहस्रनामसु पठितम्। ताभ्यां च वैकुण्ठे चण्डालादीनां गर्दभाश्वादीनां च सद्भावः सिध्यतीति भावः ॥ ३९४ ॥

विषवृक्षफलाकारा शर्कराकृतकृत्रिमा।
धत्ते किं तिक्ततादोषं मुक्तास्ते तद्वदेव हि ॥ ३९५ ॥

आकारमात्रं न दोषावहं इत्येतद् दृष्टान्तोक्त्या स्फोरयति **विषेति।** शर्करया निर्मिता प्रतिमा विषवृक्षाकारत्वेऽपि न स्वादुत्वस्वरूपं जहातीति भावः ॥ ३९५ ॥

मुक्तेरमुक्तिता तु स्याद्दुःखे सत्येव नान्यथा।
देहादिर्दुःखहेतुत्वाद्दुःखमित्युपचर्यते ॥ ३९६ ॥

तद्दुःखं दुःखहेतुश्च दुःखान्मुक्ते न शोभते।
यद्दुःखात्यन्तविच्छेदं मोक्षमाहुर्विचक्षणाः ॥ ३९७ ॥

निर्दुःखानन्ददेहस्तु यदि स्यात्परमात्मवत्।
तच्चित्रतायामपि च किं वित्तं तव नश्यति ॥ ३९८ ॥

'ननु विप्रतिपन्नः स्यादूर्मिमान् देहवत्त्वतः। चैत्रो यथेत्युपाधिः स्यादत्र चाशुद्धदेहिता' इति सुमध्वविजयोक्तं विविनक्ति **देहादिरिति। परमात्मवदिति** 'अतः शुद्धचिदेहेन्द्रियभोग्यसावि'ति तत्रैव समर्थितत्वादिति भावः ॥ ३९६ ॥ ३९७ ॥ ॥ ३९८ ॥

पुरुरूपस्य तस्येमे प्रतिरूपाः किलाखिलाः।
श्रुतिसिद्धं ततो जीवनानारूपं न संशयः ॥ ३९९ ॥

'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय। इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश' इति श्रुत्या जीवानां प्रतिबिम्बत्वं मिथो वैचित्र्यं च साधयति। परमेश्वरस्य रूपं रूपं प्रति जीवाख्यः प्रतिरूपो भूत्वा वर्तते। तद्बिम्बरूपं अस्य मुक्त्यर्थं साक्षात्कारविषयो भवति। स च परमेश्वरः स्वसामर्थ्येनानन्तजीवबिम्बरूपो ज्ञायते। अस्यानन्तानि हरिनामकानि रूपाणि व्यूहशः सन्तीति प्रसिद्धमित्यर्थः। [भाष्यटीका २-३-५०] ॥ ३९९ ॥

शता दशेति तद्रूपं यच्छ्रुत्यैव विवेचितम्।
अतः स्वरूपमात्रं न रूपं मत्स्यादयो हि ते ॥ ४०० ॥

कथं स्वरूपमात्रस्य शतता दशता तव।
तत्पुरुत्वं न पूर्णत्वं बहुतैव भवेद्ध्रुवम् ॥ ४०१ ॥

पुरुशब्दो बहुत्ववाची न त्वेकस्मिन्नेव पूर्णत्वरूपधर्मवाची। श्रुत्यैव शता दशेति विवरणात् इत्याह **शता इति।** 'शब्दो बहुत्ववचनः शतमिति' इति महा.ता.निर्णयोक्तेः। अत्र च बहुत्वं अनन्तत्वमेव ॥ ४०० ॥ ४०१ ॥

रूपं रूपं चेति वीप्सा जुगुप्सा च न चेद् भवेत्।
मत्स्यकूर्मादिरूपाणां प्रतिरूपाश्च तादृशाः।
कथं न वाच्या धीमद्भिः प्रतिशब्दार्थवेदिभिः ॥ ४०२ ॥

तत्तद्रूपापरोक्ष्येण मोक्षस्तेषां भवेत्किल।
प्रतिपत्त्याऽपरोक्ष्यं हि प्रतिचक्षणमुच्यते ॥ ४०३ ॥

जुगुप्सेति। एकत्वे वीप्साया अयोगादिति भावः। प्रतिरूपशब्दस्यार्थः **तादृशा इति।** तदधीनत्वे सति तेन किञ्चित्सदृशा इत्यर्थः। अनेन मुक्तानां

प्रतिबिम्बत्वात् बिम्बभूतमत्स्यादिभगवद्रूपसदृशाकारता स्वत एव सिद्धेत्याह कथमिति ॥ ४०२ ॥ ४०३ ॥

तदस्येति श्रुतौ प्रोक्तं जीवस्य परमस्य च ।
द्रष्टृदृश्यात्मकं रूपद्वयं तत्पारमार्थिकम् ।
यन्मोक्षदप्रमारूपसाक्षात्कारस्य गोचरः ॥ ४०४ ॥

गोचरः परमात्मा । आश्रयः जीवः इत्येतदप्युपस्कर्तव्यम् । तेनोभयोरपि पारमार्थिकत्वस्य सिद्धिः ॥ ४०४ ॥

मोक्षं प्रत्यपरोक्षं च यतस्तत्प्रतिचक्षणम् ।
अर्थं प्रत्येव दृष्टिश्च यतोऽभूत्प्रतिचक्षणम् ।
अतो यथार्थज्ञानार्था प्रतिचक्षणवागियम् ॥ ४०५ ॥

उद्देश्यता कथं नोचेदनुद्देश्यभ्रमे सताम् ।
तादर्थ्ये हि चतुर्थीयमनर्थे सा कथं वद ॥ ४०६ ॥

अर्थं पुरुषार्थोत्तमं मोक्षम् । प्रति उद्देशीकृत्य । मोक्षस्योद्देश्यत्वेनैव तद्धेतुज्ञानस्यापि तत्सिद्धमित्याह उद्देश्यतेति । अनर्थे अनुद्देश्ये ॥ ४०५ ॥ ४०६ ॥

ऐश्वर्यवान्किलेन्द्रोऽसौ सद्गुणो न तु निर्गुणः ।
अतो मायापदं चास्य माहात्म्यान्येव शंसति ॥ ४०७ ॥

ऐश्वर्यवान् षड्गुणैश्वर्यवान् । अत एव सर्वज्ञः । माहात्म्यानि सविशेषाभिन्नानि । अतो बहुवचनोपपत्तिः । तेन सर्वज्ञत्वात् नास्याज्ञानाश्रयत्वम् । 'अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चने'ति भगवत्पादोक्तेः ॥ ४०७ ॥

बहुत्वार्थविभक्त्यर्थो मायैका ते कथं वद ।
कथं मायाख्यदोषःस्यात्परमेश्वरताऽऽश्रये ।
न हि मायामयं रूपं प्रमागोचरतां व्रजेत् ॥ ४०८ ॥

ते अज्ञानैकत्ववादिनः । ज्ञानस्य प्रमात्वाच्च न तद्विषयस्य मायामयत्वसंभव इत्याह नेति ॥ ४०८ ॥

शता दशेति कथनादिन्द्रो नायं पुरन्दरः ।
परमेश्वरता मुख्या न यन्नश्वरसंपदि ॥ ४०९ ॥

नायमिति । पुरन्दरस्य बहुत्वाभावात् । नित्यत्वपरमत्वयोः तस्यैश्वर्येऽभावाच्चेत्यर्थः ॥ ४०९ ॥

युक्ता हीति सुयुक्तीनां विद्वत्सिद्धेश्च कीर्तनात् ।
संशयोऽस्मिन्समस्तेऽर्थे कार्यो नार्यैः कदाचन ॥ ४१० ॥

कीर्तनात् क्रमेण युक्ता इति हि इति पदेन च ॥ ४१० ॥

अमुक्तागम्यभूर्या हि सा साक्षान्मुक्तिरेव हि ।
तत्रापि भगवद्भाग्यमुक्तं भागवते बहु ।
यदाऽगात्सनकादीन्स्वान्मुनीननुनिनीषया ॥ ४११ ॥

साक्षात् परमा । भाग्यमिति । तेन न तस्याः निर्विशेषब्रह्मभावता । अनुनिनीषा क्रोधशमनेच्छा ॥ ४११ ॥

विनतातनयांसस्थः श्रिया देव्या समन्वितः ॥ ४१२ ॥

चार्वङ्घ्रिजङ्घाजानूरुकटिकुक्षिवलित्रयः ।
निम्ननाभिस्फुरन्मध्यविशालोरस्स्थलोज्ज्वलः ॥ ४१३ ॥

कंबुग्रीवो वृत्तपीनदीर्घबाहुचतुष्टयः ।
अमन्दसान्द्रसौन्दर्यमन्दिरास्येन्दुमण्डलः ॥ ४१४ ॥

'एवं तदैव' इत्यारभ्य 'कन्धरगतेन च कौस्तुभेन' इत्यन्तैः भागवतश्लोकैः [३,१५/३७-४१] वर्णितं महिमानमाह 'विनतातनयेत्यारभ्य यत्र ते सनकादय' इत्यन्तैः ॥ ४१३ ॥ ४१४ ॥

चार्वक्षिफालनासास्यकर्णगण्डारुणाधरः ।
मन्दस्मितप्रभामिश्रसुन्दरोष्ठारुणद्युतिः ॥ ४१५ ॥

किरीटहारग्रैवेयरत्नकुण्डलकौस्तुभः ।
काञ्चीकिङ्किणिमञ्जीरनूपुराद्यैर्विराजितः ॥ ४१६ ॥

करस्थकमलं धुन्वन्करुणालोललोचनः ।
छत्रचामरवादित्रगीतनृत्ताक्षताङ्कुरैः ॥ ४१७ ॥

फालः ललाटः ॥ ४१५ ॥ ४१६ ॥ ४१७ ॥

व्यजनैर्धूपदीपैश्च पुष्पैर्नीराजनैः स्तवैः ।
अर्च्यमानः प्रतिपदं मुक्तसंसारबन्धनैः ॥ ४१८ ॥

सुरैरसंख्यैः परितो मुक्तक्लेशैः कृतोत्सवः ।
तत्रायात्किल सर्वेशो यत्र ते सनकादयः ॥ ४१९ ॥

जीवन्मुक्तैश्च मुनिभिरगम्या सा हरेः पुरी ।
आसीत्परममुक्तानामास्थान्येव विवेकिनाम् ॥ ४२० ॥

मुनिभिः अपरोक्षज्ञानिभिः सनकादिभिः । आस्थानी निवासभूमिः ॥ ४१८ ॥ ॥ ४१९ ॥ ४२० ॥

न चेदन्तःपुरं सर्वान्प्रवेश्यानन्दयेद्धि तान् ।
कृपालुर्भक्तिभरितांस्ततो नामुक्तभूरसौ ॥ ४२१ ॥

तत्राप्युक्तप्रमाणेन प्रभुस्साकार एव सः ।
श्रीश्च दिव्यमनोज्ञाङ्गी भृत्यास्ते दिव्यमूर्तयः ।
अनन्तास्ते च सेवन्ते सेव्यस्तैः सर्वदा प्रभुः ॥ ४२२ ॥

हर्म्याणि रत्नभवनान्युद्यानोपवनानि च ।
वापीकूपतटाकानि सन्ति तत्र गृहे गृहे ॥ ४२३ ॥

न चेत् प्रमाणानुसारेण अमुक्तैः सर्वथा प्रवेष्टुं अयोग्या न चेत् । 'स्वतन्त्रेच्छोऽपि भगवान्मानेऽसौ मानवान् किल' इत्युक्तेरिति भावः ॥ ४२१ ॥ ४२२ ॥ ४२३ ॥

पक्वो वातापि देहोऽपि भिक्षोश्शाकादिरूपतः ।
रक्षःशक्त्या यथापूर्वं लक्ष्यते तत्क्षणे किल ॥ ४२४ ॥

मुक्तैर्निरन्तरं भुज्यमानानामपि पायसादीनां नैव क्षयः किन्तु यथापूर्वमेवावस्थानं भगवतोऽचिन्त्यशक्त्येत्यत्र कैमुत्यन्यायमाह **पक्व इति**। भगवद्दत्तसामर्थ्येन वातापिरपि राक्षसः भुक्तोऽपि भोक्तृणां शरीरस्थमांसादिना पुनः पूर्ववद्देहवान् भूत्वा निष्क्रमणाय क्षमो यदा तदा भगवदनुग्रहातिशयभाजनानां अत एव सत्यसङ्कल्पानां मुक्तानां तथाविधा शक्तिरिति किं वाच्यमिति भावः । अत्र स्कन्दपुराणोक्ता कथाऽनुसन्धेया ॥ ४२४ ॥

अतो मौक्तं समस्तं च वस्तु भुक्तं च तैः पुनः ।
तथैव तिष्ठेत्तन्नित्यं स्याच्चाजं लिङ्गदेहवत् ॥ ४२५ ॥

जन्मराहित्यमात्रे दृष्टान्तो लिङ्गदेहवदिति ॥ ४२५ ॥

सर्वस्सर्वेशशक्त्यैव श्रुत्युक्तार्थः समर्थ्यते ।
अन्यैरघटितं योऽसौ घटयेदणुगो महान् ॥ ४२६ ॥

घटयेदिति । तदुक्तं सुधायां 'नन्वीश्वरशक्तिरपि कथम् । यावत् प्रमाणसिद्धं तावतः सुघटस्य दुर्घटस्य वा घटनायां पटुरिति ब्रूमः' इति ॥ ४२६ ॥

ऐक्यं च निर्गुणत्वं च न श्रौतं नापि युक्तिमत् ॥ ४२७ ॥

रुणद्धि यद्धि घटकशक्तीशत्वे महाप्रभोः ।
घटयेन्नेदृशानर्थकरमर्थं स बुद्धिमान् । ॥ ४२८ ॥

दुःखं सन्धित्सतो यत्सा शक्तिः प्रच्यवते बहिः ॥ ४२९ ॥

अल्पशक्तिना जीवनैक्यं ऐश्वर्यादिगुणहीनत्वं निर्गुणत्वं च अप्रमिते सर्वशक्तिमत्त्वेश्वरत्वरूपस्वमाहात्म्यविघटके च। अत एतात्र घटयेदेवेत्याह ऐक्यमिति। विवृतमेतद्गुणसौरभे [श्लो. ९९६-१००१] ॥ ४२७ ॥ ४२८ ॥ ४२९ ॥

यस्सर्वेश्वरतागुप्त्यै सेहे विप्रपदा हतिम्।
स्वमहिम्नि महांस्तस्य भरः स्तोत्रर्थकारिणः ॥ ४३० ॥

गुप्त्यै अज्ञजनेष्वपि प्रख्यापनार्थम्। सेहे तन्निमित्तकविकारवान्नाभूत्। महान् भरः महातात्पर्यम्। 'न तादृशी प्रीतिरीड्यस्य विष्णोर्गुणोत्कर्षज्ञातरि यादृशी स्यात्' इत्युक्तेः ॥ ४३० ॥

साऽयोध्याख्या हरिपुरी रत्नगोपुरमण्टपा।
श्रीरेव नगराकारा सेवते स्वपतिं किल।
भक्ताः परममुक्तास्ते नित्यमुक्तो हरिः प्रभुः ॥ ४३१ ॥

सेवते 'स्वयमिन्दिरैव पतिमानकरी गृहकर्म यत्र कुरुते सुतरामि'त्युक्तेः ॥ ४३१ ॥

तस्माज्जीवेश्वराभेदो जीवाभेदोऽद्वितीयता।
निराकारत्वमज्ञत्वं निर्गुणब्रह्म यत्तव ॥ ४३२ ॥

तस्मात् मुक्तावपि भेदादेः गुणानां चानुवृत्तेः ॥ ४३२ ॥

अप्रामाणिकमेवेदं सर्वमासीन्न संशयः।
उक्ते परममोक्षेऽस्मिन्यन्नाभूत्कुत्र तद्भवेत् ॥ ४३३ ॥

अतो दुराशां सन्त्यज्य भज कृष्णपदाम्बुजम्।
गर्ते वा पत मध्ये ते स्थितिर्लज्जाऽऽतुरस्य न। ४३४ ॥

गर्ते पूयासृङ्मूत्रविष्ठाकृमिकुलकलिले तमसि। लज्जाऽऽतुरस्येति। तदुक्तं चन्द्रिकायां 'अद्वैतिभिर्व्याक्रियते कथमद्वैतदूषकम्। सूत्रजातं स्वसिद्धान्ततया लज्जां विनैव तु' इति [१-२-५] ॥ ४३३ ॥ ४३४ ॥

एवं च सुखरूपेण चक्षुषा सुखरूपिणाम्।
मुक्तं पश्यति मुक्तोऽन्यः सुखरूपेण जिघ्रति ॥ ४३५ ॥

घ्राणेन सुखरूपत्वाद्घ्रेयमेवं सुखात्मना।
मनसैव विजानीयाद्विज्ञातारं हरिं प्रभुम् ॥ ४३६ ॥

'केन कं पश्येत्' इत्यादिश्रुतिं तर्कमुद्रां विनाऽपि मुक्तिस्वरूपसमर्थनपरतया योजयति एवं चेति ॥ ४३५ ॥ ४३६ ॥

इत्येव यत्र त्वस्येति श्रुतिः स्वार्थमुपाददे।
यतस्सुखं कमित्याहुश्शब्दतत्वविशारदाः ॥ ४३७ ॥

आहुः 'कं ब्रह्म' इत्यादि श्रौतप्रयोगबाहुल्यात् ॥ ४३७ ॥

अन्यार्थस्य महामोक्षेऽप्येतस्मिन्वैष्णवे पदे।
उक्तरीत्या बाधितत्वादयोग्यं तज्जहौ श्रुतिः ॥ ४३८ ॥

अन्यार्थस्य निर्विशेषभावरूपस्य ॥ ४३८ ॥

विस्तरस्त्वस्य सर्वस्य मूलशास्त्रमहार्णवे।
द्रष्टव्यश्चित्तशुद्ध्यर्थमेतावच्चर्चितं मया ॥ ४३९ ॥

मूलशास्त्रमहार्णवे 'अस्वातन्त्र्यादिवेत्युक्तं न द्वैताभावतः क्वचित्' इत्याद्यनुव्याख्यानतट्टीकासु [४-२-१] ॥ ४३९ ॥

अतो योग्योरुसौभाग्यापेक्षी मुक्तोऽनुमीयते।
मुक्तत्वान्नित्यमुक्तोऽसौ यथा स्वानन्दनिर्भरः ॥ ४४० ॥

अत इति 'कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि' इति मुमुक्षुप्रार्थनात् । नित्यमुक्ते नित्यप्राप्तस्यैव प्रेप्सा । अन्यस्य कादाचित्की । इति विवेकः ॥ ४४० ॥

तस्माच्छून्यत्वमोक्षाय नाकांक्षा जायते नृणाम् ।
अनाकांक्षितमोक्षाय न परोक्ता भवेच्छ्रुतिः ॥ ४४१ ॥

नेति। 'सुखहानौ हि को मोक्षाय यतेतुमान्' इत्यनुव्याख्यानोक्तेः [४-२-१] ॥ ४४१ ॥

तस्माच्छुभजनाकीर्णा दिव्यभोगवती स्थितिः ।
मुक्तिरुक्तश्रुतिशतैरप्याम्नानादिति स्थितम् ॥ ४४२ ॥

आम्नानात् असकृत्प्रतिपादनात् ॥ ४४२ ॥

यत्र मुक्तौ मुक्तवर्गाद्धरेर्द्वैतमिव प्रभोः ।
द्वैतोपमो विशेषश्च भवति स्वगुणादिना ॥ ४४३ ॥

मुक्तानां च मिथस्सर्वेशाच्च द्वैतमिवाञ्जसा ।
द्वैतोपमो विशेषश्च भवति स्वगुणादिभिः ॥ ४४४ ॥

द्वैतमिवेत्यनेन भेदोपमो भेदकार्यकारी विशेष उच्यते। गुणादिभिरित्यत्रादिपदेन इन्द्रियादिकं ग्राह्यम् ॥ ४४३ ॥ ४४४ ॥

तत्रैव मोक्षे वैकुण्ठपूर्वके स्वं विजानते ।
परान् जानन्ति भोगांश्च भुञ्जतेऽनुभवन्ति च ॥ ४४५ ॥

स्वानन्दमपि ते बह्वीभवन्त्येकीभवन्ति च ।
यानैश्चरन्ति श्लिष्यन्ति क्रीडन्ति च हसन्ति च ॥ ४४६ ॥

स्वं विजानते इत्यनेन कर्तृकर्मभावघटकविशेषोक्तिः ॥ ४४५ ॥ ४४६ ॥

यत्र मोक्षे सर्वमात्मैवाभूदन्यन्न किञ्चन ।
न द्वैतं न विशेषो वा तत्र ज्ञातृत्वमेव न ॥ ४४७ ॥

दूरेऽभूद्धोक्तृता तस्मादविद्वांस्तमयो न सः ।
विद्याऽस्तमय एवाभूत्स्वज्ञानं च यतोऽस्य न ॥ ४४८ ॥

दूरे इति। भोग्यवस्तुसामान्याभावात् क्रियासामान्याभावाच्चेति भावः ॥

विद्याऽस्तमय इति। स्वपरविषयकत्वात्। 'अविषयत्वे ज्ञानत्वमेव न स्यादि'ति भगवत्पादोक्तेः ॥ ४४७ ॥ ४४८ ॥

नापि दुःखस्य विध्वंसस्सुखस्य ध्वंस एव सः ।
एकाकी रमते नासौ कथं कामांश्च सोऽश्नुते ॥ ४४९ ॥

नापीति। 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेदि'ति वचनाद्दुःखस्योद्रेक एवेति भावः। ध्वंस एवेति सुखसाधनस्य द्वितीयस्याभावात् निर्विशेषे ज्ञाने सुखविषयकत्वरूपविशेषाभावाच्चेति भावः ॥ ४४९ ॥

इत्याक्षिपन्ती शून्यत्वमोक्षं सर्वानपेक्षितम् ।
वैकुण्ठाख्यं महामोक्षं यत्र द्वैतमिवेति वाक् ।
निरणीनयदेवेयं यतो नावर्तते यतिः ॥ ४५० ॥

आक्षिपन्ती प्रामाणिकभोगपरित्यागं अप्रामाणिकनिर्विशेषशून्यात्मकत्वं चेत्यनिष्टद्वयमापादयन्ती। **यत इति** 'यद्गत्वा न निवर्तन्ते तद्धाम परमं मम' इति गीतावचनात् ॥ ४५० ॥

विशेषवीक्षितात्मेति यतो भागवते रमा ।
विशेषाणां चाधिपतिं गृणीते स्वपतिं स्फुटम् ॥ ४५१ ॥

'ॐ नमो भगवते हृषीकेशाय सर्वविशेषवीक्षितात्मने आकूतीनां चित्तानां चेतसां विशेषाधिपतये' इति रमास्तोत्रं [५-१८-१६]। **विशेषेति**। 'स आत्मानमेवावेदहं ब्रह्मास्मीति' इति श्रुत्युक्त द्रष्टृदृश्यभावरूपभेदव्यवहारापादकविशेषाख्यशक्तीत्यर्थः। **विशेषाणां** पदार्थशक्तीनाम् ॥ ४५१ ॥

अतो हरौ विशेषोऽस्ति तन्नियम्यश्च देहिषु ।
कथं नाभूद्विशेषोऽयं यो विशिष्यैव गीयते ।
अतो द्वैतमिवेत्युक्तो द्वैतप्रतिनिधिर्हि सः ॥ ४५२ ॥

गीयते कण्ठोक्त्यैव प्रतिपाद्यते ॥ ४५२ ॥

सारूप्यं चैव सालोक्यं सामीप्यं योग एव च ।
मुक्तिश्चतुर्विधा प्रोक्ता भेदापेक्षा हि साऽखिला ॥ ४५३ ॥

कुचोद्यकृदवद्यार्थी दृश्यमर्थं न पश्यति ।
किं योगार्थकधातूत्थां सायुज्याख्यां
विदुः खलाः ॥ ४५४ ॥

युजिर्योगे सहयुजौ सयुजौ शब्दविन्मते ।
तयोर्भावश्च सायुज्यं कथमैक्यमिहोच्यते ॥ ४५५ ॥

योगः सायुज्यम् । मुक्तिप्रभेदप्रमाणेनैव मुक्तानां मिथो भेदसिद्धिमाह चतुर्विधेति । 'सालोक्यं च सरूपत्वं सामीप्यं योगमेव च' इति भाष्योदाहतगारुडवचनानुसारेण सिद्धेन सायुज्यशब्दस्य संबन्धवाचकयोगशब्दपर्यायत्वेनैव सायुज्यभाजां परमात्मनो भेदसिद्धिरित्याह युजिरिति ॥ ४५३ ॥ ४५४ ॥ ४५५ ॥

उक्तं पुरैव यद्व्याप्ति वक्त्यैक्यपदमित्यपि ।
मुख्यत्वान्यत्वार्थकं च तत्किलातो हतोऽस्यहो ।
अतस्सयुक्तैवासीत्सायुज्यं न त्वभिन्नता ॥ ४५६ ॥

पुरैव गुणसौरभे [श्लो. ५२४-५२७] व्याप्तिं व्याप्त्यैक्यम् ॥ ४५६ ॥

इहाच्युताङ्गगा देवा यन्मुक्तौ च तदङ्गगाः ।
सारूप्यं चैव सामीप्यं सालोक्यं च हरेर्बहिः ।
सदा हर्यङ्गसङ्गस्तु सायुज्यमिति सिद्ध्यति ॥ ४५७ ॥

देवाः अङ्गवबद्धाः । यस्मादङ्गाज्जाताः इहापि संसारे यदङ्गे स्थिताः मुक्तावपि तदङ्गस्थिता एव भवन्ति इत्याह इहेति ॥ ४५७ ॥

नित्यमुक्ताऽपि यस्य श्रीर्नित्यं वक्षसि लक्ष्यते ।
अनित्यमुक्तः को मुक्तो तदैक्यं प्राप्नुयाद्वद ॥ ४५८ ॥

वक्षसीति 'स्वस्याः स्त्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमकरोत्परमं विभूतेः । श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान्' इत्युक्तेः । अनित्यमुक्तः कादाचित्कमुक्तः ॥ ४५८ ॥

प्रलये न लयो यस्याः प्रोद्भवे चास्ति नोद्भवः ।
प्रकृतिः किल या देवी नित्यमुक्ता कथं न सा ॥ ४५९ ॥

प्रलय इति यथोक्तं सूत्रभाष्ये [३-३-४२] 'द्वावेतावनादिनित्यौ अनादियुक्तौ नित्यमुक्तौ अनादिकृतौ नित्यकृतौ योऽयं परमो या च प्रकृतिः' इत्यादि ॥ ४५९ ॥

आद्यः कल्पो यतो ब्राह्मो यद्ब्रह्मप्रलयो लयः ।
अतो रमारमेशौ द्वौ सर्गप्रलयवर्जितौ ॥ ४६० ॥

यौ हि सर्वलये सन्तौ तयोरन्तो न यौक्तिकः ।
अतः प्रागसतस्सत्तासंबन्धश्च न यौक्तिकः ॥ ४६१ ॥

ययोः सृष्टिश्च नष्टिश्च न श्रुता नापि यौक्तिकी ।
लक्ष्मीनारायणौ तौ द्वौ नित्यमुक्तौ न संशयः ॥ ४६२ ॥

सर्गप्रलययोश्चतुर्मुखब्रह्मनामपूर्वकत्वस्यैव प्रमितत्वादपि रमारमेशयोरनादिनित्यत्वसिद्धिरित्याह आद्य इति ॥ ४६० ॥ ४६१ ॥ ४६२ ॥

अतस्त्वां शब्दमर्यादा बाधते बुधसंसदि ।
उक्तरीत्याऽर्थमर्यादाऽप्यनर्थं कुरुते वद (तव) ॥ ४६३ ॥

त्वां ऐक्यवादिनम् । शब्दमर्यादा सायुज्यं सालोक्यं इत्यादिरूपमुक्त्यभिधायकशब्दनिर्वचनेनैव स्पष्टं प्रतीयमानभेदार्थरूपा । अर्थमर्यादा मोक्षस्य परमपुरुषार्थरूपगौरवम् । अन्यथा मोक्षस्य शून्यत्वलक्षणानर्थत्वापत्तेः ॥ ४६३ ॥

प्रागुक्तश्रुतयश्च त्वां निघ्नन्त्यज्ञ पदे पदे ।
अतो मुक्ताश्रयो ब्रह्मरुद्राद्युत्कृष्टचेतनः ॥ ४६४ ॥

श्रुतयः 'उपसंक्रम्य' इत्यादयः 'योगमन्त्रमयाद्यैर्यत्फलत्वेनास्य शंसति' इत्यनुव्याख्यानोक्ताः । 'मुक्तानां परमा गतिः' इति सहस्रनामपठितं अभिधानं च ॥ ४६४ ॥

द्वितीयाद्वै भयमिति सदृशाद्भीतिरुच्यते ।
न चेद्द्वितीयाद्वचनाद्भीस्स्वस्यैव भवेद्ध्रुवम् ।
यदेकाकी न रमत इत्यस्त्यन्यार्थशून्यवाक् ॥ ४६५ ॥

अस्याः श्रुतेरर्थः 'भयं द्वितीयाभिनिवेशतः स्यात्' इति भागवतश्लोकेन व्याख्यातः । तत्रकारः गुणसौरभे [श्लो. ३६०-३८४] विवृतः । अधिकदोषोक्त्यै प्रस्तावयति सदृशात् इति । विरोधिन इत्यपि पूरणीयम् । अन्यथा अनुकूलात्सदृशान्मित्रादेः अधिकाद्वा गुरुपित्रादेर्भयाप्रसक्तेः । व्याख्यातं चैवमेव मायिभाष्येऽपि 'वस्त्वन्तरं प्रतिद्वन्द्विभूतं नास्ति । तस्मिन्नात्मविनाशहेत्वभावे कस्मान्नु बिभेमी'ति । [बृ.शां.भा. १-४२] वचनात् । 'स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत्' इति तत्प्रकरणस्थात् निरवकाशवाक्यात् ॥ ४६५ ॥

द्वितीयादाश्रमान्नृणां भयं स्याद्बहुसंसृतेः ।
अतस्तृतीयं तुर्यं वा प्रथमादाश्रमाद्व्रजेत् ॥ ४६६ ॥

इदं तु वाक्यं चतुर्दशार्थान्तरपरतया सावकाशमित्याह द्वितीयादाश्रमादित्यादिभिः । गृहस्थाश्रमादित्यर्थः । नृणां अजितेन्द्रियाणाम् । 'जितेन्द्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यम्' इत्युक्तेः । व्रजेत् वैराग्यपरिपाकानन्तरम् इति शेषः । 'भयं प्रमत्तस्य वनेष्वपि स्यात्' 'यदहरेव विरजेत् तदहरेव प्रव्रजेदि'त्याद्युक्तेः ॥ ४६६ ॥

इति वा सा श्रुतिर्वक्ति पुण्यपापाख्ययोर्द्वयोः ।
द्वितीयाद्धि भयं दुःखं नरकाद्यन्ततस्सुधीः ।
प्रथमं धर्ममेवैकं भजेद्द्वन्द्वसहोऽन्वहम् ॥ ४६७ ॥

'पुण्यपापे विधूय' 'उभे सुकृतदुष्कृते' इत्यादौ पुण्यस्य अभ्यर्हितत्वेन प्रथमतः परिगणनात्तदनुसारेण निर्दिशति पुण्येति । द्वंद्वसहः शीतोष्णादितितिक्षावान् । तद्विफलीकारीति यावत् ॥ ४६७ ॥

इति वा वक्ति सत्सङ्गं शंसन्ती मोक्षकारणम् ।
द्वयोः सदसतोर्नृणां द्वितीयाद्वा भयं जगौ ॥ ४६८ ॥

शंसन्तीति 'महत्सेवां द्वारमाहुर्विमुक्तेः तमोद्वारं योषितां सङ्गिसङ्गम्' इत्यादिप्रमाणानुसारेणेति भावः ॥ ४६८ ॥

एवं द्वितीयाज्जगतो भयं मृत्युर्यतो नृणाम् ।
तन्मृत्युभयभङ्गाय प्रथमं पुरुषोत्तमम् ॥ ४६९ ॥

भजेदनन्यभक्तस्सन्निति वा शास्ति सज्जनान् ।
इति सामान्यवाग्वक्ति मोक्षहेतुपरंपराम् ॥ ४७० ॥

जगतः अभिनिवेशविषयाद्देहगेहादेः । प्रथमं 'स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्वमिष्यते' इति स्वतन्त्रतया तत्त्वसंख्यानावसरे प्रथमतः परिगणनीयम् ॥ ४६९ ॥ ४७० ॥

न चेद्द्वितीयाद्वचनात्स्वस्याभयमितीरितम् ॥ ४७१ ॥

भयं व्याहतिरूपम् ॥ ४७१ ॥

एकद्वितीयतो भीता साऽतिभीतेति मे मतिः ।
बहूनां भेदवाक्यानां युक्तीनां च पराक्रमात् ॥ ४७२ ॥

द्वितीयात् इति समुदायैकवचनमुपेत्य व्याख्याति **बहूनां इति**। तदुक्तं शाङ्करभाष्ये 'न केवलमुपनिषदो ब्रह्मात्मैकत्वं प्रतिपादयन्त्यः स्वार्थविघातं कर्मकाण्डप्रामाण्यविघातं च कुर्वन्ति। प्रत्यक्षादिनिश्चितभेदप्रतिपत्त्यर्थप्रमाणैश्च विरुध्यन्ते' इति [बृ.शां.भा. २-१-२०] ॥ ४७२ ॥

चिदचिद्रूपजगता सर्वेणैक्यं यदीष्यते ।
द्वितीयतो भयं तर्हि द्वितीयार्थाच्च पूर्वभीः ॥ ४७३ ॥

इष्यते 'सर्वं खल्विदं ब्रह्मे'ति वाक्यानुसारेण द्वितीयादित्यस्य चिदचिदात्मकाद् द्वितीयादित्यर्थो यद्यभिप्रेयते। **द्वितीयतः** चिदचितोर्मध्ये द्वितीयादचेतनेनैक्यात्। **भयं** अपसिद्धान्तरूपम्। अचेतनस्य मिथ्यात्वेन तदैक्याङ्गीकारे सिद्धान्तविरोधः। अथ तद्दोषपरिजिहीर्षया अचेतनप्रपञ्चस्य ऐक्यं नाम ब्रह्मव्यतिरेकेणाभाव इत्येवार्थो यद्याश्रीयते तर्हि चेतनरूपप्रथमांशेऽपि तस्यैवार्थस्याश्रयणीयताऽपत्त्या **पूर्वभीः** चेतनानामपि मिथ्यात्वापत्तिः। तथा च पुनरागतः स एव अपसिद्धान्तः दुरात्मा पिशाचः इति भयम् ॥ ४७३ ॥

अर्थद्वये द्वितीयार्थाद्विरम्यव्यापृतिर्भयम् ॥ ४७४ ॥

अर्थद्वये चेतनांश ऐक्यं, अचेतनांशे व्यतिरेकेणाभावः इत्यर्थद्वयाश्रयणे। सकृदुच्चरितः शब्दः सकृदेवार्थमवगमयतीति न्यायमवधीर्य क्रमेणार्थद्वयाभिधायकत्वाङ्गीकार इति यावत्। **भयं** चेतनव्यापारस्याचेतनेऽङ्गीकाररूपम् ॥ ४७४ ॥

मुच्यमानाणुना चैक्यमुच्यमानमनीदृशि ।
द्वितीयात्ते भयं दद्यात्तस्मादस्माद्विलक्षणात् ॥ ४७५ ॥

अणुनेति अल्पज्ञत्वाल्पशक्तिपारतन्त्र्यादिसाक्षिसिद्धधर्मोपलक्षणम्। **अनीदृशि** निर्दोषश्रुतिसिद्धसर्वत्राखिलसच्छक्तिस्वातन्त्र्याशेषदर्शनादिविलक्षण–धर्मोपबृंहिते। **द्वितीयात्** द्वितीयतया निर्दिष्टात् ब्रह्मणः। **अयं** मिथ्याज्ञाननिमित्तकं तमोरूपम् ॥ ४७५ ॥

सत्त्रैविध्यं यदिष्टं ते द्वितीयाद्वै भयं तदा ।
स्यादाद्यब्रह्मणो नो चेद्द्वितीयाद्वादिनो भयम् ॥ ४७६ ॥

यदीति। सत्त्रैविध्यमङ्गीक्रियते चेदित्यर्थः। **द्वितीयात्** व्यावहारिकसत्त्वात्। **भयं** श्रुत्युक्तसत्यत्वाविशेषेण ब्रह्मणोऽपि तदङ्गीकाररूपम्। **नो चेत्** सत्यत्वं अबाध्यत्वमेवेति चेदङ्गीकारः। **भयं** कथायां तत्त्ववादिभिर्निग्रहरूपम् ॥ ४७६ ॥

इत्थं रज्जुभ्रमात्सर्पग्राही त्वं हा हतोऽस्यहो ॥ ४७७ ॥

हा हतोऽसि त्वदुपात्तश्रुत्यैव प्रतिहतोऽसि। **रज्जुभ्रमादिति** पूतनेवेति ध्वनिः। यथोक्तं 'अनन्तमारोपयदङ्कमन्तकं यथोरगं सुप्तमबुद्धिरज्जुधीः' इति [भा १०–६–८] ॥ ४७७ ॥

द्वितीयाद्देहगेहादेर्भयं स्यात्तेन तं त्यजेत् ।
इत्येवार्थः श्रुतेर्वाच्यो बन्धोच्छित्त्यै दृगर्थिभिः ।
गुरुमेवाभिगच्छेदित्यादिवाक्यार्थवेदिभिः ॥ ४७८ ॥

देहगेहादेरिति 'आत्मनो देहगेहादि द्वयशब्देन भण्यते' इति भागवततात्पर्योक्तेः। **त्यजेत्** 'उपरतः' विषयालंबुद्धिमान् 'गुरुमेवाभिगच्छेत्' इत्युक्तस्य गुरूपसत्तावधिकारस्य सिध्यर्थं देहगेहादौ आत्मीयतया विद्यमानत्वाभिमानं परित्यजेत् ॥ ४७८ ॥

द्वितीयाद्ब्रह्मविज्ञानाद्भयं भवति संसृतेः ।
इत्यर्थो वाऽत्र तच्छ्लाघ्यस्समित्पुस्तकपाणिभिः ॥ ४७९ ॥

द्वितीयात् जिज्ञासानन्तरं जायमानात्। भयं अपसारणं व्याघुट्टनं च। संसृतेः 'अथान्ये प्रकृती दुष्टे नृषु प्रातिस्विकं स्थिते' इत्युक्तप्रकृतिद्वयात्मकस्य ॥ ४७९ ॥

किञ्चाबिभदिति ब्रह्मभयमुक्त्वा पुनः श्रुतिः।
तेनैकाकी बिभेतीति तत्र कारणमाह च ॥ ४८० ॥

तस्मादेकाकितायां च भीत्युक्त्या तां च सन्त्यज।
द्वितीयमैच्छदिति च वचो हन्ति तवेप्सितम्॥ ४८१ ॥

तेनेति। लोकन्यायप्रदर्शनार्थम्। वस्तुतस्तु चतुर्मुखेन भयप्रदर्शनं विष्णुप्रीत्यर्थमेवेति भावः। **तां** एकाकिताम्। **संत्यज** सत्सङ्गं संपादेति यावत्॥ ४८० ॥ ४८१ ॥

अनुकूलं द्वितीयं तच्छ्रुतिश्च न निषेधति।
रक्षोभूतपिशाचादिद्वितीयं भयदं जगौ।
कस्मान्वहं बिभेमीति भीषकाभाववाङ्न किम्॥ ४८२ ॥

भयजनकतावच्छेदकं रूपं हीनबलत्वाभावे सन्ति प्रतिकूलत्वमेवेत्याह **रक्ष इति।** भयजनकत्वेऽपि रक्षोभूतादीनां अर्थक्रियाकारित्वेन सुतरां सत्यत्वमेव सेत्स्यति न त्वेव त्वदभिलषितं मिथ्यात्वमित्यपि हृदयम्॥ ४८२ ॥

एकाकी चेन्न रमते तेनैच्छत्स द्वितीयकम्।
इति वागुपसंहर्त्री संहर्त्री तव दुर्धियः ॥ ४८३ ॥

उपक्रमापेक्षया द्वितीयात् स्वभावतः प्रबलाद्विरुद्धादुपसंहारात्त्वदर्थस्योपक्रमोक्तस्य भयं इत्याशयेनाह **उपसंहर्त्रीति**॥ ४८३ ॥

अतः प्रकरणं मन्द हन्ति वादरणं तव।
जिह्वारूपं प्रकृष्टं ते करणं वा निहन्त्यहो।
भयं द्वितीयाद्वचनादित्युक्तं सूक्तमेव तत् ॥ ४८४ ॥

साहित्यमुद्रया रञ्जयति **अत इति।** प्रकरणेत्यत्र प्रशब्दोक्तप्रकर्षस्य केवलरणरूपे वादरणे वा केवलकरणरूपजिह्वायां वाऽभावादिति भावः। प्रकृष्टमिति प्रथमान्तं पूर्वार्धे प्रकरणमित्यनेनान्वेति॥ ४८४ ॥

स्वाखण्डवादखड्गेन मृतमृत्यै न मे कृतिः।
स्वयूथ्यानां मनस्तृप्त्यै भक्त्यै मुक्त्यै
च केवलम्॥ ४८५ ॥

स्वाखण्डवादेति। संसर्गासङ्गिधीजनकत्वं श्रुतीनामिति मायावाद्यभिमतवादेत्यर्थः। **मृतेति।** ऐक्यादिसंसर्गाबोधकत्वेन स्वानङ्गीकारेणैव पराहतेत्यर्थः। **तृप्त्यै** चित्ते सिद्धान्तश्रद्धास्थिरीकरणार्थम्॥ ४८५ ॥

सामानाधिकरण्याद्वा नानात्वक्षेपतोऽपि वा।
ऐक्यसिद्धिस्त्वखण्डार्थवादे नाभूत्तवैव हि ॥ ४८६ ॥

तवैवेति महावाक्यानां बोधजनकत्वमेव नेति वा बोधकत्वेऽपि चिन्मात्रबोधकत्वमिति वा तव सिद्धान्तत्वेन सर्वथा ऐक्यरूपसंसर्गधीजनकत्वानभ्युपगमादेवेति भावः॥ ४८६ ॥

सर्वज्ञाल्पज्ञयोरैक्यं नास्त्येवेति तु यो वदेत्।
ऐक्यस्य ब्रह्मरूपत्वाद्ब्रह्मवागैक्यवागिति।
कथं तं प्रत्युत्तरं स्यान्निर्मूलोऽस्ति न वै तरुः॥ ४८७ ॥

जीवब्रह्मणोरैक्यमिति तरोर्जीवब्रह्मस्वरूपं मूलम्। त्वया भागत्यागलक्षणाश्रयणेन तयोः स्वरूपलक्षणमुण्डनेन मूलमेव समुत्खातितम्। अत ऐक्यं वार्तामात्रमेवेत्याह **सर्वज्ञेति।** **ब्रह्मरूपत्वात्** चिद्रूपत्वात्। **तं** भेदवादिनं अभेदनिषेधकं प्रति। **उत्तरमिति।** त्वद्वाक्यानां भेदापक्षेपे अभेदोपक्षेपे वाऽक्षमत्वादेवेति भावः। तदुक्तं वादावल्यां 'निराश्रयस्यैक्यस्यानिर्वाहात्। निर्वाहे वा ब्रह्मैक्यवादस्तुच्छाद्वैते पर्यवस्येदि'ति॥ ४८७ ॥

अन्यथा शशशृङ्गस्य चिद्रूपत्वाच्चिदुक्तितः ।
शशशृङ्गं च स कथं त्वां प्रत्येव न साधयेत् ॥ ४८८ ॥

सः चिद्रूपमात्रवादी वाक्यतरुः ॥ ४८८ ॥

ऐक्यस्य ब्रह्मरूपत्वं मायावादी वदेदपि ।
परं प्रत्यैक्यसिद्ध्यर्थं नैवमाह सुधीर्ह्यसौ ॥ ४८९ ॥

आहेति । चित्स्वरूपत्वेनैक्यस्य अवेद्यत्वादिति भावः । सुधीरिति विपरीतलक्षणया । अवेद्यत्वं वदन् पुनस्तत्साधनाय प्रमाणान्युपन्यस्यन् महोन्मत्त एवेत्यर्थः ॥ ४८९ ॥

अतस्सर्वगुणैर्विष्णुर्मुक्तं कुर्यात्कथं समम् ।
ततोऽपि नैक्यं साम्यं तु किञ्चित्साम्यमितीरितम् ॥ ४९० ॥

किलामृतस्यैष सेतुर्मुक्तानां परमा गतिः ।
सोऽमृतस्याभयस्येशः कृष्णो मुक्तैः किलेज्यते ॥ ४९१ ॥

'कथं च यः पूर्वमसौ न पश्चाद्भवेत्स एवेति च युक्तिमेति । यतो न दृष्टं यदभून्न पूर्वं पश्चात्तदासेति कुतश्च किञ्चित्' इत्यनुव्याख्यानं हृदि कृत्वाऽऽह **अत इति** ॥ ४९० ॥ ४९१ ॥

इति श्रुतिपुराणानि सेतिहासानि सर्वतः ।
गर्जन्त्यन्ये महित्वं ते नाश्नुवन्तीति हि श्रुतिः ।
अप्यर्वाग्वृत्तयो यस्य महित्वे स्वभुवादयः ॥ ४९२ ॥

महित्वमिति । 'परो मात्रया तन्वावृधान न ते महित्वमन्वश्नुवन्ति' इति वाक्यं संगृहीतम् । 'अप्यर्वाग्वृत्तय' इति भागवतम् ॥ ४९२ ॥

ब्रह्मेशानादिभिर्देवैर्यत्प्राप्तुं नैव शक्यते ।
तद्यत्स्वभावः कैवल्यं स भवान्केवलो हरिः ॥ ४९३ ॥

इति भागवतोक्त्या च ब्रह्माद्यैर्नैव लभ्यते ।
यस्य स्वभावस्तद्भावं मर्त्यः को गन्तुमर्हति ॥ ४९४ ॥

मर्त्यः मृत्युग्रस्तः तद्विपरीतस्वभावः ॥ ४९३ ॥ ४९४ ॥

गिरो निरवकाशायास्सावकाशा हि किङ्करी ।
अतस्तदध्वनैवासौ गच्छेन्न तु कदध्वना ॥ ४९५ ॥

सावकाशा, 'सादृश्ये चैक्यवाक् सावकाशा यथेष्टतः' इति भगवत्पादोक्तेः ॥ ४९५ ॥

तस्मात्सर्वेश्वरो विष्णुर्भूतभव्यभवत्प्रभुः ।
मुक्तामुक्तजगन्नाथो भक्त्याऽऽराध्य
इति स्थितम् ॥ ४९६ ॥

ईश्वरः ईशनशीलः ॥ ४९६ ॥

या धात्रादिजगद्धात्री ख्याता तैर्वन्दितार्चिता ।
मुक्तामुक्तजगन्माता सा श्रीर्मङ्गलदेवता ॥ ४९७ ॥

सा अंभ्रणी । धात्री 'अहं धात्री सङ्गमनी' इत्युक्तेः । माता 'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यहम् । संभवः सर्वभूतानां ततो भवति भारत' इति गीतोक्तेः । मङ्गलदेवता मङ्गलानां मङ्गलं' इत्युक्तस्य विष्णोः प्रिया । मङ्गला च सा देवता इति वा । ब्रह्मादिजगतः मङ्गलप्रदा देवतेति वा । 'देवी भाग्यात्मिका नृणामि'ति भगवत्पादोक्तेः ॥ ४९७ ॥

जयति श्रीरमाकान्तो जयति श्रीश्च तत्प्रिया ।
श्रीश्रीशभक्तो जयति मध्वो विध्वस्तसाध्वसः ॥ ४९८ ॥

जयति सर्वोत्कृष्टो वर्तते । मुक्तिप्रदानेन संसारभयं अभिभवति । 'ज्ञानिनां मोक्षदश्च सः' इति श्रुतेः । तत्प्रिया इति हेतुगर्भं विशेषणम् । श्रीर्यत्कटाक्षबलवती इत्युक्तेः । जयति भगवदितरेभ्यः उत्कर्षवती । एवं संसारदुःखाभिभवेन मुक्तिप्रदा ।

'श्रियं वसाना अमृतत्वमायन्त्रि'ति श्रुतेः। **भक्त इति** निरुपपदशब्देन महाभागवतप्रबर्ह इत्युक्तो भवति। अत एव जयति जीवराशिषु उत्कर्षवान्। मोक्षदानेन भवभयाभिभवहेतुश्च। 'वायुश्च तदनुज्ञया' इत्युक्तेः। तदेवाह विध्वस्तसाध्वस इति ॥ ४९८ ॥

षष्ठेऽष्टकेऽन्तिमाध्यायद्वयमारभ्य सप्तमे ।
पवमानः पूयमानस्सोमश्चोक्तः पदे पदे ॥ ४९९ ॥

मध्वाख्यो मारुतस्य तृतीयावतार इत्येतन्मन्त्रसिद्धमिति समर्थयते **षष्ठे** इत्यादिभिः। तात्पर्यावधारणयोपक्रमं तावदाह **पवमान इति**। पवते इति पवमानः। उत्तरत्र (श्लो. ५०७) तथैव वर्णनात्। **पूयमानः** पवित्रीकरणसमर्थः। अत एव 'हंसाय तस्मै शुचिषद्मने नमः' इति भागवते वायोः परमात्मसद्मनः शुचिरिति संज्ञा। तं प्रति 'पांसवोऽस्मान्पुनन्तु' इति शुद्धिप्रार्थना च। श्वासनियामकत्वात् जगत्प्रसवितृत्वात् ऐश्वर्यवत्त्वाद्वा सोमः। सु प्रसवैश्वर्ययोरिति धातुः। 'मारुतिं प्राणिनां प्राणभूतं नन्दयामो वयं नन्दतीर्थं', 'पितरतुलगुरो', 'पीठे रत्नोपक्लृप्ते' इति वर्णितत्वात् ॥ ४९९ ॥

स मध्व इति तत्रैव पवमानस्य मध्वता ।
यत्स्पष्टं श्रूयते तस्मान्मध्वाख्या मारुती तनुः॥ ५०० ॥

तत्रैव अध्यायसप्तके पूयमानविषये वा। **तस्मात्** मध्वरूपश्रुतिसद्भावात् प्रकरणसद्भावाच्च ॥ मध्वः मारुतीतनुरिति भावः ॥ ५०० ॥

वेविजानः पृथक्कुर्वन्स मध्वः पञ्चधा जगत् ।
पृथग्भावातिशयवाग्विजे रूपमिदं यतः ॥ ५०१ ॥

'स पूर्वः पवतेयम् दिवस्पतिरिश्येनो मथायदिषितस्तिरोरजः। स मध्व आयुवते वेविजान इत्कृशानोरस्तुर्मनसा ह बिभ्युषा। तेनः पूर्वास उपरास इन्दवो महेजाय धन्वन्तु गोमते। ईक्षेण्यासो अह्यो ३ न चारवो ब्रह्मब्रह्मये जुजुषुर्हविर्हविः' इति ऋग्द्वयं मध्वश्रुतिघटितं पूर्वोक्तप्रतिज्ञासाधनाय व्याख्याति। **वेविजान इति**।

विजः विजृ पृथग्भाव इति धातोः **इदं** वेविजान इति पदम्। **पृथक् कुर्वन्** 'जीवेशयोर्भिदा चैव जीवभेदः परस्परम्। जडेशयोर्जडानां च जडजीवभिदा तथा। पञ्च भेदा इमे नित्याः सर्वावस्थासु सर्वदा' इति प्रमाणोदाहरणेन समर्थयमानः ॥ ५०१ ॥

मिश्रोऽमिश्रश्च भवति सदा सुजनदुर्जनैः ।
युमिश्रणामिश्रणयोरिति धात्वर्थता द्वयोः ।
सख्यं नावैष्णवैर्यस्य प्रतीपो नैव वैष्णवे ॥ ५०२ ॥

आयुवते यु मिश्रणामिश्रणयोरिति धातोः सज्जनैर्मिश्रः दुर्जनैरमिश्रश्च भवति। 'व्याप्तिर्यस्य निजे निजेन महसे'ति 'व्यावृत्तिश्च विपक्षत' इति चोक्तेः। बहुवचनं बहुरूपत्वतः ॥ ५०२ ॥

इत्थं कृशानोरसनशीलोस्तुः प्रलये सति ।
मनसा भीषकेणोग्रो वाया वायुवते सह ।
सत्यर्थे बहुतैकस्यैवास्ति यद्व्यत्ययस्ततः ॥ ५०३ ॥

कृशानोः प्रलयकालीनस्य ब्रह्माण्डावरणभूताग्नेः। अस्तुरित्यस्यार्थः **असनशील इति**। व्युत्क्रमेण अग्नेर्वायौ लयात्। 'हतरूपं तु तमसा वायौ ज्योतिः प्रलीयते' इति भागवतोक्तेः(११-३-१३)। **बिभ्युषा** भीषकेण **मनसा** चित्तेन सहितः संहारकरूपत्वात्। आयुवते इत्येतदत्रापि संबध्यते। संहाराय सर्वतो दिक्षु मिश्रितो भवति। पूर्ववद्बहुरूपत्वाद्बहुवचनम्। व्यत्यय **इति** 'व्यत्ययो बहुलं छन्दसि' इति सूत्रात् ॥ ५०३ ॥

ते वायोरवतारा नः पूर्वासो गुरुतां गताः ।
उपरासोऽपरासश्च प्रलये मुक्तिदायकाः ॥ ५०४ ॥

पूर्वासः ज्ञानोदयात्पूर्वं उपदेष्टृतया प्रेरकतया च विद्यमानाः। सत्ताप्रदवायुनामकचेष्टापदप्राणनामकधारणाप्रदधर्मनामकरूपैः हृदि स्थिताः। **अपरासः** ज्ञानोदयानन्तरं मुक्तिप्रदभक्तिनामकरूपेण हृदि स्थिताः ॥ ५०४ ॥

इन्दवश्चेष्टदातृत्वात्परमैश्वर्यतोऽपि वा।
महेति महते वाजायान्नाय ज्ञानगोमते।
धन्वन्तु धनदास्सन्तु धनधान्य इतीरणात् ॥ ५०५ ॥

इन्दवः भक्तिज्ञानाद्यैश्वर्येण सहभोगसंपदा च समृद्धाः स्वेष्टरमापते-रुपदेष्टारश्च। अन्नाय ज्ञानयज्ञार्थं अपेक्षिताय गुरुशिष्याणां पोषकान्नाय ॥ ५०५ ॥

प्रसिद्धिं लौकिकीं सौत्रीं चाह रूपद्वयेऽस्य हा।
इत्यर्थोऽत्र यतस्स्पष्टं दृश्यते पदसंपदा ॥ ५०६ ॥

लौकिकी 'पितरतुलगुरो' इत्यादिरूपा। सौत्री ॐ इयदामननात् ॐ विपर्ययेण तु क्रम इत्यादिरूपा ॥ ५०६ ॥

पवमानेति सोमेति प्राक्प्रस्ताव्यैव यं श्रुतिः।
सोमः पवत इत्याह सन्सोमो मारुतो ध्रुवम्।
पवते नस्स किं नाभूत्पवमानो विदां मते ॥ ५०७ ॥

प्रस्ताव्येति तत्प्रकारः (श्लो. ५००) प्राक् प्रदर्शित इति भावः। श्रुतिः 'अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये बृहते। तदुशन्ति विश्व इमे सखायस्तदहं वश्मि पवमान सोम।' इत्येवंरूपा। अत्र खलु वायोः सखिभिः सुरैः स्वस्वामिनं वायुं प्रति बाह्याभ्यन्तरशत्रुनिग्रहाय स्वस्तये च प्रार्थनोच्यते 'अयि स्वामिन् दुष्टान्दमय दमय व्यक्तमचिराद्गुणान्गूढान्विष्णोः कथय कथय स्वान्प्रमदयन्' इति। तेन च एतत्प्रकरणोक्तो मध्वः पवमानो वायुरेवेति निश्चीयते इति भावः ॥ ५०७ ॥

प्रसेनानीरिति श्रुत्या यद्भीमहनुमत्कथा।
स्पष्टं निरूपिताऽत्रैव तत्सोमस्सोमवंशजः ॥ ५०८ ॥

अग्रे रथानां सेनानीश्शूरोऽसौ भुवि यस्तदा।
एति प्रहर्षते भीमसेनसेना तदा किल।
भीमसेनो ह्यसौ सेनानीत्वं यत्तस्य शोभते ॥ ५०९ ॥

कवीन्द्रयादवेन्द्राद्धानोचितान् सुरराट्स्तुतान्।
भद्रान्पराक्रमान्कुर्वन्युवराजपदे स्थितः ॥ ५१० ॥

सखिभ्यो विष्णुभक्तेभ्यो वस्त्रावस्त्राणि संभ्रमाः।
युतानि च समन्तात्स दत्ते किल दिने दिने ॥ ५११ ॥

'प्रसेनानीः शूरो अग्रे रथानां गव्यं नेति हर्षते अस्य सेनाः। भद्रान्कृण्वन्निन्द्र ह वांत्सखिभ्य आ सोमो वस्त्रा रभसानि दत्त' इति श्रुतौ भीमसेनस्य प्रकृष्टसेनानायकत्वं स्वसेनाप्रहर्षकत्वं युवराजपदे स्थित्वा विष्णुभक्तेभ्यो वस्त्रादिदातृत्वं संवर्ण्यते। एवं हनूमतो वानरसेनानायकत्वं तत्प्रहर्षकारणत्वं लङ्कादाहाय पुच्छपिधानाय शत्रूणां वस्त्रसंचयमादाय सखिभ्यो मरुत्सुहृद्भ्यः अग्निभ्यः प्रदानं चेति महिमा निरूप्यते। एवं मध्वस्य वैष्णवधुरन्धरत्वं मुकुन्दगुणवर्णनेन साधुवृन्दानन्दसन्दायित्वं, मोक्षे संकल्पमात्रेण वस्त्रादिदानं चेत्येवमनुभावातिशयः प्रतिपाद्यते। एतेन विष्णुभक्ताग्रणीत्वरूपस्य चरित्रसाम्यस्य शंसनेन वायोरेवैतदवतारत्रयमिति सुस्फुटमित्याशयेन श्रुत्यर्थं विविनक्ति अग्रे इत्यादिभिः॥ सेनानीत्वमिति 'अस्मिन्युद्धे भीमसेन त्वयि भारः समाहित' इति कृष्णवचनात् ॥ ५०८ ॥ ५०९ ॥ ५१० ॥ ५११ ॥

इति भीमं स्तौति सैव हनूमन्तं च शंसति।
एकप्रकारकार्यत्वादेकरूपत्वतोऽपि वा ॥ ५१२ ॥

एकप्रकारेति। भगवत्कार्यसाधकत्वरूपेत्यर्थः ॥ ५१२ ॥

भद्रान्कृण्वन्कवीन्द्रस्य राघवेन्द्रस्य वा प्रभोः।
आह्वानार्हान्निजगुणान्सखिभ्योऽर्थे रिपोः पुरीम्।
गत्वा वस्त्राणि चादत्ते रभसानि किल द्विषाम् ॥ ५१३ ॥

स्वबालासक्तवस्त्राणि सखिभ्योऽग्निभ्य एव वा।
आसमन्ताद्विभुर्दत्ते प्रागादत्ते च तत्कृते ॥ ५१४ ॥

द्विट्पुरीदाहपूर्वांश्च सीतास्थेन्द्रस्य तोषदान्।
भद्रान्पराक्रमान्कुर्वन्वनभङ्गादिकान्प्रभुः ॥ ५१५ ॥

अग्रे रथानामित्यादि योज्यमस्मिंश्च पूर्ववत्।
स सोमः पवमानोऽस्मद्धनूमान्वा भविष्यति॥ ५१६ ॥

'इंद्रहवान्' इति श्रौतपदस्यार्थः 'यादवेन्द्रः राघवेन्द्रः कवीन्द्र' इति विष्णो रूपत्रयम् ॥ ५१३ ॥ ५१४ ॥ ५१५ ॥ ५१६ ॥

मतीनां जनिता विष्णोर्जनिता यः श्रुतौ श्रुतः।
विप्राणामृषिरित्युक्तः स मध्व इति च श्रुतः ॥ ५१७ ॥

अत्र सर्वत्र सोमपदोक्तो मध्व एवेत्येतच्छुत्यन्तरेण साधयति **मतीनामिति** 'सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः। जनिताऽग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥ ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम्। श्येनो गृध्राणां स्वधितिर्वनानां सोमः पवित्रमत्येतिरेभन्' इति श्रुती व्याख्याति। जनितेत्यस्य सर्वत्र यथायोग्योऽर्थः ध्येयः। जनिता उपदेष्टा **विष्णोः** 'तस्माद्विष्णुरिति यजमानस्य यज्ञस्य वा नाम। तौ सोमाद्भवत इति सोमो जनितोत विष्णोरित्युच्यते इत्यादिव्याख्येयमिति' इति सुधानुसारेणार्थो ध्येयः ॥ इति च श्रुत एक एव भवेदित्युत्तरेणान्वयः ॥ ५१७ ॥

एक एव भवेद्विष्णुर्मतिं विप्रेषु योऽदिशत्।
विष्णोः प्रमापनाल्लोके स विष्णोर्जनिता श्रुतः ॥ ५१८ ॥

विष्णोरित्यस्य परममुख्यार्थत्वमुपेत्याह **विष्णोरिति।** अस्मिन्पक्षे जनितेत्यस्यार्थः प्रमापनादिति ॥ ५१८ ॥

यस्ता विजानात्स पितुः पितेत्यस्ति यतः श्रुतिः।
देशकालगुणव्याप्तविष्णोर्जन्मेदमेव हि।
यतः प्रागसतस्सत्ता कालव्याप्ते न शोभते ॥ ५१९ ॥

प्रमापयितरि जनिता पिता इति शब्दप्रयोगे श्रुतिसंमतिमाह **य इति। न शोभते इति।** 'प्रीत्या मोक्षपरस्यास्य तात्पर्यं नैव दूषणे' इत्यनुव्याख्यानोक्तेः ॥ ५१९ ॥

द्यावापृथिव्यादिजन्महेतुत्वं ब्रह्मणो गुणम्।
ऐक्याद्घटयितुं ब्रह्मा देवानामिति तं जगौ ॥ ५२० ॥

ऐक्यात् 'एको ब्रह्मा च वायुश्च' इति श्रुतेः ॥ ५२० ॥

बाधाभावे तु वाक्यानामर्थो वाच्यो यथाश्रुतः।
बाधितार्थं तु यद्वाक्यं तत्संबन्धादिकं वदेत् ॥ ५२१ ॥

वदेदिति। तद्गुणसारत्वादिति सूत्रोक्तदिशेति भावः ॥ ५२१ ॥

अथवा पवनं नाम मरुतो गमनं किल।
मतीनां जन्म किं तेन दिवो जन्म भुवश्च किम्।
विष्णोर्जन्म ततः किं स्यात्तत्र तत्रोपदेशनात् ॥ ५२२ ॥

मध्वाख्यदिव्यरूपेण मतीनां जनकोऽप्यभूत्।
द्युभ्वादेर्जनकश्चाभून्मिथ्यात्वप्रविमोचनात् ॥ ५२३ ॥

नीचैक्यनिर्गुणत्वादेर्निराकरणतः प्रभोः।
विष्णोश्च जनकोऽप्यासीद्भयत्राता पिता किल ॥ ५२४ ॥

मध्वावतार एव द्यावापृथिव्यादिजनकत्वं घटयितुमाह **मिथ्यात्वप्रविमोचनादिति।** विष्णुविषयकमिथ्याज्ञानप्रसक्तदुर्गतिभयात्सज्जनानां त्राणमेव उपचारेण विष्णुत्राणमित्यत्र स्मृतिप्रसिद्धिमाह **किलेति।** 'भयात्त्राता पञ्चैते पितरः स्मृताः' इति वचनात् ॥ ५२२ ॥ ५२३ ॥ ५२४ ॥

स्वस्य स्वजगतश्चेत्थं स्थापनात्परितुष्यता।
सत्यलोकाधिपत्ये च दत्ते ब्रह्माऽपि सोऽभवत् ॥ ५२५ ॥

पूर्वोक्तं ब्रह्मैक्यमप्यनेनैव विवृतमित्याह **स्वस्येति** ॥ ५२६ ॥

विप्राणामृषिरप्यासीद्यस्तानित्थमशिक्षयत् ।
स एव बलदेवोऽभूद्यद्बलाद्बलिनां बलम् ॥ ५२६ ॥

बलिनां महिषश्येनकुठारादीनाम् ॥ ५२६ ॥

अत्येति मोक्षपदवीर्यन्मोक्षाध्वसु षोडशः ।
कालचक्रं च सोऽत्येति यतस्सर्वोच्चलोकगः ।
स रेभन्मेघगम्भीरनादी यत्प्रतिगर्जति ॥ ५२७ ॥

षोडशः प्राप्येषु मार्गदेवेष्विति भावः ॥ कालचक्रं ज्योतिश्चक्रम् । अत्येतीत्यस्य विवरणं यत इति । रेभन्नित्यस्यार्थः मेघेति 'वायुर्भीमो भीमनादो महौजा' इत्युक्तेः ॥ ५२७ ॥

एवं प्रत्युक्तिसद्रत्नमालाऽलङ्कुरुते गुरुम् ।
इति वा वाक्यसन्दर्भस्यार्थो यौक्तो भविष्यति ॥ ५२८ ॥

पवमानः पूयमानो वायुस्सर्वस्य संमतः ।
तत्सूक्ते सहतेनोक्तस्सोमोऽन्यो न पदे पदे ।
समानाधिकृतत्वं यद्वस्त्वैक्यस्य प्रमापकम् ॥ ५२९ ॥

समानाधिकृतत्वं 'मतीनां जनिता' (श्लो. ५१७) इति पूर्वोक्तम् ॥ ५२८ ॥ ५२९ ॥

प्रावीविपदिति श्रुत्याऽप्येषोऽर्थस्स्पष्टमीर्यते ।
गिरः सिन्धुस्स मध्वाख्यो मनीषाश्च मनोरमाः ॥ ५३० ॥

वाचश्चोर्मिं नोर्मिमिव सोमस्सोमाभिमानवान् ।
पवमानो मुख्यवायुरवतीर्णो महीतले ॥ ५३१ ॥

'प्रावीविपद्वाच ऊर्मिं न सिन्धुर्गिरः सोमः पवमानो मनीषाः । अन्तः पश्यन्वृजने मावराण्या तिष्ठति वृषभो गोषु जानन्' इति श्रुतिं व्याख्याति गिरः सिन्धुरिति 'उत्तुङ्गवाक्तरङ्गाय मध्वदुग्ध्याब्धये नमः' इत्युक्तेः ॥ ५३० ॥ ५३१ ॥

प्रावीविपद्विशेषेण प्रावर्तयदिति स्फुटम् ।
अर्थः प्रतीयते सर्वैः प्रवृत्त्यर्थो यतो विपिः ॥ ५३२ ॥

मनीषाः वाचः प्रावीविपदिति योजना । मनसामिष्टा वेदसूत्रादिवाचः ऊर्मिमिव सज्जनेषु प्रावर्तयत् ॥ ५३२ ॥

गोषु विद्यासु सर्वासु यानीमान्यवराणि च ।
जनैस्सर्वैस्स बहुशो वृतत्वाद्वृजनानि च ॥ ५३३ ॥

राजसानि कुशास्त्राणि तामसान्यपि सर्वशः ।
जानंस्तदर्थदोषं च पश्यन्सुजनचेतसाम् ॥ ५३४ ॥

गोषु विद्यासु इमा इमानि । वृजना अव्यवसायिभिर्जनैर्वृतानि कुशास्त्राणि सदागमविरुद्धानि तदुदासीनानि च । जानन् तत्प्रसक्तदोषं च पश्यन् अन्तः सज्जनानां मनसि आतिष्ठति प्रतिक्षणं बुद्धिशोधकत्वेन सन्निधीयते ॥ ५३३ ॥ ५३४ ॥

अन्तरा तिष्ठति हरिं पश्यंश्च वृषभः किल ।
वागूर्मिता वाक्प्रदत्वं बुद्धिदत्वादयो गुणाः ॥ ५३५ ॥

सारासारविवेकश्च यद्गुरुत्वप्रमापकाः ।
अतः प्रागुक्तमध्वाख्यरूपवागेव वागियम् ॥ ५३६ ॥

अन्तः इत्यस्यार्थान्तरं अन्तरिति हृदयकमले इत्यर्थः । फलितमाह अत इति ॥ ५३५ ॥ ५३६ ॥

हृदन्तः प्राणरूपस्य बहिश्च गुरुरूपिणः ।
पवमानस्य चरितं श्रुतिरित्थमबोधयत् ॥ ५३७ ॥

प्राणरूपस्य तात्विकदेवताप्रेरकस्य ॥ ५३७ ॥

उन्मध्व इति चान्या वाक्सूक्तेऽस्मिंस्तौति मद्गुरुम् ।
वसानो भूतले मध्वो महिषः सर्वतो महान् ।
ऊर्मिरुत्कृष्टमतिमानूर्मिवद्वासदोन्नदन् ॥ ५३८ ॥

'उन्मध्व ऊर्मिर्वनना अतिष्ठदपो वसानो महिषोऽवगाहते । राजा पवित्ररथो वाजमारुहत्सहस्रभृष्टिर्जयति श्रवो बृहदि'ति श्रुतिभावं व्यनक्ति वसान इति । अवतीर्ण इति भावः । ऊर्मिवदिति न्यूनोपमा 'गांभीर्यात्स्वनमधरीकरोति सिन्धोरि'ति सुमध्वविजयोक्तेः ॥ ५३८ ॥

वननाभजनार्हत्वादपो ज्ञानप्रदत्वतः ।
ऋगादिविद्याः सरित इव विद्वान्विगाहते ॥ ५३९ ॥

यस्मादुदस्थापयत्तास्तस्मात्सोऽतिष्ठयत्प्रभुः ।
अन्यार्थे पातनं पातस्स्वस्वार्थे प्राप्तिरुत्थितिः ॥ ५४० ॥

'बुद्धिशुद्धिकरगोनिकराढ्यं तीर्थजातमुभयं च धरिण्याम् । आत्ममज्जनत एव निकामं पर्यशोधयदमन्द मनीषः' इति वचनोक्तमाह वननेति अतिष्ठत् पर्यशोधयदिति भावः ॥ ५३९ ॥ ५४० ॥

यस्य राजा पवित्राख्यसुदर्शनरथो हरिः ।
सहस्रारेषु यद्भृष्टिर्ज्वाला चाग्नेस्सहस्रधा ॥ ५४१ ॥

रथः चक्रोपरि स्थितः । 'चक्रस्थितं चक्रिणमष्टबाहुमि'त्युक्तेः । भृष्टिशब्दस्यार्थः ज्वालेति ॥ ५४१ ॥

सहस्रभृष्टिस्स बृहच्छ्रवः श्रवणमात्मनः ।
कृतं वाजं स्वेष्टदत्वादन्नमन्न समं सदा ॥ ५४२ ॥

आरुहद्विषयीभूय सदा तत्रैव संस्थितः ।
जयस्यखिलदुर्वृत्तांस्तस्यासाध्यं न किञ्चन ॥ ५४३ ॥

सः वेदव्यासः । श्रवणं 'अशृणोदनन्तहृदनन्ततोऽचिरात्परमार्थमप्यगणितागमावलेरि'ति वर्णितम् । जयति उत्कृष्टो वर्तते । अभिभावयति च । तस्य एवं वेदव्यासप्रेष्ठस्य मध्वस्य ॥ ५४२ ॥ ५४३ ॥

यस्य श्रवणसंपत्त्या विष्णुः प्रीतोऽभवत्प्रभुः ।
नापूर्वो निगमोद्धारस्तस्येति हृदयं श्रुतेः ॥ ५४४ ॥

उद्धारः निर्णायकसूत्रभाष्यरचनम् ॥ ५४४ ॥

सप्तस्वसृरिति श्रुत्या मध्वः प्रस्तूयते स्फुटम् ॥ ५४५ ॥

'सप्तस्वसृररुषीर्वावशानो विद्वान्मध्व उज्जभारादृशेकम् । अन्तर्येमे अन्तरिक्षेषु राजा इच्छन्वव्रिमविदत्पूषणस्य' इति श्रुतिं व्याख्याति सप्तेत्यादिभिः ॥ ५४५ ॥

वावशानोतिशयितकान्तियुक्तस्सुखात्मकम् ।
कं ब्रह्म परमं विद्वान्मध्वो ज्ञानदृशे सताम् ॥ ५४६ ॥

कं ब्रह्म इति श्रुत्यनुसारेणार्थः सुखात्मकमिति पूर्णसुखमिति भावः । दृशे ज्ञानाय । सतामिति योग्यतया संबन्धः ॥ ५४६ ॥

ऋगाद्यास्सप्त सद्विद्यास्स्वतन्त्रेशसृतत्वतः ।
स्वसृस्स्वतः पूर्वजा वा परमात्ममुखाम्बुजात् ॥ ५४७ ॥

स्वसृः स्वतन्त्रस्य हरेर्मुखान्निःसृता चतस्रः श्रुतीः एवं तेन रचिता इतिहासपुराणपञ्चरात्राख्याः श्रुतिसमाः तिस्रः विद्याः ॥ ५४७ ॥

अरुषीस्सर्वभिन्नाख्यहयग्रीवर्षिसंयुताः ।
तदन्यद्रष्टृशून्या वा लयेऽप्यच्युतबुद्धिगाः ॥ ५४८ ॥

अ सर्वभिन्नः हयग्रीव एव ऋषिः द्रष्टा यासां ताः । 'यतस्ता हरिणा दृष्टा' इति वाराहवचनात् । लयेऽपीति 'शाश्वता विष्णुबुद्धिगाः' इति वचनात् ॥ ५४८ ॥

वर्णव्यत्यासतोस्त्वित्थं नोचेदक्रूररूपिणीः ।
उज्जभारोद्धारात्मभाष्यादिग्रन्थविस्तरे ॥ ५४९ ॥

असदास्यान्धकूपेभ्य उज्जह्रे वा बलात्प्रभुः ।
हभौ निभौ हञि छन्दो भागे क्वापीति शाब्दिकाः ।
ज्ञानाय यासामुद्धारस्ता विद्या नात्र संशयः ॥ ५५० ॥

अर्षीरिति भाव्यम् । अरुषीरिति कथमिति तत्राह वर्णेति । **अक्रूरेति** सतां दुःखप्रहाणोद्देश्यकेत्यर्थः । **उद्धार** असाधुनिबन्धान्धतमसावकुण्ठितान् यथावद्व्याचख्यौ । हञि धातौ । निभौ सदृशौ । तेन उज्जभारेति साधुः ॥ ५४९ ॥ ५५० ॥

पूषणस्य हरेः पूर्णबलप्रेरणकर्मणः ।
वव्रि वरणमिच्छन्स प्रसादाभिधमुत्तमम् ॥ ५५१ ॥

उद्धारे सामर्थ्यस्य कारणमाह **पूषणस्येति** पू इत्यस्य पूर्णमिति षकारस्य बलमिति णकारस्य प्रेरणमिति चार्थमाश्रित्याह पूर्णबलप्रेरणेति । **प्रसादाभिधमिति** 'यमेवैष वृणुते' 'वृणीमहे ते परितोषणाय' इत्यादिप्रयोगादिति भावः । उद्धारे स्वप्रयोजनमुक्तम् ॥ ५५१ ॥

अन्तरिक्षेन्तरिक्षाख्याऽव्याकृताकाशमानिनि ।
दुर्गाननाम्बुजे पूर्वं सर्वस्य जगतः पुरा ।
जाजातास्सप्तविद्यास्ता अन्तस्सुजनचेतसाम् ॥ ५५२ ॥

मध्येयेमन्ययमयत्स्वयं चाविददञ्जसा ।
आहान्तरिक्षे जातत्वमनादित्वं च सूचयन् ॥ ५५३ ॥

अन्तरिक्षो विष्णुः स्वतन्त्रज्ञानवान् । तस्माज्जाताः तद्बुद्धौ सर्वदा प्रतीयमानाः श्रुतीः। अव्याकृताकाशाभिमानिन्या दुर्गाया आस्यात्प्रलये विनिर्गता वा । न्ययमयत् दृढनिरूढानकरोत् । अनेन उद्धारस्य परप्रयोजनमपि फलमुक्तम् ॥ ५५२ ॥ ५५३ ॥

इत्यस्तौत्पवमानस्य सूक्तेयं स्पष्टवागियम् ।
स मध्वः पवमानांशस्सिद्धो विद्वच्छिरोमणिः ॥ ५५४ ॥

सिद्ध इति । न हि अन्यसूक्ते अन्यस्य प्रतिपाद्यत्वं संबोभवीति इति भावः ॥ ५५४ ॥

विष्टंभो दिव इत्यत्राप्युक्तो मध्वो गुरुर्मम ।
विष्टंभो धारको योऽसौ दिवोधारणशीलवान् ॥ ५५५ ॥

धरुणोऽस्याः पृथिव्याश्च विश्वाश्च क्षितयोऽस्य हि ।
हस्ते हस्तवशा मिथ्यात्वाख्यबाधविमोचनात् ॥ ५५६ ॥

वायो तवांशुरंशोऽसौ मध्वस्तच्छीलशीलवान् ।
नितरां योगयुक्तत्वान्नियुक्तानुत्स उत्सुकः ॥ ५५७ ॥

'विष्टंभो दिवो वरुणः पृथिव्या विश्वा उत क्षितयो हस्ते अस्य । असत्त उत्सो गृणते नियुत्वान् मध्वो अंशुः पवत इन्द्रियाय' इति श्रुतिं व्याचष्टे **विष्टंभ इति** । दिवः स्वर्गलोकस्य । धरुणः धारणशीलः । **विमोचनात्** पराकरणात् । सत्यत्वसमर्थनादिति यावत् । ते तव । सर्वप्रकारेण मूलरूपशीलवान् । **नित्युत्वान्** नितरां अनवरतं योगमुक्तः ईश्वरप्रवणकायकरणवृत्तिः । **उत्सुकः** 'प्रवर्धतां भक्तिरलं क्षणे क्षणे' इति प्रार्थनात् ॥ ५५५ ॥ ५५६ ॥ ५५७ ॥

हरिस्तुतिश्रोतुकामस्सर्वैश्चादृश्यरूपतः ।
असत्संज्ञं परं ब्रह्म गृणते स्तोत्रसञ्चयैः ॥ ५५८ ॥

सर्वैः असज्जनैः। सदेः गत्यर्थकत्वात् असत् अज्ञेयम्। गृणते बहुरूपत्वाद्बहुवचनम् ॥ ५५८ ॥

वागिन्द्रियाख्येन्द्रियाय पवते प्रेरणेच्छया ।
सत्सु वाग्वैखरीरित्सुरेव सञ्चरति क्षितौ ।
इत्यर्थोऽत्र यतस्सम्यग्दृश्यते पदसंपदा ॥ ५५९ ॥

इन्द्रियाय वागिन्द्रियवैखरीप्रदानाय। सत्सु पद्मनाभतीर्थप्रभृतिषु। पवते सञ्चरति 'गोदावरीतटमगादलेशाधीः' इत्याद्युक्तेः ॥ ५५९ ॥

सिंहं न सन्तेति वाक्च मध्वस्य चरितं जगौ ॥ ५६० ॥

'सिंहं न संत मध्वो अयासं हरिमरुषं दिवो अस्य पतिम्। शूरो युत्सु प्रथमः पृच्छते मा अस्य चक्षसा परिपात्युक्षा' इति श्रुतिं विवृणोति मध्वस्येति ॥ ५६० ॥

सिंहं नृसिंहं विवृत नसोऽन्तो यस्य तं सुपः ।
लोपे नसान्तेति पदस्यार्थं दुर्जनसंहृतेः ॥ ५६१ ॥

सिंहं नामैकदेशे नामग्रहणम्। नसन्त सुलोपः। दुर्जनसंहाराय विवृतनासापुटम्। 'अभोधयः श्वासहता विचुक्षुभुः' इत्युक्तेः ॥ ५६१ ॥

हरिं भक्तेषु शान्तत्वादरुषं रोषवर्जितम् ।
अयासमागतं स्तंभात्प्रह्लादार्थं सभान्तरे ।
अस्य सज्जनवर्गस्य दिवो ज्ञानद्युतेः पतिम् ॥ ५६२ ॥

भक्तेष्विति 'दारितारातिदूरप्रध्वस्तध्वान्तशान्तप्रविततमनसा भाविता नाकिवृन्दैः' इत्युक्तेः। ज्ञानद्युतेः पतिं अखिलाज्ञानमतध्वान्तदिवाकरम् ॥ ५६२ ॥

शूरोतिशौर्यवान्युत्सु वाग्युद्धेषु महीतले ।
मध्वो मध्वाभिधो योगी श्रोतृषु प्रथमस्सदा ।
गा गोपदोक्तसद्विद्या व्यक्त्युत्कर्षाय पृच्छते ॥ ५६३ ॥

गाः विद्याः ॥ बुद्धिशाणत्वसिद्धये किञ्चित् अप्राप्तलाभाय च। पृच्छते उत्तरश्रवणेन विशेषज्ञानवांश्च भवति ॥ ५६३ ॥

अस्य प्रसादादाप्तेन चक्षसा ज्ञानचक्षुषा ।
सत्सु बोधोक्षणं कुर्वन्नुक्षा भिक्षुगणाग्रणीः ।
परिपाति सतां वृन्दमित्यर्थोऽत्र स्फुटो यतः ॥ ५६४ ॥

उक्षा ज्ञानामृतसेचकः। प्रथमः भिक्षुगणाग्रणीः 'पारिव्राज्याधिराजः' इत्युक्तेः ॥ ५६४ ॥

प्रधारा मध्व इत्यत्राप्युक्तो मध्वस्य विक्रमः ॥ ५६५ ॥

अग्रयो मध्वो मध्वमुनिः प्रकृष्टज्ञानधारया ।
सहिताः सप्तविद्याख्या महीस्स महतीरपः ॥ ५६६ ॥

'प्रधारा मध्वो अग्रिया महीरपो विगाहते। हविर्हविष्षु वन्द्य' इति श्रुतिभावं व्यनक्ति अग्रय इति। प्रधाराः प्रकृष्टज्ञानधारया सहिताः। महीः महतीः अपः सप्तविद्याः विगाहते भाष्यादिनिर्माणाय विचारयति ॥ ५६५ ॥ ५६६ ॥

हविर्वन्द्यः स्वयं विष्णोर्हविः प्रियतमत्वतः ।
ध्यातृभिर्ज्ञानयज्ञेषु हूयमानत्वतोऽपि वा ॥ ५६७ ॥

हविः हविरिव विष्णोः प्रेयसां प्रेष्ठः। स्वयं प्रलये हविः विष्णौ हव्यमानो वा। हूयमानत्वतः 'नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि' इत्येवंप्रकारेणेति भावः ॥ ५६७ ॥

हविर्ज्ञानघृतस्रावी तेषु तत्प्रतिमात्वतः ।
स्तुत्यो वा तास्स्फुटीकर्तुं स्वबुद्ध्येत्थं विगाहते ॥ ५६८ ॥

प्रतिमात्वतः मुख्यसन्निधानपात्रत्वहेतोः । वा ताः इति पदच्छेदः । स्तुत्यः 'श्रीमध्वहृत्कमलवासरमानिवासः प्रीतोऽस्तु' इत्येवंरीत्या ॥ ५६८ ॥

प्रकृष्टसूर्यधारादि धारा विषमभूमयः ।
यासु ताः पर्वतमहीस्सर्वाः पथि पथि प्रभुः ।
प्रकृष्टोग्रप्रवाहाख्यधाराश्च सरितामपः ॥ ५६९ ॥

यद्वा प्रधाराः विषमभूमयः 'व्याश्रयान्तरसुदूरशिलासु' इति बदरिकाध्वनिदुर्गमप्रदेशान् । यद्वा प्रधाराः तुरङ्गतरङ्गमालाः गङ्गायाः प्रवाहधाराः ॥ ५६९ ॥

अग्रयो मध्वो मध्वमुनिर्गच्छन्बदरिकाश्रमम् ।
अग्रीभूत्वा व्रजन्वाऽसावग्रियोऽग्रेसरस्तदा ॥ ५७० ॥

अग्रयः 'इमान् स्वस्वपूर्वाश्रयान्' इति वाक्यात् अग्रगामी ॥ ५७० ॥

नेत्याहूतो म्लेच्छभटैस्तैराहूतस्वसेविषु ।
वन्द्यस्तुत्यचरित्रश्च लीलयैव विगाहते ॥ ५७१ ॥

नेति 'वारयत वारयत वैरिसुहृदोमून्' इति वार्यमाणः । सेविषु शिष्येषु ॥ ५७१ ॥

इदं च नाद्भुतं तस्य यो हविर्वायुरूपतः ।
आहूयते यज्ञवेद्यां तत्राहूतसुरेषु च ॥ ५७२ ॥

आहूयते 'वायवाया हि दर्शते'ति मन्त्रेण ॥ ५७२ ॥

हविष्षु वन्द्यस्तस्येदृङ्माहात्म्यं युक्तमेव हि ।
इति वा सा श्रुतिस्सत्सु प्रसिद्धां तत्कथां जगौ ॥ ५७३ ॥

हविष्षु वन्द्यः 'वायुना त्रिरपि पूर्वपायिना सर्वदैवतजिता तरस्विना' इति हविःपानार्हदेवेषु स्तुत्यः ॥ ५७३ ॥

अस्मभ्यमिन्दवित्यत्राप्यस्मद्गुरुरभिष्टुतः ॥ ५७४ ॥

अभीष्टदानशीलत्वादिन्दोहे पवमान ते ।
योवतारो महैश्वर्यवन्तं नारायणं सदा ।
युनक्तीतीन्द्रयुर्नाम्ना मध्वो मध्व इतीरितः ॥ ५७५ ॥

'अस्मभ्यमिन्द्रदविन्द्रयुर्मध्वः पवस्व धारया पर्जन्यो वृष्टिमां इव' इति श्रुतिं विशदयति अभीष्टेति । इन्द्रयुः परमात्मविरहरहितः 'नैष नाथविरही ततोऽभवदि'त्युक्तेः ॥ ५७५ ॥

तेन रूपेण विज्ञानधारया सह सर्वदा ।
अस्मभ्यमस्मानुद्दिश्य पर्जन्य इव वृष्टिमान् ।
पवस्वेति यतस्स्पष्टमर्थोऽत्रापि प्रतीयते ॥ ५७६ ॥

मध्वस्स त्वं पवस्वेति वाऽऽशास्ते मुनिमण्डली ।
इत्यर्थोऽत्र यतस्स्पष्टं दृश्यते पदसंपदा ॥ ५७७ ॥

पवस्व त्वच्चरित्रश्रावणेन पवित्रीकुरु । 'इति विविधगोधारावारैर्विशारदवारिदो हरिपदरतः' इत्याद्युक्तरीत्या स्वभक्तद्वारा भवघर्मपरिहारं कुर्विति भावः ॥ ५७६ ॥ ५७७ ॥

येन देवाः पवित्रेण आत्मानं पुनते सदा ।
तेन सहस्रधारेण पावमान्यः पुनन्तु मा ।
इति श्रुतिः प्राक्पवित्रमाम्नाऽऽहूय पुनश्च तत् ।
सहस्रधारं यत्प्राह तत्सहस्रारमेव तत् ॥ ५७८ ॥

अत्र 'प्राजापत्यं पवित्रं शतोद्यामं हिरण्मयम् । तेन ब्रह्मविदो वयं पूतं ब्रह्म पुनीमहे' इति श्रुतिरपि ग्राह्या । व्याख्याति प्रागित्यादिभिः । पवित्रनाम्ना पूर्वं

सुदर्शनपरत्वेन पवित्ररथ इत्यादौ बहुत्र प्रयुक्तेनैव पवित्रेतिनाम्ना । तत् सुदर्शनम् । पवित्रस्य चक्रत्वे युक्त्यन्तरं सहस्रधारमिति । एवकारेण दशापवित्रादिव्यावृत्तिः ॥ ५७८ ॥

देवाश्च येन चक्रेण लाञ्छितेन भुजे सदा ।
स्वस्वदेहं मनश्चापि पुनते वैष्णवोत्तमाः ॥ ५७९ ॥

लाञ्छितेन भुजे इति योग्यतया संबन्धः । सदेत्यनेन नित्यं गोपीचन्दनादिना प्रतिदिनं धार्यमाणं चक्रधारणमपि संगृह्णाति । आत्मानं इत्यस्यार्थः देहं मनश्चापीति । देवा इत्यस्यार्थः वैष्णवोत्तमाः इति । ब्रह्मादयः ॥ ५७९ ॥

तेन चक्रेण मरुतो मूर्तयो मां पुनन्त्विति ।
मुनिः प्रार्थयते कश्चिदित्यर्थोऽत्र दृश्यते ।
शब्दाननुपमृद्यैव शब्दशब्दार्थवेदिभिः ॥ ५८० ॥

एवं च सर्वदेवानां कार्यं चक्रादिधारणम् ।
प्रार्थ्यं महर्षिभिः को वा मानवोऽन्यो न मानयेत् ॥ ५८१ ॥

उत्तरार्धं मुनिप्रार्थनापरं व्याचष्टे तेनेति । पावमान्यः मरुतो मूर्तयः । मुनिः एतद्वाक्यद्रष्टा ॥ ५८० ॥ ५८१ ॥

सदेत्युक्त्या च यद्गोपीचन्दनैश्चक्रलाञ्छनम् ।
अद्यापि कुर्वते वृद्धास्तच्च श्रुतिरसूचयत् ॥ ५८२ ॥

वृद्धा इत्यनेन अविगीतशिष्टाचारपरंपरामप्यत्र संवादयति ॥ ५८२ ॥

देवास्तु तप्तचक्राङ्कयोग्ये शुभदिने सदा ।
तप्तेन तेन पुनते मृदा तल्लाञ्छनैस्सदा ॥ ५८३ ॥

शुभदिने आषाढशुद्धैकादश्यादिपवित्रदिने । सदा प्रतिसंवत्सरम् । मृदा गोपीचन्दनेन । सदा प्रतिदिनम् ॥ ५८३ ॥

इति पूर्वार्धवाक्यार्थो लभ्यते पदसंपदा ।
उत्तरप्रार्थनाहेतुरूपया चार्थसंपदा ॥ ५८४ ॥

उत्तरार्धे मुनिप्रार्थनाऽनुपपत्त्याऽपि पवित्रपदस्य तप्तचक्रपरत्वार्थोऽवधार्यते इत्याह उत्तरेति ॥ ५८४ ॥

अर्थ्यमानं तु मुनिना तप्तचक्रस्य लाञ्छनम् ।
गुरूणां करकञ्जेन धार्यं चक्रं तदेव हि ।
अतः पूर्वार्धवाक्येऽपि तप्ताङ्कप्रस्तुतिर्बलात् ॥ ५८५ ॥

बलात् अन्यथाऽनुपपत्तिबलात् ॥ ५८५ ॥

मुनींश्च देवदेहांश्च शुद्धीकुर्वत्सुदर्शनम् ।
परं पवित्रमत्र स्यान्नान्यत्पुंमतिनिर्मितम् ॥ ५८६ ॥

अन्यत् परपरिकल्पितं दशापवित्रादिकम् ॥ ५८६ ॥

अतोऽप्यन्यार्थकथनं व्यर्थमासीद्दुरात्मनाम् ।
सदेति च पदं कुप्येत्पवित्रान्तरकल्पने ॥ ५८७ ॥

कुप्येत् विरुध्येत । दशपवित्रस्य यज्ञ एव संभावितत्वादिति भावः ॥ ५८७ ॥

अतः श्रुतिः पवित्रं त इत्यत्रापि सुदर्शनम् ।
प्रभोरायुधमेवाह नियोगस्तस्य सन्निधेः ।
अन्यत्रापि भवेदन्नमन्त्रणे सौरमन्त्रवत् ॥ ५८८ ॥

अतः समाख्याबलात् अन्यत्र दशापवित्रे । नियोगः विनियोगः । तस्य सुदर्शनस्य । सौरेति सूर्यार्थकगायत्रीत्यर्थः ॥ ५८८ ॥

पवित्रं चरणं नेमिररश्चिक्रं सुदर्शनम् ।
सहस्रारं प्राकृतघ्नं लोकद्वारं महौजसम् ॥ ५८९ ॥

विष्णुचक्रस्य नामानि पर्यायेण निबोध मे ।
इति पाद्मोक्तगौरीशवाग्घि लिङ्गानुशासनम् ॥ ५९० ॥

लिङ्गेति । तत्पदवाच्यगौरीशेत्यर्थः ॥ ५८९ ॥ ५९० ॥

पावमानी तनुश्चेयं स्यादाचार्यस्वरूपिणी ।
याऽस्य वैष्णवधर्मस्य सर्वत्रापि प्रवर्तिका ॥ ५९१ ॥

सा च प्रसिद्धेर्बदरीमध्ये मुनिमनःप्रिया ।
व्यासकैङ्कर्यधुर्या च माध्वी भवितुमर्हति ॥ ५९२ ॥

आचार्यस्वरूपिणी न तु बलकार्यार्थे उपात्तहनुमद्भीमरूपिणी । **या तनुः** । **अस्य** मुद्राधारणादिरूपस्य । **प्रसिद्धेः** सर्वप्रमाणैः प्रमितेः ॥ ५९१ ॥ ५९२ ॥

युगे युगेऽवतीर्णानां बहुत्वमपि युक्तिमत् ।
द्विविधस्यास्य धर्मस्य मौल्यं सा मूर्तिरर्हति ॥ ५९३ ॥

युगे युगे प्रवाहतः । **अवतीर्ण**त्वात् अनन्तावतारवत्त्वात् । **द्विविधस्य** तप्तचक्रस्य गोपीचन्दनचक्रस्य च धारणरूपस्य । **मौल्यं** मूलसंप्रदायप्रवर्तकत्वम् । **सा** माध्वी ॥ ५९३ ॥

बलकार्याणि रूपाणि वायोस्सन्तु सहस्रशः ।
ज्ञानकार्यं तु तद्रूपमिदमेव प्रदृश्यते ॥ ५९४ ॥

ज्ञानकार्यं ज्ञानप्रधानककार्यम् हनुमदाद्यवतारेऽपि कदाचिज्ज्ञान- कार्यस्यापि दर्शनात् ॥ ५९४ ॥

यत्ते पवित्रमर्चिष्यग्नेविततमन्तरा ।
ब्रह्म तेन पुनीहीति तस्यैव प्रार्थनान्तरम् ॥ ५९५ ॥

परिशिष्टश्रुत्योक्तमर्थं द्रढयति **यत्त इति**। **तस्य** पूर्वोक्तमन्त्रद्रष्टुः मुनेः ॥ ५९५ ॥

सख्युरग्रे हृदि गतमग्न्याख्यं तं गुरुं प्रति ।
स्पष्टीकर्तुं महाधर्मं तप्तचक्राङ्कधारणम् ॥ ५९६ ॥

अग्निशब्दस्य वाच्यर्थकत्वं विशदयति **सख्युरिति** वायुसखे हुताशने नियामकत्वेन हृदिस्थितत्वादग्न्याख्यम् । तत्पदमुख्यवाच्यम् । ते अर्चिषि ज्वालायां अन्तरा विततं तापनाय स्थापितं यत् पवित्रं चक्रम् । तेन इत्युत्तरार्धेणान्वयः ॥ ५९६ ॥

अग्निश्च दह्यात्त्वां नोचेत्पूर्वा वाक्च प्रधक्ष्यति ।
अन्यथा वाक्यभेदः स्यात्सूक्तं चैतत्प्रकुप्यति ॥ ५९७ ॥

नो चेत् पवित्रपदार्थतया दशापवित्रमेव वदसि चेत् । **त्वां** तव दशापवित्रं पराभवलज्जाभिभूतं त्वां च। प्रधक्ष्यति भस्मीकरोति, तमसि पातयति 'विद्युद्व्यूढस्फुलिङ्गप्रकरविकिरणोत्क्वाथिते बाधिताङ्गानि'त्युक्तेः । **वाक्** येन देवा इति वाक्। **वाक्यभेदः** उद्दिष्टपरिशिष्टवाक्ययोर्विरोधः। **सूक्तं** एकार्थ-प्रतिपादकम् ॥ ५९७ ॥

आग्ने तेऽर्चिषि यच्चक्रमन्तराविततं कृतम् ।
तप्तेन तेन चक्रेण ब्रह्म वेदं पुनीहि नः ॥ ५९८ ॥

'ब्रह्म वेदस्तपस्तत्वं' इत्यभिधानाद्वेदं इति। **पुनीहि** अयातयामं सार्थकं कुरु ॥ ५९८ ॥

इति प्रार्थनरूपोऽर्थो यस्स्पष्टोऽत्र प्रतीयते ।
अतश्चक्राङ्कशून्यानां वेदाभ्यासो वृथा भवेत् ॥ ५९९ ॥

वृथा अनर्थप्रयोजनकः ॥ ५९९ ॥

यदा चक्राङ्कशून्योक्तवेदस्याप्यपवित्रता ।
तदा तेषां तु मूर्खाणां हीनादपि च हीनता ।
किं वाच्या तेन चण्डालादधमं तं स्मृतिर्जगौ ॥ ६०० ॥

तेन अतिहीनत्वनिमित्तेन। स्मृतिः 'अवैष्णवस्तु यो विप्रश्चण्डालादधमः स्मृतः' इत्यादिका ॥ ६०० ॥

प्रतप्तं बिभृयाच्चक्रं शङ्खञ्च भुजमूलयोः।
श्रौतस्मार्तादिसिद्ध्यर्थं मन्त्रसिद्ध्यर्थमेव च ॥ ६०१ ॥

अचक्रधारिणं विप्रं दूरतः परिवर्जयेत्।
श्वपाकमिव नेक्षेत लोके विप्रमवैष्णवम् ॥ ६०२ ॥

उक्तार्थे पद्मपुराणं प्रमाणयति प्रतप्तमिति ॥ ६०१ ॥ ६०२ ॥

यस्तु नारायणं देवं ब्रह्मरुद्रादिदैवतैः।
समत्वेनाभिमन्येत स पाषण्डो नरः स्मृतः ॥ ६०३ ॥

यो मोहाद्विष्णुमन्येन हीनदेवेन दुर्मतिः।
साधारणं सकृद्ब्रूते सोऽन्त्यजो नान्त्यजोऽन्त्यजः ॥६०४ ॥

पाषण्डः भगवद्द्वेषी। समत्वज्ञानस्य 'साम्याधिक्ये तदन्येषां' इति नवविधद्वेषेषु परिगणनात् ॥ ६०३ ॥ ६०४ ॥

अतः श्रुतेः स्मृतेश्चैको मार्गः सद्धर्मरक्षणे ॥ ६०५ ॥

सद्धर्मेति चक्रधारणरूपेत्यर्थः ॥ ६०५ ॥

किञ्च श्रुत्यन्तरं प्रोक्तं शतोद्यामं हिरण्मयम्।
पवित्राख्यं विष्णुचक्रं धारणाय विनिर्मितम्।
यज्ञरक्षाकरं सोऽग्निः सहते स्वोदरेऽर्पितम् ॥ ६०६ ॥

शतोद्यामं अंवनाय गुरुणा बहुवारं बाहूद्यमनोपेतम्। यज्ञरक्षाकरं 'दन्दग्धि दन्दग्ध्यरिसैन्यमाशु' इति भागवतोक्तेः विरोधिसंहारकरम्। अर्पितं तापनायेति शेषः ॥ ६०६ ॥

अन्यत्तु कुपितः सर्वं दहेद्वायुसखो ह्यसौ।
अतोऽर्थान्तरवार्ताऽत्र दग्धैवाभून्न संशयः ॥ ६०७ ॥

अन्यत् दशापवित्रम्। तस्य हिरण्मयत्वासंभवात् ॥ ६०७ ॥

चक्रं सुवर्णतः कुर्याच्छङ्खं तु रजतेन च।
इति पौराणिकी गोष्ठी तत्सर्वं मे मनोरमम् ॥ ६०८ ॥

पौराणिकी पद्मपुराणस्था। गोष्ठी वाक्। मे मदुक्तं प्रमेयजातम् ॥ ६०८ ॥

एवञ्च तप्तचक्रं मे नांहोदाहाय केवलम्।
विरुद्धपक्षकक्षाणामपि दाहमचीक्लृपत् ॥ ६०९ ॥

अंहः पापम् ॥ ६०९ ॥

पवमानपदैः सोमपदेन च य ईर्यते।
स एवाग्निसवित्रादौ स्थितस्तत्तत्पदोदितः ॥ ६१० ॥

उदितः प्रवृत्तिनिमित्तं प्रति स्वातन्त्र्यात् आश्रयत्वाच्चेति उभयथा योगवृत्त्येति भावः ॥ ६१० ॥

अङ्गीभूताग्निनेतृत्वादङ्गेष्वग्निशिखा नयन्।
प्राणाग्निरिति यः प्रोक्तः स एवाग्निस्थितामलः ॥ ६११ ॥

अङ्गीभूताग्निनेतृत्वात्, अप्रधानाग्निनिष्ठप्रवृत्तिनिमित्तं प्रति स्वातन्त्र्यात्। नयन् व्यानरूपेण नाडीषु प्रापयन्। एतेन तद्गतत्वं प्रवृत्तिनिमित्तं दर्शितम्। प्रोक्त इति रूढिदर्शनम् ॥ ६११ ॥

अलंभावो यतो नास्य पवित्रीकरणे सताम्।
उपस्थातृषु यः पुण्यराशिं सूते दिने दिने ॥ ६१२ ॥

स एव सविता सोमबिम्बस्थः सोमनामकः।
समत्वाह्लादकारित्वपूर्वैः शुभगुणैः प्रभुः ॥ ६१३ ॥

अनलशब्दं वायौ निर्वक्ति **अलंभाव इति।** **उपस्थातृषु** गोपीचन्दनमुद्रादिधारणपूर्वकं सन्ध्याद्युपस्थानं कुर्वत्सु । जीवोत्तमत्वेनाराधकेषु । पुण्यराशिं मुक्तिप्रयोजकं वायोर्विष्णवाज्ञया मोक्षदातृत्वात् ॥ सोमेत्यादिना सोमशब्दनिर्वचनम् ॥ ६१२ ॥ ६१३ ॥

पवमानस्य यत्सूक्ते पवमानप्रशंसनम् ।
उचितं तेन वायुश्च वायुगो हरिरेव च ।
सूक्तस्थिताखिलग्निर्भिश्च
स्तुत्यो नान्यस्य वागियम् ॥ ६१४ ॥

इयं पवमानाग्निसवितृसोमादिरूपा ॥ ६१४ ॥

अतोऽग्नावाहितं चक्रं स्वार्चिषा पुण्यदायिना ।
स एव तप्तं कुरुते गुरुर्भूत्वा स एव च ॥ ६१५ ॥

सतां भुजे धारयति मुनीनां मध्वरूपधृक् ।
स एव धारयेद्वायुरन्यत्र गुरुषु स्थितः ॥ ६१६ ॥

तापनं अङ्कनं च मुख्यतो वायोरेवेत्याह **अत** इत्यादिना। **गुरुषु** हंसनामकपरमात्मपरंपराप्राप्तेषु पीठाधिपतिषु। न तु तदन्येषु यादृशतादृश-विद्योपदेशकेषु ॥ ६१५ ॥ ६१६ ॥

मध्वाख्यगुरुरूपेण पूयमानः स पावयन् ।
धारयेत्तानि रूपाणि मध्वस्यैव बहूनि तत् ॥ ६१७ ॥

रूपाणि साक्षाद्रूपाणि पूर्वोक्तगुरुसंस्थितानि च ॥ ६१७ ॥

शिष्टाचाराददृष्टस्य यदा वेदस्य कल्पना ।
स्पष्टदृष्टश्रुतिं सोऽतिबलवान्नैव मुञ्चति ॥ ६१८ ॥

अदृष्टस्य अनुमितस्य। **बलवान्** अनादितः देवादिसत्संप्रदायप्राप्तः ॥ ६१८ ॥

अतः श्रुतिरभूदेषा तप्तचक्राङ्कशासनम् ।
लिङ्गानुशासनं तूक्तं शासनद्वयसंपदा ।
सहितां वैष्णवग्रामसीमां को वा न मानयेत् ॥ ६१९ ॥

ग्रामसीमां सिद्धान्तमर्यादाम् । सीमां इत्यस्य साधुत्वं 'निःसीमाः शक्तयोऽस्य हि' इति प्रयोगानुसारेण ध्येयम् ॥ ६१९ ॥

प्रास्तवं यत्संहिता यत्तदेव परिशिष्टवाक् ।
प्रपञ्चयति तेनाभूत्तच्च शिष्टानुशासनम् ॥ ६२० ॥

प्रास्तवं प्रस्तुतिप्राप्तम् । प्रपञ्चयति अधिकारिवर्णनेन । तेन ऐकार्थ्येन । तत् परिशिष्टवचनम् । तेन शिष्टेत्यस्य परिशिष्टेत्यर्थान्तरमप्युक्तम् ॥ ६२० ॥

प्रपञ्चनं च प्रोक्तस्य तेन वाक्यद्वयेन तत् ।
तप्तचक्राङ्कनं वक्ति वाक्यभेदो न चेद्भवेत् ।
यतोऽस्य परिशिष्टत्वं तच्छेषत्वमपेक्षते ॥ ६२१ ॥

शेषत्वं धारणकर्तृप्रतिपादनेन तदुपकारकत्वम् ॥ ६२१ ॥

तापेन देहपावित्र्यकृत्पवित्रं जगत्त्रये ।
नापरं विद्यते विष्णुचक्राद्वैष्णवसंमतात् ॥ ६२२ ॥

परिशेषप्रमाणमाह तापेनेति ॥ ६२२ ॥

जडर्चां श्रवणायोगान्न ताः प्रार्थयते मुनिः ।
ऋगर्थीभूतपवनतनूनां प्रार्थनं हि तत् ॥ ६२३ ॥

प्रार्थनकर्मत्वात् जडानामृचां ग्रहणं न संभवतीत्याह जडेति ॥ ६२३ ॥

यतस्तत्रैव स मुनिर्देवैर्देवीः समाहिताः ।
इत्याह तेन सर्वर्क्षु देवैः सह समाहिताः ॥ ६२४ ॥

देव्यश्च सन्ति भारत्या मूर्तयो वायुमूर्तयः ।
मानिन्यः प्रतिपाद्याश्च ततस्तत्प्रतिपादिताः ॥ ६२५ ॥

तत्र पूर्वश्रुतौ 'कामान् समर्धयन्तु नः देवैर्देवीः समाहिता' इत्यत्र । मानिन्यः अभिमानिन्यः । यतः सन्तीत्याह ततः ताभिः सर्वाभिः ऋग्भिः प्रतिपादिताः ॥ ६२५ ॥

चक्राङ्कधारणं तेषु कुर्वन्त्यो वायुमूर्तयः ।
प्रधानभूताः प्रार्थ्यन्ते शेषे शेषिणि वाक्चये ॥ ६२६ ॥

देवैः इति पूर्वं निर्देशे कारणमाह **कुर्वन्त्य इति। वाक्चये** वाक्यसमूहे परिशेषसंहितारूपे ॥ ६२६ ॥

न यस्य सर्वमोक्षेऽपि मोक्षः साधर्म्यधर्मिणि ।
तच्चक्रलाञ्छनं मोक्षयोग्यात्को मोचयेद्बुधः ॥ ६२७ ॥

सारूप्यमोक्षेऽपि चक्रधारणानुवृत्तेः श्रुतत्वान्मोक्षयोग्यानां तदावश्यकं इत्याह **नेति। सर्वमोक्षे** सकलसंसारान्मुक्तावपि ॥ ६२७ ॥

चमूषत्साधुचम्वां सन्वैष्णवेषु समुज्ज्वलन् ।
सुखी हरिर्हि यस्येनः स श्येनो विष्णुकिङ्करः ॥ ६२८ ॥

नयन्सुखभुवं स्वीयांश्छकुनाख्योऽपि स प्रभुः ।
बिभृत्वा धारणाशीलोद्रप्संश्रित्तद्रवान्वितः ॥ ६२९ ॥

इदानीं पूयमानसूक्तस्थं 'चमूषच्छ्येनः शकुनो विभृत्वा गोविन्दुर्द्रप्स आयुधानि बिभ्रत् । अपामूर्मिं सचमानः समुद्रं तुरीयं धाम महिषो विवक्ति' इति मन्त्रं व्याख्याति **चमूषदिति।** वैष्णवसेनानायकः इत्यर्थः। **श्येनः** शी परमसुखः हरिः आसमन्तात् इनः स्वामी यस्य सः । शस्य सुखस्य कुं भूमिं मोक्षं नयतीति शकुनः 'स एनान् ब्रह्म गमयती'ति श्रुतेः । **बिभृत्वा** बिभृत्वन् इति शब्दस्य प्रथमान्तं रूपम् ।

शास्त्रार्थधारणशीलः । तत्पोषकः । जगद्धारको वा सूत्रनामकः । द्रवान्वितः परमदयालुः ॥ ६२८ ॥ ६२९ ॥

आयुधानि सदा बिभ्रद्भुजंकण्ठोदरादिषु ।
चक्रशङ्खगदापद्मपूर्वाण्यखिलवाक्पतेः ॥ ६३० ॥

गोविन्दुर्गोपतेर्वा स्वस्वामिनः सेविनां प्रभुः ।
अपां ज्ञानप्रवाहाणामूर्मिमौन्नत्यसंपदम् ॥ ६३१ ॥

समुद्रं वेदशास्त्राख्यं सचमानः स्वचेतसा ।
संबन्धं प्रापयन्मध्वो मरुदंशो भवाद्बहिः ॥ ६३२ ॥

स्थितेस्तुर्यं मुक्तलोकाधारत्वाद्धामसंज्ञितम् ।
परं ब्रह्म विशेषेण वक्तीत्याह श्रुतिः परा ।
समवाये सचिद्धातुं यतो व्याख्यान्ति शाब्दिकाः ॥ ६३३ ॥

गोविन्दुः वाक्पतेः गोपालकृष्णस्य वा आयुधानि बिभ्रत् । **महिषः** तत्वदेवानां प्रभुः ॥ ६३० ॥ ६३१ ॥ ६३२ ॥ ६३३ ॥

पूयमानस्य सूक्तस्था तन्माध्वीयं कथा ध्रुवम् ।
यतः प्रवचनं कुर्वद्वायोरूपं श्रुतिर्जगौ ॥ ६३४ ॥

यतः तत् तस्मादिति पूर्वेणान्वयः ॥ ६३४ ॥

तच्चमूषु सतां सेयं कथा भक्तिमतां सताम् ।
सेनास्तुतौ च सेनानीस्तुतिरेव यतो भवेत् ॥ ६३५ ॥

स्वरेण प्रणवाख्येन मन्त्रेण हृदिगं सदा ।
परतश्च परं देवं महतश्च महत्तरम् ॥ ६३६ ॥

स्पष्टं सृगालोपनिषद्वाक्यं 'धृतोर्ध्वपुंड्रः (शृ) श्रुतचक्रधारी विष्णुं परं ध्यायति यो महात्मा। स्वरेण मन्त्रेण सदा हृदिस्थं परात्परं यन्महतो महान्तं' इत्येतद्व्याख्याति स्वरेणेति ॥ ६३५ ॥ ६३६ ॥

धृतोर्ध्वपुण्ड्रः श्रुतसच्चक्रधारीह यः पुमान्।
विष्णुं ध्यायति सर्वत्र स महात्मेति सांप्रतम् ॥ ६३७ ॥

प्रसिद्धोपनिषच्चाह शृपाक इति धातुतः।
तप्तचक्राङ्कोर्ध्वपुण्ड्रधृतिस्तुतिपरा स्फुटम् ॥ ६३८ ॥

श्रुतेति तप्तेत्यर्थः ॥ ६३७ ॥ ६३८ ॥

द्विरेखमूर्ध्वपुण्ड्रं च भवति द्विभुजे सदा।
तप्तचक्रं धाययतीत्याह काचन वेदवाक् ॥ ६३९ ॥

'द्विरेखमूर्ध्वपुण्ड्रं भवति तप्तं चक्रं द्विभुजे धाययती'ति शतपथवाक्यमप्यत्र प्रमाणयति द्वीति। धाययति धारयति ॥ ६३९ ॥

काण्वानां सा शतपथब्राह्मणे किल वर्तते।
यद्वेदस्य शिरो वक्ति तदेव हि वपुर्मतम् ॥ ६४० ॥

तस्मादियं च वाक्स्तौति तप्तचक्रायुधाङ्कनम्।
अचक्रधारिव्याख्यादिप्रत्याख्यानचिकीर्षया ॥ ६४१ ॥

उपनिषदः संहितावाक्यस्य चैकार्थत्वं साहित्यमुद्रयाऽऽह **यदिति शिरः** उपनिषद्। वपुः संहिता। लोकेऽपि उत्तमाङ्गानुकारित्वं हस्तपादादिवपुषः प्रसिद्धमिति भावः ॥ ६४० ॥ ६४१ ॥

अत्रापि च पवित्रं त इति वाग्वायुगं हरिम्।
स्तुवन्ती तप्तचक्राङ्कधारणं वक्ति सुस्फुटम् ॥ ६४२ ॥

'पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततनूर्न तदामो अश्नुते (शृ) श्रुतास इद्वहन्तस्तत्समासत' इति श्रुत्यर्थं शंसति **अत्रापीति** पूयमानेऽपीत्यर्थः। सुस्फुटं अन्वयव्यतिरेकप्रदर्शनपूर्वकम् ॥ ६४२ ॥

ब्रह्मणो वेदराशीनां पते लक्ष्मीपते तव।
पवित्रहस्तगं चक्रं व्याप्तं सर्वत्र सर्वदा ॥ ६४३ ॥

हस्तगं इति हेतुगर्भं विशेषणम्। हस्तस्य व्याप्तत्वात् तेन धृतस्य चक्रस्यापि **तथात्वमिति** ॥ ६४३ ॥

प्रभुस्त्वं देहिगात्राणि यतः पर्येषि विश्वतः।
चक्रव्याप्तौ हेतुभूता चक्रिव्याप्तिरितीरिता।
नान्यत्पवित्रं, प्राण्यङ्गव्यापि नापि जगत्त्रये ॥ ६४४ ॥

तेनातप्ततनूरामः पाकहीनो श्रुतेन तत्।
आमुष्मिकफलं यद्धि प्रसिद्धं मोक्षसंज्ञितम् ॥ ६४५ ॥

विश्वतः तन्वा एव न केवलं कान्त्या कीर्त्या वा। 'परो मात्रया तन्वा वृधान' इत्युक्तेः। अन्यत् पराभिमतं दशापवित्रादिकम्। व्यापि न इति पदच्छेदः। आम इत्यस्यार्थः पाकहीन इति। नेति व्यतिरेकप्रदर्शनम्। तदित्यनूद्य अर्थमाह आमुष्मिकमित्यादिना ॥ ६४४ ॥ ६४५ ॥

शृतासस्तेन पक्वाङ्गा वहन्तश्च दिने दिने।
गोपीचन्दनतो भक्तास्तत्समेत्य समाशत।
इत्यर्थं वागियं स्पष्टमाचष्ट किल वैष्णवी ॥ ६४६ ॥

वहन्त इत्यस्य गोपीचन्दनत इत्यनेनान्वयः। तेन दिने दिन इत्युपपन्नम्। तदित्यन्वयप्रदर्शनम्। समाशत सम्यक् अन्वभवन् ॥ ६४६ ॥

तदेषा पूयमानस्य सूक्तस्था वायुगं हरिम्।
स्तौति वायुमतस्थानां धर्मस्तवनतत्परा ॥ ६४७ ॥

पूयमानस्य वायोः। तेन वायोः स्तुतिः ज्ञापिता ॥ ६४७ ॥

वायोः सूक्तं वदेद्वायुं वायुगं वा हरिं वदेत्।
वदेद्वा वातरस(श)नमुनिधर्मं सुनिर्मलम् ॥ ६४८ ॥

ब्रह्मास्त्ररूपगायत्रीशत्रोः संहारकर्मणि।
नियुक्तेत्येव किं वक्ति रिपुसेनाप्रणाशनम् ॥ ६४९ ॥

अस्य मन्त्रस्य दशापवित्रे विनियोगेऽपि तदर्थकत्वे बाधकसद्भावात् उक्तत्रितयस्तुतिपरत्वं योग्यतावशात् श्लिष्टतरमित्यत्र दृष्टान्तमाह **ब्रह्मास्त्रेति** ॥ ६४८ ॥ ६४९ ॥

सुदर्शनस्य मीमांसा द्रष्टव्या विस्तरार्थिभिः।
उपकर्तुः प्रतिकृतेरशक्त्येहापि तत्कथा।
अतोऽस्मदुक्त एवार्थ इति सर्वं मनोरमम् ॥ ६५० ॥

अतो वेदेन वेदान्तवचनेन च मानितम्।
सर्वैर्मान्यं मतमिदं माननीयो गुरुश्च नः ॥ ६५१ ॥

सुदर्शनस्य मीमांसेति ग्रन्थकारेण विरचितं प्रबन्धान्तरम्। पुनरपि अत्र तन्मीमांसायां प्रयोजनं सुदर्शनदेवस्य स्तुतिरेवेत्याह **उपकर्तुरिति**। तदुक्तं 'सुधायां आर्थिकपुनरुक्तेः स्तुतित्वमेव समाधानमवधातव्यमिति।' प्रतिक्रियायाः सर्वथाऽशक्यत्वेऽपि स्वकीयकर्तव्यतामात्रेण वारं वारं स्तुतिरित्याशयः। अनेन सुदर्शनदेवोपासनेनैव ग्रन्थकृत एवमीदृशलोकविलक्षणप्रतिभादिसकलाभीष्ट-सिद्धिरिति ज्ञायते ॥ ६५० ॥ ६५१ ॥

यद्वायोः पवमानस्य पूयमानाभिधस्य च।
सूक्तस्थर्चामियं चर्चा तद्वायुस्तुतिरेव नः ॥ ६५२ ॥

इयं वायोर्गुणस्थापनपरा ॥ ६५२ ॥

स्पष्टं मध्वाभिधानांकाः सप्तर्चोऽत्र विचारिताः।
अष्टर्चस्तच्चरित्रांकाश्चक्राङ्कैकहरस्य वाक् ॥ ६५३ ॥

अष्ट प्रधानाः अङ्गभूताः षट् तथा च मिलित्वा चतुर्दशेति ध्येयम्। हरस्येत्युपलक्षणम्। शतपथब्राह्मणमपि ग्राह्यम् ॥ ६५३ ॥

वायुस्तुतौ च मध्वाख्या सकृदेव प्रकाशिता।
असकृन्मध्वसन्नाम्नी सेयं वायोर्महास्तुतिः ॥ ६५४ ॥

'मध्वाख्यं मन्त्रसिद्धमि'ति वायुस्तुतौ प्रतिज्ञातं अनेकासां ऋचां मंडल्या उदाहरणेन समर्थिता। अतः 'तां मन्त्रवर्णैरनुवर्णनीयामि'त्युक्तमपि दिक्प्रदर्शनेन उपपादितमित्याह **महास्तुतिरिति** ॥ ६५४ ॥

इदं ते पात्रमित्यृक्च मध्वं स्तौत्यष्टमेऽष्टके ॥ ६५५ ॥

शतक्रतो बहुज्ञानपरमैश्वर्य हे हरे।
इन्द्राख्या ते सने दाने योग्यवित्तानि यस्य तत्।
सन वित्तं ज्ञानभक्तिविरक्त्यादिगुणोर्जितम् ॥ ६५६ ॥

'इदं ते पात्रं सन वित्तमिन्द्र पिबा सोममेना शतक्रतो। पूर्ण आहावो मदिरस्य मध्वो यं विश्व इदभिहर्यन्ति देवाः' इति मन्त्रं व्याख्याति **शतेति**। क्रतुशब्दार्थः **ज्ञानेति**। शतेत्यस्य **बह्विति**। पूर्णेत्यर्थः बहोर्भावः भूमा पूर्ण इत्युक्तेः। इन्द्रशब्दार्थः परमैश्वर्य इति। सनशब्दस्य वित्तार्थकत्वे निष्पत्तिमाह **सने** इति। वित्तं चालौकिकमेवात्र विवक्षितमित्याह **ज्ञानेत्यादि** ॥ ६५५ ॥ ६५६ ॥

इदं मध्वाभिधं पात्रं सन्निधानपदं ध्रुवम्।
न चेदेतादृशज्ञानपूर्तिरत्र कुतो भवेत् ॥ ६५७ ॥

स त्वं न चेदिति प्रोक्तं देववाक्यमनुस्मर ॥ ६५८ ॥

ध्रुवमिति सन्निधानस्य अव्यभिचरितपूर्णतामाह। तत्र कार्यानुमानं **एतादृशेति**। प्रोक्तं भागवते चतुर्मुखेन गर्भस्तुत्यवसरे [१०-३-३५]। 'सत्वं न

चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनम्। गुणप्रकाशैरनुमीयते भवान् प्रकाशते यस्य च येन वा गुणः' इति। अत्र चतुर्मुखनिष्ठविशेषज्ञानस्य भगवत्सन्निधानपात्रत्वनिमित्तकत्व शंसनेन प्रकृतोपयोगः स्पष्टः ॥ ६५७ ॥ ६५८ ॥

एनाऽनेन प्राणतया सर्वत्र व्यापिनाऽर्पितम्।
सोमं यज्ञरसं सर्वं पिब पूर्णोऽपि तत्प्रियात्।
ज्ञानयज्ञरसं दिव्यज्ञानाख्यं रसमेव वा ॥ ६५९ ॥

एना इत्यस्यार्थः व्यापिनेत्यन्तेन। सोमं यज्ञरसं दिव्यज्ञानाख्यं रसं वा। पाने प्रयोजनं मध्वे प्रीत्यतिशय एवेत्याह तत्प्रियादिति ॥ ६५९ ॥

योऽयं मध्वो मध्वनामा मदिरस्य मदीरणात्।
जातस्य वेदशास्त्रादेर्मथनादुदितस्य वा ॥ ६६० ॥

ज्ञानस्य पूर्णः संपूर्णः केवलं करणं न तत्।
तत्संबन्ध्यपि तज्ज्ञानं तद्गुणस्यापि बोधनात् ॥ ६६१ ॥

इति ज्ञापयितुं षष्ठी तच्च योगिषु सर्वतः।
जुह्वदाहावनामा सन्वर्तते व्याससन्निधौ ॥ ६६२ ॥

इदंशब्दार्थः मध्व इति। ज्ञानार्थकत्वे निमित्तद्वयं मदीरणात् मया पवमानादौ प्रतिपादनात् इति, मथनादुदितस्य इति च। मदिरेणेति वक्तव्ये मदिरस्य पूर्ण इत्युक्तेः प्रयोजनं संबन्ध्यपीति ज्ञापयितुं इति। तत् ज्ञानं आ सर्वतः। योगिषु जुह्वत्। अत एव आहावनामा ॥ ६६० ॥ ६६१ ॥ ६६२ ॥

मुनिमात्रगुरुर्नासाविदित्थं यमभिस्थिताः।
हर्यन्ति मनसाऽऽकृष्य ध्यायन्ति सकलाः सुराः ॥ ६६३ ॥

अभितो वा व्याहरन्ति तमीदृक्सुगुणं सुराः।
यद्वाऽभितः प्राप्नुवन्ति चेप्सया शास्त्रसंपदाम् ॥ ६६४ ॥

हर्यन्नुषसमित्यादौ प्राप्त्यर्थोऽस्ति यतो हरिः।
अन्यार्थशून्या वागेषा किं न ब्रूते गुरुं मम ॥ ६६५ ॥

इत् इत्थम्। अभि अभिस्थिताः। 'उपसर्गाः क्रियाऽसन्निधाने ससाधनां क्रियामाहुरि'ति तत्त्वनिर्णयटीकोक्तेः। **हर्यन्ति** गुणोपसंहारपूर्वकं ध्यायन्ति व्याहरन्ति। प्राप्नुवन्ति च। प्राप्त्यर्थकत्वे वैदिकसमाख्यामाह **'हर्यन्नुषसं'** इति उषःकालं हर्यन् प्राप्नुवन् इति तत्रार्थोक्तेः ॥ ६६३ ॥ ६६४ ॥ ६६५ ॥

मध्वो वो नामेति वाक्च मरुत्सूक्ते तमुज्जगौ ॥ ६६६ ॥

यद्यतो मुख्यमरुतो वैर्युग्रा ये कुमारकाः।
अयासुर्भूतलं भीमहनूमन्मध्वनामकाः ॥ ६६७ ॥

ये चिदेव जगत्युर्व्यौ रोदस्यौ पृथिवीं दिवम्।
रेजयन्ति चरित्रेण राजयन्ति युगे युगे ॥ ६६८ ॥

मरुत्सूक्तगतं 'मध्वो वो नाम मारुतं यजत्राः प्रयज्ञेषु शवसा मदन्ति। ये रेजयन्ति रोदसी चिदुर्वी पिनन्त्युत्सं यदयासुरुग्रा' इति सुस्पष्टश्रुतिं व्याख्याति यदिति यत् यतः। ये वायोरवताराः त्रयः। चित् एव। उर्वी उत्कृष्टे। रोदसी द्यावापृथिव्यौ। रेजयन्ति भूषयन्ति 'भूषितभूमिभागः' इत्युक्तेः। अवनीं पावनतां नयन्तौ इति च ॥ ६६६ ॥ ६६७ ॥ ६६८ ॥

पिन्वन्ति पालयन्त्युत्समुत्सुकं स्वपदाम्बुजे।
पिविंमिविञ्च्युद्धातुं सेचनेर्थेऽनुशासते।
पालनञ्चाखिलैरिष्टैः सेचनं यद्विदुर्बुधाः ॥ ६६९ ॥

उत्सं उत्सुकं स्वपदांबुजे इति योग्यतया संबन्धः। पिन्वन्ति उदाहृतानुशासनानुसारेण सिञ्चन्ति इष्टैः पालयन्तीति यावत् ॥ ६६९ ॥

बलज्ञानाख्यकार्येषु तेषु पुत्रेषु हेऽनिलाः।
मरुतो वः प्रियं मध्वो नाम मारुतमद्भुतम् ॥ ६७० ॥

यजत्रा याजकाः सर्वे यज्ञेषूक्तिविशारदम् ।
सुखेन भरिताः सन्तो दृष्ट्वा श्रुत्वा च तद्वचः ।
प्रमदन्ति प्रहृष्यन्ति कर्मनिर्णयकोविदम् ॥ ६७१ ॥

इति श्रुतिर्यच्चरित्रं वक्त्यत्रैव प्रचारितम् ।
स मध्वो वैदिकाचार्यः सिद्धः सद्विद्वदग्रणीः ॥ ६७२ ॥

हे मरुतः वः युष्माकम् । गणे अग्रगण्यत्वात्प्रियम् । मध्वनामानं मारुतम् । यजत्राः यजमानाद्या ऋत्विजः सभ्याश्च । यज्ञेषु कर्मार्थश्रुतिगहनार्थभावेषु विशारदं कर्मनिर्णयग्रन्थस्य प्रणेतारं दृष्ट्वा शवसा सुखेन भरिताः । प्रमदन्ति प्रहृष्यन्ति ॥ ६७० ॥ ६७१ ॥ ६७२ ॥

तदस्येति श्रुतौ प्रोक्तो विष्णोस्तु परमे पदे ।
उत्स औत्सुक्यवान्मध्वः को वा सिद्धो निगद्यताम् ।
मध्वश्रुतेर्विष्णुभक्तिलिङ्गाच्चासौ गुरुर्हि नः ॥ ६७३ ॥

यतः श्रुत्योरुक्रमस्य स हि बन्धुरितीर्यते ।
ततस्तं सा गुरुं मुख्यप्राणरूपं न्यरूरुपत् ॥ ६७४ ॥

'तदस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदन्ति । उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः' इति श्रुतिं व्याचष्टे यत इत्यादिभिः । उरुक्रमस्य त्रिविक्रमस्य । बन्धुः प्रेष्ठः कुमारः शिष्यश्च । ईर्यते 'सतो बन्धुमसति निरविन्दन्' इति श्रुत्या ॥ ६७३ ॥ ६७४ ॥

यस्मिन्स्थिते स्थितोऽहं स्यां यद्गतौ च गतोऽस्म्यहम् ।
तं स्रक्ष्यामीति मन्वानः प्राणं सोऽसृजत प्रभुः ॥ ६७५ ॥

इत्याहोपनिषद्यस्मात्तस्मात्प्रियकुमारकः ।
प्राण एव हरेर्बन्धुः स एवात्रापि कीर्त्यते ॥ ६७६ ॥

बन्धुशब्देन मुख्यबन्धुरेवात्र ग्राह्य इत्यत्र श्रौतयुक्तिं दर्शयति यस्मिन्निति । उपनिषद् 'स प्राणमसृजत्' इतिरूपा । तस्मात् प्रधानाङ्गत्वात् ॥ ६७५ ॥ ६७६ ॥

मुख्यस्यैव ग्राह्यतया तथा श्रौतसमाख्यया ।
हिशब्दोदितया विद्वत्प्रसिद्ध्या चापरो न सः ॥ ६७७ ॥

अत्र युक्तित्रयं संगृह्णाति मुख्यस्येति ॥ ६७७ ॥

देवानां प्रायपठितो देवश्रेष्ठो भवेदयम् ।
धर्मनिर्णयभूमित्वाद्बन्धुत्वाच्च महाप्रभोः ॥ ६७८ ॥

देवानां देवयुशब्दितानाम् । धर्मः विष्णुपादोदकस्य वैष्णवैः सेवनीयत्वरूपः । निर्णयः स्वयमनुष्ठानेन प्रतिष्ठापनम् ॥ ६७८ ॥

किञ्चेत्थेति पदाद्यत्र देवा देवयुसंज्ञिताः ।
यद्युञ्जन्ति परं देवं परिवारतया सदा ।
मदन्ति तत्र विष्ण्वङ्गाभिषिक्ते तीर्थे पाथसि ॥ ६७९ ॥

नित्यं सोशनवान्प्रोक्तस्तेन चानन्दतीर्थताम् ।
स्पष्टीकरोति वेदोऽसौ तस्य मध्वाख्ययोगिनः ॥ ६८० ॥

इत्था मध्वस्य आचरणप्रकारमनुसृत्य संज्ञायां योगं चाह यदिति पानेन हृष्यन्ति । अतः कैमुत्येन नरैः सेव्यत्वं सिध्यति । पाथसि विष्णुपादोदके । प्रोक्तः 'अपिबदलवबोधो विष्णुपादोदकं तत्' इति ॥ ६७९ ॥ ६८० ॥

आनन्दरूपस्य हरेस्तीर्थं यस्य स एव हि ।
आनन्दतीर्थनामा स्यात्तस्माच्चास्मद्गुरुर्भवेत् ।
अतः श्रुतिरियं सूते मध्वरूपं गुरुं मम ॥ ६८१ ॥

स्पष्टीकरणप्रकारमाह **आनन्देति।** **सूते** निर्धारयति। यद्वा **श्रुतिः** श्रीभूदुर्गारूपा अभिमानिनी। 'दशप्रमतिं जनयन्त योषणः' इत्युक्तेः। अत्र सूते इत्यस्य मुख्यार्थलाभः ॥ ६८१ ॥

बळित्थेति श्रुतिर्वायोर्देवस्य प्रथमं वपुः।
द्वितीयञ्च तृतीयञ्च वक्ति वाक्यत्रये क्रमात् ॥ ६८२ ॥

'यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं' इति भगवत्पादोक्तिं समर्थयते **बळित्थेति।** वायोः 'सहसो वेगवतः' इति विशेषणबलान्मूलरूपस्य ॥ ६८२ ॥

तच्च प्रसिद्धसन्त्यागायोगादन्याप्रसिद्धितः।
तत्त्ववाद्युदितं रूपत्रयमेवेति मे मतिः ॥ ६८३ ॥

'न चाविरोधे प्रसिद्धः परित्यज्यते' 'न च प्रसिद्धार्थं विनाऽन्योऽर्थो युज्यते' इति भाष्योक्तिमनुरुध्याह **तच्चेति** ॥ ६८३ ॥

हनुमद्भीमसंज्ञौ द्वौ प्रसिद्धौ विष्णुकिङ्करौ।
अतस्तृतीयोऽपि कश्चिद्भवेद्भक्तधुरन्धरः ॥ ६८४ ॥

उक्तं प्रमेयं हृद्यस्निग्धाभिः युक्तिमालाभिरलङ्करोति **हनुमदिति। भवेत्** स्वभावस्यानपायात् 'प्रवर्धतां भक्तिरलं क्षणे' इति प्रार्थनाच्च ॥ ६८४ ॥

पूर्वौ द्वौ हरिसेनायाः सेनान्यौ यन्मतौ सताम्।
अतस्तृतीयोऽपि सोयं वैष्णवाग्रेसरो भवेत् ॥ ६८५ ॥

'युद्धमखे आध्वर्यवं चक्रे' इति 'अस्मिन्युद्धे भीमसेन त्वयि भारः समाहितः' इति चोक्तेः सेनान्यौ इत्युक्तम्। अग्रेसरः सेनाप्रेरकः। 'तदा तदाननांभोजाद्वृत्तोपन्यासभारती। सेना सेनाग्रहाद्दिव्याच्छिबिरादिव निर्ययौ' इत्युक्तेः ॥ ६८५ ॥

त्रेतायां द्वापरे चैव तौ द्वौ वायुकुमारकौ।
तत्तृतीयः कलौ च स्याद्युक्त्या वायुकुमारकः।
यौक्तस्य तस्य सुजनप्रसिद्धिर्मध्वतां दिशेत् ॥ ६८६ ॥

वायोर्युगत्रयेऽवतारा इति प्रमितम्। अतः कलौ मध्व एव सः अन्यस्यानाशङ्कितत्वादसंभवाच्चेत्याह **तदिति** ॥ ६८६ ॥

बलकार्येषु यो विष्णोः साचिव्यमकरोन्मरुत्।
हनूमदादिरूपेण ज्ञानकार्येऽपि स प्रभोः।
व्यासरूपस्य सचिवीभावमर्हति नापरः ॥ ६८७ ॥

बलकार्ये सहायौ तौ प्रभोर्दानवमर्दनौ।
ज्ञानकार्ये सूत्रकृतो भाष्यकृद्धि सहायकृत्।
अतोऽपि मध्वनामा यस्तृतीयो वायुनन्दनः ॥ ६८८ ॥

'रामकृष्णादिरूपेषु बलकार्यो जनार्दनः। दत्तव्यासादिरूपेषु ज्ञानकार्यः' इति प्रथितिः। अतः कलौ व्यासस्य ज्ञानकार्ये प्रधानाङ्गं दुर्भाष्यसन्तमससन्ततिनिरासकस्य सूत्रभाष्यस्य प्रणयनेन साचिव्यधुरंधरः एष एव संसिध्यतीत्याह **नापर इति** ॥ ६८७ ॥ ६८८ ॥

किञ्चाश्रमचतुष्कस्य धर्ममाचरतो गुरोः।
प्रथमं तु वपुर्वर्णिवनिनोर्धर्ममाचरत्।
द्वितीयं गृहिणो धर्ममाचरद्भीमसंज्ञितम् ॥ ६८९ ॥

तृतीयञ्च वपुर्युक्त्या यत्याश्रमधुरन्धरम्।
भवेदवश्यं तद्वायोर्माध्वी तनुरभूद्बलात् ॥ ६९० ॥

वर्णिवनिनोः धर्मं 'ख्यातस्तेऽग्र्योवतारः सहित इह बहु ब्रह्मचर्यादिधर्मैः' इत्युक्तेः। **गृहिणो धर्मं** वनेऽपि मुनीनामातिथ्यं सूदवेषधारणेन परपाकवर्जनं अपात्रेषु

दुर्योधनादिषु श्राद्धार्थमपि द्रव्यस्याप्रतिपादनं, ब्राह्मणे पात्रे रात्रावपि अप्रत्याख्यानेन तत्प्रतिपादनं इत्येवमादिकम्। **यत्याश्रमधुरंधरं** 'पारिव्राज्याधिराजः' 'वराश्रमाचारविशेषशिक्षणं विधित्सुरस्याचरितं निशामयन्। विशेषशिक्षां स्वयमाप्य धीरधीः यतीश्वरो विस्मयमायतान्तरं' इत्युक्तेः ॥ ६८९ ॥ ६९० ॥

देवो वा दानवो वा स्याद्भाष्यकारो न मानवः।
तत्र विष्णौ रता देवा दैत्या ब्रह्मशिवादिषु।
अतोऽपि वैष्णवं भाष्यं देवमूलं न संशयः ॥ ६९१ ॥

देवः नैसर्गिकभगवदनुग्रहबलात् भगवदाज्ञया च। 'आज्ञामन्यैरधार्यां शिरसि परिसरद्रश्मिकोटीरकोटौ कृष्णस्याक्लिष्टकर्मा दधदि'त्याद्युक्तेः। **दानवो वा** तामसतपसा लब्धरुद्रादिवरावेशासादिताऽऽहार्यशक्त्या। 'वाग्मी बुभूषुः परितोषितेशः' इत्युक्तेः। **वैष्णवं** विष्णूत्कर्षतात्पर्यकम्। **देवमूलं** देवोत्तमवायुरचितम् ॥ ६९१ ॥

अयादवीं क्ष्मां करिष्य इत्येकः प्रतिशुश्रुवे।
अन्यस्तु कृष्णं जग्रास योऽग्रसीत्सकलं जगत् ॥ ६९२ ॥

'असत्यमप्रतिष्ठं ये जगदाहुरनीश्वरं' इति गीतायां जगतः ईश्वरस्य च स्वरूपापलापपरा असुरा इति निरणायि। ईदृश उद्यमः कृष्णाद्यवतारेषु दैत्येष्वेव दरीदृश्यते इत्याह **एक** इति। साल्वासुरः। **अन्यः** बकः। जगदुदरकृष्णग्राससाहसः जगत्स्वरूपनाशोद्दश्यक एव ॥ ६९२ ॥

स वादी मूलदैत्योवा तदावेशयुतोऽपि वा।
अपरः कोऽपि दैत्यः स्यान्न चेदीदृङ्मतिः कुतः ॥ ६९३ ॥

स वादी तत्समानदुराशाया सूत्रभाष्यकारी। मूलदैत्यः कलिः। तदावेशयुतः मणिमान्। 'आदेष्टव्योऽमुना राज्ञा कलिना कार्यसिद्धये' इत्युक्तेः ॥ ६९३ ॥

सूचिमात्रप्रदेशञ्च यः स्वतोऽन्यस्य नादिशत्।
स भीमगदया शाम्येन्नाभीमस्य पराक्रमैः।
मध्वस्य भीमरूपत्वे तद्यौक्तमिति मे मतिः ॥ ६९४ ॥

स कलिः दुर्योधनः। पाण्डवानां विषये इदं राज्यं सद्विलक्षणं मम विषये असद्विलक्षणं इति दुःसाधनपरः अर्थात् जगतः सदसद्विलक्षणरूपानिर्वचनीयत्वप्रजल्पनपरः। **भीमगदया** तथा तदवतारमध्वप्रणीतभाष्यरूपग्रन्थेन ॥ ६९४ ॥

किञ्च श्रुतौ मतिपदं हनुमद्वाचकं भवेत्।
यतो गत्यर्थको धातुर्ज्ञानार्थ इति शाब्दिकाः।
तज्ज्ञानशीलं तद्वन्तं निर्वक्ति हनुमत्पदम् ॥ ६९५ ॥

बळित्थासूक्तगतावतारप्रतिपादकनाममहिम्नैवोक्तार्थसिद्धिमाह **किञ्चेत्यादिभिः**। **धातुः** हन हिंसागत्योरिति धातुः। उनप्रत्ययस्यार्थः **शीलमिति** ॥ ६९५ ॥

मतिरूपं मतीत्याहुर्मतिमन्तं यतो बुधाः।
अतः स्वाभाविकी यस्य मतिः स मतिरुच्यते।
एवञ्च हनुमानेव मतिशब्दोदितो न किम् ॥ ६९६ ॥

मतिमान् मतिः एक एव मतेः स्वरूपत्वात् इत्याह **मतीति**। भगवान् भग इति विष्णुरेक एव यथा तद्वदिति भावः ॥ ६९६ ॥

द्वितीयञ्च वपुः सा वाक्पितुमानिति शंसति।
पितुरित्यन्ननामेति ब्राह्मणं पितुमांस्ततः।
बह्वन्नवानभूद्भीमो बाहुल्यार्थमतुब्बलात् ॥ ६९७ ॥

बाहुल्येति 'भूमनिन्दाप्रशंसासु भवन्ति मतुबादयः' इत्युक्तेः। **अन्नं च** उपजीव्यः कृष्णः एव। तस्य प्रेयसां प्रेष्ठ इति यावत्। 'अङ्गुष्ठमात्रं जठरे प्रतिष्ठितं जाज्वल्यमानं मम जातवेदसं' इत्याद्युक्तरीत्या बह्वन्नभोक्तृत्वमित्यप्यर्थः ॥ ६९७ ॥

तृतीयं तु वपुः प्राह दशप्रमतिनामि सा।
तच्च पूर्णप्रज्ञनाम समानार्थं प्रतीयते ॥ ६९८ ॥

बहुत्वार्थदशत्वोक्तेः पूर्णत्वार्थेऽपि वर्तनात्।
अतः पूर्णप्रज्ञ एव दशप्रमतिनामवान् ॥ ६९९ ॥

सा श्रुतिः। नामीति नामवदित्यर्थः। अनेन 'गुणानुरूपोन्नतिपूर्णबोध इत्यमुष्य नाम द्विजवृन्दवन्दितः। उदाहरद्भूरियशा हि केवलं न मन्त्रवर्णः स च मन्त्रवर्णकः' इत्युक्तं प्रमापितं ध्येयम् ॥ ६९८ ॥ ६९९ ॥

अप्यक्षरस्य साम्येन निर्ब्रूयादिति वैदिकाः।
सर्वसाम्ये तु शब्दौ द्वौ कथं नैकार्थवाचकौ ॥ ७०० ॥

सर्वसाम्ये 'दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते। प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः' इति पञ्चरात्रसंहिताप्रकारेण ॥ ७०० ॥

दशप्रमतिनामाऽन्यो यतो नास्ति जगत्त्रये।
अर्थालाभेन शब्दोऽसौ पूर्णप्रज्ञं बलाद्व्रजेत् ॥ ७०१ ॥

बलात् अर्थालाभे स्वस्य पदत्वव्याघातपरिजिहीर्षया ॥ ७०१ ॥

यतो मध्वो मातरिश्वा गुहासन्तं मथायति।
इति वक्ष्यति यं मध्वं मातरिश्वाभिधं स्फुटम्।
दशप्रमतिनामाऽत्र स एवातो न संशयः ॥ ७०२ ॥

मातारिश्वेति अयं च शब्दः 'तस्मिन्नपो मातरिश्वा दधाति' इति वायुपरः प्रसिद्ध इति भावः ॥ ७०२ ॥

वृषभस्यास्य देवस्य तृतीयं च वपुर्हरेः।
योषितो वेदमानिन्यः श्रीभूदुर्गाभिधाः किल ॥ ७०३ ॥

वृषभस्य अधिकारिषु श्रेष्ठस्य वायोः। वपुः इति पूर्वोक्तस्यात्राप्यावृत्तिः। हरेः योषित इति संबन्धः। योषण इति छान्दसम्। **किलेति**। श्रुतय इति भागवते श्रुतिगीतिकोपक्रमे बहुवचनप्रयोगात्प्रसिद्धमिति भावः ॥ ७०३ ॥

दोहसे ज्ञानदोहाय दशप्रमतिसंज्ञितम्।
जनयन्त निजान्मायरक्षणार्थमजीजनन् ॥ ७०४ ॥

निजस्य नित्यसंबन्धिनः पत्युर्विष्णोः सर्वोत्तमत्वप्रतिपादकानां आम्नायानां रक्षणार्थं दुर्वाददूरीकरणेन स्वपत्युक्तसूत्रार्थस्थापनार्थं इत्यनेन पतिशुश्रूषाङ्गतयैव कुमारस्य मध्वस्य जननं इत्याह **दोहस इति** ॥ ७०४ ॥

अमाङ्योगेपि लङ्रूपं यतः स्याच्छन्दसीदृशम्।
छन्दस्यसन्प्रत्ययोऽपि तुमर्थेऽस्तीति शाब्दिकाः ॥ ७०५ ॥

लङ्रूपं अडागमरहितं जनयन्तेतिरूपम्। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति सूत्रात्। **तुमर्थे इति**। तेन दोहसे इति साध्विति भावः ॥ ७०५ ॥

यतो मध्वो मातरिश्वा जन्मनोऽनुसुराननु।
प्रकृष्टविजिगीषादिशक्तिमान्प्रदिवः सुधीः ॥ ७०६ ॥

प्रकृष्टा द्यौर्येषु ते वा प्रदिवो देवताजनाः।
ताननूद्दिश्येति वार्थो वक्तव्योऽत्र विचक्षणैः ॥ ७०७ ॥

'यदी मनु प्रदिव' इति खण्डं व्याख्याति **यत इति**। यस्मादित्यस्य तस्मादित्यनेन (श्लो. ७११) अन्वयः। अनु इति शब्दस्य द्वेधाऽन्वयमुपेत्याह जन्मन इति सुरानिति च। शैशव एव घृतवल्यां शिवपदस्य कुवादिनो निग्रहाज्जन्मनः अनु इति युक्तम्। 'प्रचुरान्तरप्रवचनं फणिराडुपशुश्रुवान्' इत्युक्तेः सुरानुद्दिश्य इति च। प्रदिव इत्यस्य प्रथमान्तत्वमुपेत्याह **प्रकृष्टेत्यादि**। दिवुधातोर्विजिगीषाद्यर्थकत्वात्। द्वितीयान्तत्वमप्युपेत्याह **देवता इति** ॥ ७०६ ॥ ७०७ ॥

आधवे सर्वतः श्रेष्ठत्वे यद्धवः पतिरुच्यते ।
भावप्रधानो निर्देशोऽप्यस्ति तेनोचितं हि तत् ॥ ७०८ ॥

आ सर्वतः धवे धवत्वस्य श्रैष्ठ्यस्य स्थापनार्थम् ॥ ७०८ ॥

गुहासन्तं हृद्गुहायां वसन्तं पुरुषोत्तमम् ।
ईमित्थं हृद्गुहास्थत्वाद्याकारेण मथायति ।
वेदशास्त्रादिमथनं कृत्वा दर्शयति प्रभुः ॥ ७०९ ॥

गुहासन्तमिति इदं च मथनं अन्तर्याम्यन्तराद्यधिकरणभाष्येषु स्पष्टम् ॥ ७०९ ॥

दीर्घेण मथनस्यातिदीर्घतां श्रौततां च सा ।
असूचयत्तेन नानादुर्भाष्याण्यप्यमोचयत् ॥ ७१० ॥

अतिदीर्घतां प्रमाणमूलत्वेन भूतभाविभवदात्मभिः क्वचिदप्यदूष्यताम् । दुर्भाष्याणि कुकल्पनामात्रमूलत्वादस्थिराणि ॥ ७१० ॥

तस्मादीशानादयोऽपि सूरयस्तत्प्रसादतः ।
बभूवुरिति संबन्धो यतोऽत्रैको बहुः कृतः ।
आद्यर्थैव विभक्तिस्तदिति सर्वं च मङ्गलम् ॥ ७११ ॥

ईशानापः बहुवचनमाद्यर्थे । रुद्रादयः । शवसा सुखेन । तत्र हेतुः तत्प्रसादत इति । सूरयः बभूवुरित्यन्वयः । एकः ईशानः आदिपदोपात्तेन्द्रादिभिः साहित्येन बहुः कृतः ॥ ७११ ॥

वर्गार्थस्तूदितः पूर्वैर्मन्नीस्तद्युक्तिमल्लिका ॥ ७१२ ॥

तद्युक्तिमल्लिका पूर्वाचार्योक्तार्थविषये युक्तिसंग्राहिका ॥ ७१२ ॥

यस्यर्चो मध्वनामाङ्काश्श्लोकानेकादशागृणन् ।
स मध्वो वैदिकाचार्यो गुरुर्जयति दुर्जनान् ॥ ७१३ ॥

एकादश ऋचः अगृणन् इति संबन्धः । वैदिकः वेदप्रतिपाद्यः आचार्यः तदर्थोपदेशकश्च गुरुः मुख्यः ॥ ७१३ ॥

वायोर्दिव्यानि रूपाणि पद्मत्रययुतानि च ॥ ७१४ ॥

त्रिकोटिमूर्तिसंयुक्तस्त्रेतायां राक्षसान्तकः ।
हनुमानिति विख्यातो रामकार्यधुरन्धरः ॥ ७१५ ॥

स वायुर्भीमसेनोऽभूद् द्वापरान्ते कुरूद्वहः ।
कृष्णं संपूजयामास हत्वा दुर्योधनादिकान् ॥ ७१६ ॥

वायुपुराणवचनानि तदवतारप्रतिपादकानि संगृह्णाति वायोरित्यादिना । पद्मेति संख्याविशेषः । चशब्दः पूर्वोक्ता न केवलं त्रय इत्यर्थकः ॥ ७१४ ॥ ७१५ ॥ ७१६ ॥

द्वैपायनस्य सेवार्थं बदर्यां तु कलौ युगे ।
वायुश्च यतिरूपेण कृत्वा दुःशास्त्रखण्डनम् ॥ ७१७ ॥

कृत्वा आस्ते इति शेषः ॥ ७१७ ॥

ततः कलियुगे प्राप्ते तृतीयो मध्वनामकः ।
भूरेखादक्षिणे भागे मणिमद्गर्वशान्तये ।
धिक्कुर्वंस्तत्प्रभां सद्योऽवतीर्णोऽत्र द्विजान्वये ॥ ७१८ ॥

इत्याद्याः सूक्तयो वायुपुराणस्थाः सहस्रशः ।
अवतारत्रयं वायोः कथयन्ति महात्मनः ॥ ७१९ ॥

भागान्तरगतं वाक्यं तत इति । तत्प्रभां अप्रांशुनूद्नोपपदाधिवासजस्य अहङ्कारं पादतलोटजरचितदुर्भाष्यं च ॥ ७१८ ॥ ७१९ ॥

अतः श्रुतिस्मृतिस्तुत्यचित्रचारित्रविस्तृतेः ।
मध्वस्यैव मतं युक्त्याऽन्वितं परममङ्गलम् ॥ ७२० ॥

अतः मन्त्रवर्णैः अनुवर्णनीयत्वात् ॥ ७२० ॥

हितं न जानाम्यहितं न जाने नाकर्तुमीशो न च कर्तुमीशः ।
यथा नटान्नाटकदारुयन्त्रं
तथा हरेः प्रेरणयैव वर्ते ॥ ७२१ ॥

अयं स्वकृतस्तोत्रान्तर्गतः श्लोकः परमात्मनः स्वातन्त्र्योपपादनद्वारा तस्य मोक्षरूपफलदातृत्वसमर्थकतया स्वस्वप्नानुसारेण फलसौरभेऽत्र निवेश्य व्याख्यायते **यदभूदित्यादिना।** परिशेषेण भगवतः स्वातन्त्र्यं साधयितुं जीवस्य तावत्तन्निराकरोति **हितमिति।** मत्तः स्मृतिर्ज्ञानमपोहनं च इति गीतोक्तिं हृदि कृत्वाऽऽह न **जानामीति।** भगवतः प्रेरणां विनेति शेषः। एवं नाकर्तुमीश इत्यादावपि। 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया' इति गीतां 'ईशस्य हि वशो लोको योषा दारुमयी यथा' इति भागवतं चानुरुध्यास्वातन्त्र्ये दृष्टान्तमाह **यथेति** ॥ ७२१ ॥

यदभूत्तद्धरेर्यच्च नाभूत्तच्च हरेः परात् ।
जीवो विष्टिगृहीतोऽस्मात्किं
भवेत्किं च नो भवेत् ॥ ७२२ ॥

अभूत् इत्युपलक्षणं भवति भविष्यति चेत्यपि ध्येयम् । एवं नाभूदित्यत्रापि । जीवस्य स्वाहितकरणं हिताकरणं चेति दोषौ स्तः। तेन करणाकरणयोस्तस्यास्वातन्त्र्यं निश्चीयते । तथा च प्रत्यक्षेण सिद्धे कर्तृत्वे युक्त्याऽन्याधीनत्वं, तस्य चान्यस्य 'सृष्टिः स्थितिश्च संहारो नियतिर्ज्ञानमावृतिः । बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराट्' इत्यागमेन हरित्वं इति जीवस्य हर्यधीनकर्तृत्वं संसिध्यतीति भावः । **जीव इति ।** अयं पुनः विशेषः । विष्टिगृहीतस्य सत्ताऽदिकं न राजाधीनम् । जीवस्य तु हर्यधीनमिति ॥ ७२२ ॥

कर्मणो यदि तत्कर्म स्वानिष्टं कुरुते कुतः ।
अनाद्यनिष्टकर्माणि करोत्यन्यवशो ध्रुवम् ॥ ७२३ ॥

एवं 'चिच्चेत्ये केनचिन्नियते अपर्याप्तशक्त्यादिमत्त्वात्' इति तत्त्वोद्योतटीकोक्तानुमाने पक्षस्य जीवस्य ईशाधीनतां प्रसाध्य चेत्यशब्दार्थान्तर्गतकर्मणोऽपि उपलक्षणतया तत्साधयति **कर्मण इति। तत्कर्म** इदानीं क्रियमाणं स्वानिष्टसाधनं कर्म । **कर्मणः** पूर्वकर्मनिमित्तात् । इति यदि पक्षः तर्हि इति योज्यम् । पृच्छति **कुत इति ।** तत्कर्म इति आवर्तते । पूर्वं एतत्कर्मनिमित्ततयाऽभ्युपगतं कर्म इत्यर्थः । **कुतः कुरुते ।** कस्मात् कृतवान् । तत्रापि पूर्वं पूर्वं दुष्कर्म निमित्तं वक्तव्यम् । तथा चानवस्था। पूर्वपूर्वकर्मणामपि जडत्वेन अस्वातन्त्र्याद्यविशेषेण निमित्तत्वानुपपत्तिदोषस्तदवस्थ इति। फलितमाह **अनादीति। अन्यवशः** अस्वतन्त्रजीवजडान्यस्य हरेर्वशः । ध्रुवमित्यनेन 'स हि कर्ता' इति वैदिकप्रसिद्धिं प्रमाणयति । तदुक्तं भगवत्पादैः 'न च कर्मविमामलकालगुणप्रभृतीशमचित्तनु तद्धि यतः । चिदचित्तनु सर्वमसौ तु हरिर्यमयेदिति वैदिकमस्ति वचः' इति ॥ ७२३ ॥

नित्यो जीवो स्वतन्त्रश्चेदनित्यं कर्म जन्मनि ।
स्थितौ लये परापेक्षमन्याधीनं कथं न तत् ॥ ७२४ ॥

कैमुत्येन कर्मोपलक्षितजडस्येशाधीनतां साधयति **नित्यः इति ।** 'अनित्यत्वं देहहानिर्दुःखप्रप्तिरपूर्णता' इति चतुर्विधनाशेषु मध्ये देहहान्यादिनाशोपेतत्वेऽपि स्वरूपतो नित्यः। अनित्यं स्वरूपत एव नाशोपेतम्। न चैवं नित्यजडानामीशाधीनत्वासिद्धिः। वियदधिकरणन्यायेन तेषामपि पराधीनविशेषावाप्त्यादेर्विद्यमानत्वादिति भावः ॥ ७२४ ॥

यत इत्येकवचनादेको दाधार चेत्यलम् ।
स्पष्टश्रुतेर्न कर्माणि कर्मद्वारा न चेतनाः ।
अनन्तः सर्वजगतां कर्तारो लाघवादपि ॥ ७२५ ॥

यत इति 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतौ इति उपस्कर्तव्यम् । न चास्य येभ्य इत्यर्थकत्वं शङ्क्यम् । येन, यदिति वाक्यशेषानुसारेण निश्चयोपपत्तेः । स्पष्टश्रुतेश्चैवमित्याह **एक इति।** लाघवादपि ईश एव कर्ता इति शेषः । तथा च 'केनचिन्नियते' इति साध्यकानुमाने किंपदस्यार्थः अपर्याप्तशक्त्यादिहेतूनां

पक्षधर्मत्वबलात् स्वतन्त्रो हरिरेवेति लाघवयुक्त्या श्रुत्याऽपि सिद्ध्यतीति भावः ॥ ७२५ ॥

लोकेऽदृष्टद्वारकर्तृमात्रात्क्वापि क्रियाऽजनेः ।
कृतिपूर्वककर्तैव कर्ताऽन्यस्तूपचारतः ।
अन्यथा कन्यकायाः स्याद्भर्तापि पितृवत्पिता ॥ ७२६ ॥

जीवानां अदृष्टात्तद्भोग्यक्षित्यङ्कुरादिकार्योत्पत्तिरित्येतावता न जीवानां तत्कर्तृत्वं सिध्यति । उपादानादिगोचरापरोक्षज्ञानचिकीर्षाकृत्याद्याश्रयस्यैव कर्तृपदार्थत्वात् अन्यथाऽतिप्रसङ्गादित्याह **लोक इति**। अनेन तार्किकोक्तः आनुमानिकोऽशरीर ईश्वरः कर्तेत्यपि प्रत्युक्तम्। लोके चेष्टाश्रयशरीरवतां कुलालादीनामेव कर्तृत्वदर्शनेनाशरीरस्य तदीश्वरस्य कर्तृत्वायोगात्। तदुक्तं भगवत्पादैः 'अकार्यत्वमुपाधिरित्युक्ते शरीरिजन्यत्वमितरत्राप्युपाधिरित्युत्तरमि'ति ॥ ७२६ ॥

अतो नामुख्यकर्त्रैव महाकार्यमिदं भवेत्।
किं स्त्रीपुंसौ विनाऽपि स्यात्पुत्रः पुत्रेष्टिमात्रतः ॥ ७२७ ॥

लोके घटादावल्पकार्येऽपि कृत्याश्रय एव कर्ता सिद्धो यतः **अत इति** पूर्वेण संबन्धः। **स्त्रीपुंसौ विना** कृत्याश्रयेन विनेति भावः। **पुत्रेष्टिमात्रतः** अदृष्टहेतुकर्ममात्रतः। तदुक्तं भगवत्पादैः 'विना यत्नं न हठो नापि कर्म' इति ॥ ७२७ ॥

न चेदुपादानमपि तद्वत्स्यादौपचारिकम्।
दृष्टानुसारतस्तच्चेत्कर्ताऽपि स्यात्तथैव हि ॥ ७२८ ॥

न चेत् अदृष्टाद्वारकस्य साक्षात्कार्याव्यवहितपूर्ववर्तिनः कृत्याश्रयस्य कर्तृत्वं नोपेयते चेत्। अदृष्टद्वारकस्य औपचारिककर्तुर्जीवस्यैव कर्तृत्वमुपेयते चेदित्यर्थः। तद्वत् हविरादेरेव घटादिकं प्रत्युपादानत्वं स्यात्। तस्याप्यदृष्टद्वारा औपचारिकोपादानत्वात्।

यत्किञ्चिदुपादानभूतहविरादिगोचरज्ञानादेर्घटजनकादृष्टजनकत्वात्। लोके तत्रोपादानत्वव्यवहारो नास्तीति तु कर्तर्यपि सममिति भावः ॥ ७२८ ॥

अदृष्टमपि बीजाद्यं कल्प्यं फलबलाद्यथा ।
तथाऽदृष्टोऽपि कर्ताऽस्य
कल्प्यः कोऽप्युरुशक्तिमान् ॥ ७२९ ॥

ईश्वरः कर्ताऽनुपलंभबाधित इति चेदङ्कुरोपादानमपि तथा। फलबलात्कल्पनं तूभयत्रापि सममित्याह **अदृष्टमपीति**। श्रुत्या ईश्वरस्य कर्तुरुपलंभेन अनुपलंभोऽसिद्धश्चेत्यपि ध्येयम् ॥ ७२९ ॥

न च कालादिकं तस्य प्रेरकं जडवस्तुनः ।
स्वतःप्रवृत्त्ययोगेन प्रेर्यत्वात्कर्तृतोऽन्यतः ॥ ७३० ॥

कालादिकं आदिपदेन प्रकृतिस्वभावादिकं ग्राह्यम्। **स्वतःप्रवृत्त्ययोगेनेति** तदुक्तं भाष्ये [२–२–१] 'अचेतनस्य स्वतः प्रवृत्त्यनुपत्तेर्नानुमानपरिकल्पितं प्रधानं जगत्कर्तृ' इति ॥ ७३० ॥

नापि तत्प्रेरको ब्रह्मा नेशो नेन्द्रोऽपरे कृतः ।
अंघ्र्यर्चनेनतत्तीर्थजुष्ट्या तद्दत्तभूत्वतः ॥ ७३१ ॥

अपर्याप्तशक्त्यादिमत्त्वरूपहेतुमत्तया श्रीब्रह्मादयोऽपि पक्षसमा एवेत्याह **नापि इति**। हेतोस्तेष्वसिद्धिं प्रत्याह **अंघ्रीति** 'अव्यक्तं शुश्रूषुर्नृपसत्तम' इत्यनेन श्रियः, विरिञ्चोपहतार्हणांभ' इत्यनेन चतुर्मुखस्य, 'तीर्थेन मूर्ध्न्यधिधृतेन' इत्यनेन शिवस्य, 'वसु स्पार्हमुत जेतोत दाता' इत्युक्तदिशा वामनरूपेण दत्तत्रैलोक्यैश्वर्यवत इन्द्रस्य एवमितरेषां स्कन्दादीनां स्वातन्त्र्याभावोऽवसेयः ॥ ७३१ ॥

किञ्च सृज्यं वशे स्रष्टुर्हार्यं हर्तुर्वशे परम्।
पातुर्वशे स्थितं सर्वमतो विष्णोर्वशेऽखिलम् ॥ ७३२ ॥

किञ्च सादेरेव ब्रह्मणा सृष्टिः अनित्यस्यैव शिवेन संहारः किन्तु असङ्कोचेन सर्वस्यापि विष्णुना पालनं इति सर्वस्य जगतो विष्णोरेव वशत्वं सिध्यतीत्याह **किञ्चेति** ॥ ७३२ ॥

यत्कर्तुश्च स्थितिर्वाच्या हर्तुश्चावश्यकी स्थितिः ।
न ह्यसत्कारणं दृष्टं ब्रह्मेशौ तद्वशौ हरेः ॥ ७३३ ॥

ब्रह्मशिवयोः सृष्टिसंहारौ प्रति कारणत्वं तयोः पूर्ववृत्तित्वरूपस्थितिमपेक्षते । अन्यथा कारणत्वलक्षणव्याघातात् । सा च स्थितिर्विष्णवधीना । अतस्तयोरपि विष्णुवशत्वसिद्धिरित्याह **यदिति । असत्** देशकालसंबन्धरूपस्थितिरहितम् । **तत्** तस्मात् ॥ ७३३ ॥

यतश्च स्वस्थितिः स्वीयव्यापारत्वात्स्वतो हरेः ।
अतः स्वतन्त्रता तस्य सिद्धा सिद्धार्थपद्धतेः ॥ ७३४ ॥

स्वयं सत्तानियामकत्वात् विष्णोः सत्ता न परापेक्षेति तस्य स्वतन्त्रताऽपि सिध्यतीत्याह **यत इति** ॥ ७३४ ॥

न ह्यण्डजः सृजेदण्डमहङ्कारं हरो हरेत् ।
महत्तत्वं कुतः सृष्टं कुतो नष्टं विचार्यताम् ॥ ७३५ ॥

'स्रष्टा पाता तथैवात्ता निखिलस्यैक एव तु । वासुदेवः परः पुंसामितरेऽल्पस्य वा न वा' इति भाष्यवचनमनुरुध्याह **नेति । अण्डं** स्वविग्रहम् । 'ततः कूटस्थमसृजद्ब्रह्माण्डविग्रहम्' इत्युक्तेः । **अहङ्कारं** शिवविग्रहं 'महत्तत्वादहङ्कारं ससर्ज शिवविग्रहं' इति वचनात् । महत्तत्वस्य ब्रह्मणस्तनुत्वेन न ब्रह्मणा सृष्टिः आत्माश्रयात् । न रुद्रेण नाशः ब्रह्मण्येव तस्य विलीनत्वेन तदानीमसतः तन्नाशकारणत्वायोगात् । अतः हरिणैव तत्सृष्टिसंहाराविति भावः । अतो जन्मादिहेतुत्वं तस्यैव स्वलक्षणमिति भावः ॥ ७३५ ॥

अतः स्वयोग्यकार्यस्य कर्तारौ तौ हरीच्छया ।
हरिस्तु कर्ता सर्वस्य भर्ता हर्ता त्रिशक्तिधृत् ॥ ७३६ ॥

'सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः । विश्वं पुरुषरूपेण परिपाति त्रिशक्तिधृत्' इति नारदं प्रति चतुर्मुखवचनमपि [भा. २- ६- ३१] अस्मिन्विषये प्रमाणयति । अत्र 'त्रिशक्तिधृत्' इत्यनेन ब्रह्मशिवयोः शक्तिरपि भगवदधीनेति हरेश्च अन्तःस्थित्वा तयोः प्रेरकत्वं चेति ज्ञायते ॥ तदुक्तमनुव्याख्याने [१–२–१३] 'अन्तःस्थित्वा रमणकृदन्तरः समुदाहृत' इति ॥ ७३६ ॥

न पिताऽधिपतिर्नृणां न हर्ता यामिकोऽपि वा ।
किन्तु रक्षक एवातो विष्णुरेव जगत्पतिः ॥ ७३७ ॥

दशदिक्पतिभावेन देवा ब्रह्मेशपूर्वकाः ।
खण्डाधिपतयो विष्णुस्तदभावाज्जगत्पतिः ॥ ७३८ ॥

लोकरीत्यापि रक्षकस्यैवाधिपतित्वमित्याह **नेति । पिता** केवलं जन्महेतुः । **यामिकः** रात्रौ प्रबुध्य तिष्ठन् चोराणां संहारे अधिकृतः । अतः हर्ता इत्युक्तः । **नृणां अधिपतिः** नृपतिशब्दव्यवहारविषयो नेति प्रत्येकं संबन्धः । **रक्षकः** सर्वप्रकारेण योगक्षेमनिर्वाहकः । 'इन्द्रो वह्निः पितृपति'रित्यादिनोक्ततत्तद्दिङ्मात्रपतित्वेन सन्ध्योपासने इन्द्रादीनां वन्दनं क्रियते तेन ते खण्डाधिपतयः । विष्णुस्तु नैवमित्याह **तदभावादिति** । दिग्विशेषानिर्देशेन निर्विशेषेण 'नमोऽस्त्वनन्ताय सहस्रमूर्तये' इति, 'ब्रह्मण्यो विष्णुरच्युत' इति 'नमो विष्णवे महते करोमि' इति च निर्देशात् 'मुख्यस्य निर्विशेषेण' इति न्यायेन स एव 'जगद्धिताय कृष्णाय गोविन्दाय नमो नमः' इति वन्दितत्वेन जगत्पतिरित्याह **जगत्पतिरिति** ॥ ७३७ ॥ ७३८ ॥

अखिलैर्लोकपालैश्चाप्यदृश्यः सन्नुरुश्च सन् ।
तेषामन्तर्बहिश्च त्वं सदा विचरसीति वाक् ॥ ७३९ ॥

यं हित्वा राक्षसावेशान्मत्सरज्वरसंयुताः ।
यतमानाः पृथक्सर्वे लोकपालाः समेत्य च ॥ ७४० ॥

त्रातुं न शेकुरिति वाक्चास्ति भागवते यतः ।
अखण्डाधिपतिस्तस्माद्विष्णुरेव न संशयः ।
मनोर्हि वागियं कैर्वा माननीया न मानवैः ॥ ७४१ ॥

'अन्तर्बहिश्चाखिललोकपालकैरदृष्टरूपो विचरस्युरुश्च नः । स ईश्वरस्त्वं य इदं वशेनयन्नात्मा यथा दारुमयीं नरः स्त्रियम् ॥ यं लोकपालाः किल मत्सरज्वरान्हित्वा यतन्तोऽपि पृथक् समेत्य च । पातुं न शेकुर्द्विपदश्चतुष्पदः सरीसृपस्थासु यदत्र दृश्यते' इति भागवतं [५/१८/२६,२८] उक्तार्थे प्रमाणयति **अखिलैः इति**। **अदृश्य इति** 'सहैव सन्तं न विजानन्ति देवाः' इति श्रुत्युक्तेः । **अन्तः इति** 'अन्तःप्रविष्टं कर्तारमेकं' इत्युक्तेः । **बहिरिति** अन्तःसमुद्रे मनसा चरन्तं इत्युक्तेः ॥ 'यं हित्वा त्रातुं न शेकुरि'ति वचनात्तेषां लोकैकदेशस्यामुख्यं पालकत्वमपि भगवन्नियतं इति शंसनेन महायोगवृत्त्या स्वातन्त्र्यं तद्गतत्वं चेत्युभयप्रकारेण **विष्णुरेवाखण्डलोकाधिपतिः** संसिध्यतीत्याह **न संशय इति। मनोः** मानवानां पितुः ॥ ७३९ ॥ ७४० ॥ ७४१ ॥

तच्छ्रुत्वा मुनयस्सर्वे विस्मिता मुक्तसंशयाः ।
भूयांसं श्रद्दधुर्विष्णुं यतः शान्तिर्यतो भयम् ।
इति भागवते प्रोक्तं मुनीनां वचनं स्मर ॥ ७४२ ॥

तद्गोत्रजातः पूर्वेषां तेषां वाक्यं न विस्मर ।
यद्गोत्रप्रवरेशास्ते तानुदास्ते कथं भवान् ॥ ७४३ ॥

भूयांसमिति अयं भागवतश्लोकः गुणसौरभे व्याख्यातः [७०२–७०३] अधिकविवक्षया अत्र प्रस्तावः । मुनयः गोत्रप्रवरेशाः कश्यपात्रिभरद्वाजादयः ॥ ७४२ ॥ ७४३ ॥

अस्य देवस्येति वेदे यथा विष्णोर्वशे हरः ।
स्पष्टं श्रुतस्तथा वेदे न क्वापीशवशो हरिः ॥ ७४४ ॥

ईषेरिच्छार्थकाद्धातोः पचाद्यचि कृते सति ।
गुणे जाते पालनेच्छा कृपा यस्य स्वसेविषु ।
तस्यैषस्य न चेदेतस्येति स्याच्छब्दविन्मते ॥ ७४५ ॥

'अस्य देवस्य मीह्ळुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः । विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत्' इति सुस्पष्टश्रुत्या रुद्रादुत्तमत्वं विष्णोः सुगममिति भावेन श्रुतिं व्याख्याति । **ईषेरित्यादिना । एषस्य** स्वभक्तपालनेच्छावतः आसमन्तादप्रतिहतेच्छस्य वा । **न चेत्** एतच्छब्दस्य षष्ठ्या रूपं चेत् इत्यर्थः ॥ ७४४ ॥ ७४५ ॥

तस्यास्य विष्णोर्देवस्य भक्ताभीष्टस्य सेचनात् ।
मीह्ळुषो यन्मिहः सेके हविर्भिर्यज्ञसाधनैः ॥ ७४६ ॥

मीह्ळुषः भक्तानामभीप्सितसकलपुरुषार्थसेचकस्य ॥ ७४६ ॥

प्रभृथं प्रभृतं शस्तं तृतीयोऽतिशये यतः ।
अचो हलश्च यत्पश्चात्तृतीयोऽसौ ततः किल ।
ततः प्रभरणे पूजात्मके सम्यक्कृते सति ॥ ७४७ ॥

प्रभृथे प्रकर्षेण भरणे संपूर्णपूजायामित्यर्थः । तकारात् त् वर्णादकाराच्च परः थकारः तृतीयो भवतीति आह **तृतीय इति** ॥ ७४७ ॥

वया भूत्यादिदानेन बन्धको वयबन्धने ।
इति धातोर्हि प्रसिद्धो रुद्रस्त्रिभुवनेश्वरः ॥ ७४८ ॥

वयाः अहङ्काररूपेण बन्धकः । तत्प्रकारः भूत्यादिदानेन । आदिपदेन असुरेभ्योऽवध्यत्वादिकम् ॥ ७४८ ॥

रुद्रियं रुद्रसंबन्धि महित्वं महिमोच्चयम् ।
घस्येयादेशकरणे समुद्रियपदं यथा ।
तथा बाहुलकात्तस्माद्रौद्रमेव हि रुद्रियम् ॥ ७४९ ॥

महिमोच्चयं इन्द्राद्युत्तमत्वम् ॥ ७४९ ॥

विदे लेभे तद्वदेव पूर्वाभ्यासमुपैक्षत ।
पूर्वानभ्यस्तपदवीप्राप्ति सूचयितुं श्रुतिः ॥ ७५० ॥

अनावृत्तिपदप्राप्तिसूचनाय च सूत्रवत् ।
अस्मिन्नर्थे प्रमाणानां प्रसिद्धिं च हिना जगौ ॥ ७५१ ॥

विविदे इत्येवं अभ्यासानाश्रयणे हेतुः **अनभ्यस्तेति** । पूर्वमप्राप्तमित्यर्थः । तत्रैव हेत्वन्तरं **अनावृत्तीति** । **प्रसिद्धिं** 'दशकल्पं तपश्चीर्णं' इत्यादि ॥ ७५० ॥ ७५१ ॥

युवामप्यश्विनौ वर्तिर्वर्तनं याज्ञिकान्नवत् ।
इरावद्ब्राह्मणे यस्मादिलेत्यन्नमुदीरितम् ।
डलयोरलयोश्चाभेदेन स्यादीदृशं पदम् ॥ ७५२ ॥

इरावत् यज्ञाहुतिरूपान्नवत् । 'इरेत्यन्ननाम' इति ब्राह्मणवचनात् । **वर्तिः** वर्तनम् । सर्पिःपदवन्नपुंसकपदमिदम् ॥ ७५२ ॥

यासिष्टं तस्य कृपयैवायासिष्टं लुङीदृशम् ।
अमाङ्योगेऽपि यद्वेदे पदं शास्ति स पाणिनिः ॥ ७५३ ॥

औणादिके सन्तरूपाद्वृतेर्वर्तिर्भविष्यति ।
यथार्चिः सर्पिरित्यादिपदं तद्वदिदं पदम् ॥ ७५४ ॥

ईदृशं अडागमरहितम् ॥ ७५३ ॥ ७५४ ॥

अतः स्पष्टार्थवाणीयं रुद्रस्याभीष्टदायकम् ।
विष्णुं शुभगुणांभोधिं रुद्रादप्यधिकं जगौ ॥ ७५५ ॥

स्पष्टेति रुद्राभीष्टदायकत्वस्य अश्विनोर्विषये दृष्टान्ततयोक्तेरिति भावः । **विष्णुं** विष्लृ व्याप्ताविति धातोः त्रिविधव्याप्तिमन्तम् । तदाह **शुभेति** ॥ ७५५ ॥

श्रौतोऽखण्डपदः सोमो नेशो वेदविदां मते ।
विश्वाधिकत्वगीः सावकाशेन्द्रादिश्रुताविव ॥ ७५६ ॥

जनितोत विष्णोरित्यत्रोक्तः सोमः रूढ्या पवमान एव न तु उमासहितत्वरूपयोगेन रुद्रः । वैदिकैः सोमपदे सखण्डत्वस्यानङ्गीकारात् । पवमानस्य जनितृत्वं विष्णुमहिमाविर्भावहेतुत्वमेवेति च प्राक् प्रसाधितम् । एवं विश्वाधिको रुद्र इत्यत्र विश्वस्मादिति वा महर्षिरिति वाक्यशेषात् ऋषिभ्य उत्तम इति वाऽर्थान्तरं ध्येयम् । अन्यथा विश्वस्मादिन्द्र उत्तर इति वाक्ये प्रतीतार्थमेवाश्रित्य इन्द्रस्यैवोत्तमत्वप्रसङ्ग इत्याह **इन्द्रादीति** ॥ ७५६ ॥

सोऽरोदीदिति वेदे हि रोदनाद्रुद्रतोदिता ।
न ते महित्वमिति तु विष्णोरसमतोदिता ॥ ७५७ ॥

'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वं' इत्यत्र श्रुतौ रुद्रस्योद्वेगकार्यं रोदनं श्रूयते अतः असामञ्जस्यात्र पशुपतिः जगत्कारणम् । **ते** विष्णोः महित्वं जगज्जन्मादि-कारणत्वरूपं स्वलक्षणं इतरे ब्रह्मादयः न जातु प्राप्नुवन्ति इति श्रुत्यर्थः ॥ ७५७ ॥

या ह्युच्छेषणभागो वै रुद्र इत्याह वेदवाक् ।
जुषेथां यज्ञमित्याद्या सा विष्णुं वक्त्यतः स राट् ॥ ७५८ ॥

इन्द्रा विष्णू युवां यज्ञं जुषेथां द्रविणं च नः ।
धत्तं दत्तं प्रदिशतामरिष्टैर्नाशवर्जितैः ॥ ७५९ ॥

पथिभिर्मोक्षमार्गैर्नः पारयन्तो भवांबुधेः ।
परं पारं प्रापयन्ताविति यच्छ्रुतिरञ्जसा ॥ ७६० ॥

वेदवाक् 'उच्छेषणभागो वै रुद्र' इति वाक् । इदमुपलक्षणम् । 'एष ते रुद्रभागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै' इत्यादि भागवतवाक्यमपि ग्राह्यम् । [४–६–५३] 'जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयन्त' इति श्रुतिं व्याचष्टे **इन्द्रेति** ॥ ७५८ ॥ ७५९ ॥ ७६० ॥

ऐहिकामुष्मिकफलप्रदातारं मखस्य च।
भोक्तारं विष्णुसूक्तस्था
विष्णुं स्तौति द्विरूपिणम्॥ ७६१॥

यतश्च रूद्राहुतिदा हस्तमद्यापि याज्ञिकाः।
प्रक्षालयन्ति तेनासौ यज्ञोच्छिष्टाशनो ध्रुवम्॥ ७६२॥

द्विरूपिणं इन्द्रः विष्णुरिति रूपद्वयवन्तम्॥ ७६१॥ ७६२॥

प्रलये वटपत्रेप्सु शेते नारायणः किल।
तदा क्वान्ये सुरास्तस्मात्सर्वेशो विष्णुरेव हि॥ ७६३॥

'एको नारायण आसीन्न ब्रह्मा नेशानो नाग्नीषोमौ' इत्यादिश्रुतेः पारतन्त्र्येणासमञ्जसत्वात्र पशुपतिरीश्वरो जगत्कर्ता इति पत्युरधिकरण-भाष्यानुरोधेणाह प्रलय इति॥ ७६३॥

किञ्च गीतोपनिषदि सर्वं द्विपुरुषाख्यया।
संगृहीतं हरिस्त्वेकः पुरुषोत्तम ईरितः ॥ ७६४॥

द्विपुरुषाख्यया 'द्वौ इमौ पुरुषौ लोके क्षरश्चाक्षर एव च' इति। ईरितः लोके वेदे च प्रथितः॥ ७६४॥

रामः प्रभू रामभृत्या देवाः सर्वेऽपि वानराः।
कृष्णः प्रभुः कृष्णभृत्या देवा धर्मात्मजादयः॥ ७६५॥

प्रादुर्भावद्वये ह्यस्मिन् सर्वेषां निर्णयः कृतः इति म.ता.निर्णयोक्तिमनुरुध्याह प्रभुरिति॥ ७६५॥

अर्हत्तमो ह्यग्रपूजामर्हत्यन्यो न संसदि।
यथैवेह तथाऽमुत्र तद्विष्णुरखिलप्रभुः ॥ ७६६॥

'अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान्सात्वतां पतिः'। इति भागवतोक्ति [१०–७४–१९] संगृह्णाति अर्हतीति। तत् मूलावतारयोरत्यन्ताभेदात्॥ ७६६॥

तस्मात्सर्वेश्वरो विष्णुः सर्वं सर्वत्र सर्वदा।
प्रवर्तयति सर्वज्ञः सर्वशक्तिः सनातनः ॥ ७६७॥

तद्भूतं भूतमेतस्माद्भवच्च भवति प्रभोः।
भाव्यं भविष्यति ह्यस्य
कृपया नान्यतः क्वचित्॥ ७६८॥

ॐ अनेन सर्वगतत्वमायामयशब्दादिभ्यः इति सूत्रस्य 'सर्वदेशकालवस्तुष्वनेनैव सृष्ट्यादिकं प्रवर्तते' इति भाष्यं हृदि कृत्वाऽऽह तस्मादिति॥ ७६७॥ ७६८॥

अतः सर्वेष्टलाभाय सर्वानिष्टनिवृत्तये।
तमर्च्यमर्चय स्तुत्यं स्तुहि नम्यं नमाच्युतम् ॥ ७६९॥

अतः तस्यैव स्वातन्त्र्येण फलदानसमर्थत्वात्। तदुक्तं ॐ फलमत उपपत्तेरिति॥ ७६९॥

ज्ञानं मानं नेति वाक्यं व्याहतं स्याद्विचारणे।
धात्वर्थः प्रत्ययार्थश्च यतः स्थानद्वये समः ॥ ७७०॥

सौरभपञ्चकोक्तं प्रमेयजातं मन्दानुजिघृक्षया संगृह्णाति उत्तरग्रन्थसन्दर्भेण। एकान्तभक्तानां भगवज्ज्ञानमेव शास्त्रस्य परमप्रयोजनम्। मोक्षस्तु तदर्थत्वेनैव। किन्तु नैयायिकादयः सम्यगनुभवसाधनं प्रमाणमिति तल्लक्षणकथनेन ज्ञानस्य प्रमाणशब्दव्यवहारविषयतां एव अपलपन्ति। तानपाकरोति ज्ञानमिति। माङ् धातोः ज्ञाधातोश्चैक एव ज्ञानरूपोऽर्थः। प्रत्ययस्य भावार्थत्वमप्युभयत्र समं इत्याह धात्वर्थ इति॥ ७७०॥

स्वतस्त्ववादे प्रामाण्यं कस्येति च विचारय ॥ ७७१ ॥

ज्ञानप्रामाण्यरूपधर्मिण एवाभावे तस्य स्वतस्त्वरूपधर्मनिषेधो व्याहत इत्याह **स्वतस्त्वेति** ॥ ७७१ ॥

प्रज्ञप्तिः प्रमितिः प्रज्ञा प्रमा प्रज्ञानमेव हि।
प्रमाणं स्याद्यतः शब्दाः पर्यायाः शक्तिशोधने ॥ ७७२ ॥

प्रज्ञानं प्रमाणं इति शब्दयोरैकार्थ्यमभिनीय दर्शयति **प्रज्ञप्तिरिति** ॥ ७७२ ॥

श्रवणं मननं ध्यानं दर्शनं स्मरणं तथा।
गमनं मोचनं बन्धाद्रमणं च किमुच्यताम् ॥ ७७३ ॥

गर्भाधानं च जननं तथोपनयनं च किम्।
यजनाध्ययने दानभोजने के विचारय ॥ ७७४ ॥

ल्युटो भावार्थे करणापेक्षया प्रयोगबाहुल्यं दर्शयति **श्रवणमित्यादिना** ॥ ७७३ ॥ ७७४ ॥

भावार्थकल्युडन्तोक्तिबाहुल्यस्यैव दर्शनात्।
अर्थोऽसौ प्रथमप्रोक्तो मुख्यस्तस्येति मे मतिः।
तल्ल्युटो भाववाचित्वं मरणेऽपि न गच्छति ॥ ७७५ ॥

प्रथमेति पाणिनिसूत्रे भावे करणाधिकरणयोरित्यत्र प्रथमेत्यर्थः। **मरणेऽपि** इति। तच्छब्दस्यापि भावार्थकत्वादिति हृदयम् ॥ ७७५ ॥

प्रमाणीभूतभावार्थमनुसृत्यैव तल्ल्युटः।
करणेऽपि प्रवृत्तिः स्याद्धात्वर्थस्य प्रवेशनात् ॥ ७७६ ॥

तत्केवलं प्रमाणं स करणेऽनुप्रमाणता।
यतोऽनुशासनं चानु ततोऽप्येतद्गुणोचितम् ॥ ७७७ ॥

'ज्ञानसाधनं' इति करणे ज्ञानरूपभावस्यानुप्रवेशोऽस्ति। ज्ञानं इति भावे तु न करणस्यानुप्रवेशः। अत उपजीव्यत्वाद्भाव एव प्रत्ययस्य मुख्यार्थ इत्याह **प्रमाणीभूतेति**। **केवलं** अनुशब्दाविशेषितम्। **सः** भावार्थः। अनुशासनं ल्युट् प्रत्ययविधायकं सूत्रं। **अनु** करणे भावादनन्तरम्। **गुणेति**। अप्रधानेत्यपि भावः ॥ ७७७ ॥

आधाराख्याधिकरणं भूम्यादिर्न प्रयोगवान् ॥ ७७८ ॥

'ननु त्रिविधं प्रमाणमिति वक्तव्यम्। ल्युटोऽधिकरणेऽप्यनुशासनात्। सत्यम्। तथापि प्रमाणशब्दस्याधिकरणे प्रयोगाभावात्तदसंग्रहः' इति पद्धत्युक्तं विवृण्वान आह **आधारेति**। आधारोऽधिकरणमिति सूत्रोक्तदिशा क्रिययोः कर्तृकर्मणोराधारक्रियां प्रति य आश्रयस्तदधिकरणमुच्यते। न प्रमारूपक्रियाश्रयः। देवदत्तः कटे शेते, स्थाल्यां पचति इत्यादौ तथैव दर्शनात्। अधिकरणे प्रयोगाभावं दर्शयति **भूमीति** ॥ ७७८ ॥

नारायणादिशब्देषु ल्युटोऽधिकरणे गतिम्।
सूचयन्नेव तं प्राह कर्त्रर्थे नानुशास्ति तम् ॥ ७७९ ॥

षट्कारकमते कर्ता नैवाधिकरणं किल।
कर्तृप्रामाण्यवादं तद्धन्ति पाणिनिरेव सः ॥ ७८० ॥

न चैवमधिकरणे ल्युटोऽनुशासनं व्यर्थमिति शङ्क्यम्। धात्वन्तरेऽवकाशसंभवादित्याशयेन तादृशगतिं दर्शयति **नारायणेति**। विप्राः प्रमाणं इति प्रयोगस्तु तद्वाक्यस्य तज्जन्यज्ञानस्य वा प्रामाण्याभिप्रायेणौपचारिक इत्याशयेनाह **नैवेति** ॥ ७७९ ॥ ७८० ॥

याथार्थ्यमेव प्रामाण्यं यतः स्ववचने जनः।
प्रमाणतायै मे वाक्यं यथार्थमिति शंसति।
व्यवहारानुकूलत्वाल्लक्षणं च तदेव तत् ॥ ७८१ ॥

'याथार्थ्यमेव मानत्वं' इति अनुव्याख्यानोक्तसामान्यलक्षणस्य अनुप्रमाणे वाक्येऽव्याप्तिमाशङ्क्य तत्रापि प्रयोगसद्भावसमर्थनेन परिहरति **जन इति**॥ ७८१ ॥

यदा यत्र यथा योऽर्थस्तथा तद्विषयीकृतौ ।
पारंपर्येण साक्षाद्वा यथार्थं वक्ति तज्जनः ॥ ७८२ ॥

'यद्यथाभूतं प्रतीतं तस्य तथाभूतस्य सत्त्व' इति सुधोक्तं परिष्कारमनुवदति **यदेति**। 'ज्ञेयविषयीकारित्वं च साक्षाद्वा साक्षाज्ज्ञेयविषयीकारिकारणत्वेन वा विवक्षितमिति नानुप्रमाणेष्वव्याप्तिरि'ति पद्धत्युक्तमाह **पारंपर्येण साक्षाद्वेति**॥ "ज्ञानविषय एव हि करणानां विषयः। न हि तानि कमप्यविषयीकुर्वन्त्येव ज्ञानं जनयन्ति। नाप्यन्यविषयाणि। अतिप्रसङ्गात्। केवलं विषयस्य ज्ञेयतां ज्ञानमुपाधितया करणानि तु तज्जनकतया संपादयन्ति इत्येतावन्तं विशेषमाश्रित्य केवलानुप्रमाणभेदः समर्थितः" । इति सुधोक्तो विवेकोऽत्रानुसन्धेयः ॥ ७८२ ॥

प्रामाण्यवादे ज्ञानस्य प्रामाण्यं वर्तते किल ।
स्मर्ताऽन्यस्यास्य विस्मर्ता
लक्षणोक्तौ स किं बुधः ॥ ७८३ ॥

प्रामाण्यवादे ज्ञानतत्करणयोः प्रामाण्यस्य परतस्त्वकथनप्रस्तावे । **लक्षणोक्तौ** लक्षणंकथनप्रस्तावे पुनः **अस्य** स्वेनैव प्रस्तावान्तरे स्वीकृतस्य ज्ञानप्रामाण्यस्य विस्मर्ता ।अन्यस्य करणप्रामाण्यमात्रस्य । **स्मर्ता सः** तार्किकः ॥ ७८३ ॥

अदुष्टकरणं चक्षुः प्रमाव्याप्तं यथा भवेत् ।
तथा प्रमाता जीवोऽपि प्रमाव्याप्तः कुतो न ते ॥ ७८४ ॥

'प्रमाव्याप्तं प्रमाणमित्युदयनः । तदपि सर्वस्यापि प्रमेयस्येश्वरप्रमाव्याप्तत्वे-नातिव्यापकत्वादयुक्तं' इति पद्धत्युक्तदिशाऽऽह **अदुष्टकरणमिति**॥ जीवः इति उपलक्षणं प्रमेयमात्रमित्यपि ग्राह्यम्। सुखादिप्रमेयेऽस्मदादिप्रमाव्याप्तत्वेना-तिव्याप्तिश्च द्रष्टव्या। **चक्षुः** निर्दोषार्थसन्निकृष्टमित्यपि विशेषणीयम्। अन्यथाऽव्याप्तिप्रसङ्गात्। **तथा** तादृशचक्षुरादिमान्। यथोक्तं जनार्दनभट्टीय पद्धतिटिप्पणे 'प्रमाव्याप्त्या प्रमाणत्वे प्रमातुरपि तद्भवेत्। जीवेषु तदभावश्चेन्नेत्रादावपि नो भवेत्। विशिष्टस्य प्रमाव्याप्तौ जीवे सा केन वारिते'ति ॥ ७८४ ॥

अशिष्टकर्तृप्रामाण्ये कर्तृमात्रे तदुच्यताम् ।
न चेत्सभास्वशिष्टस्त्वं शिष्टमध्ये भविष्यसि ॥ ७८५ ॥

ईश्वरस्यापि प्रमाणत्वसंग्रहाय साधनाश्रययोरन्यतरत्वे सति इति लक्षणं चेद्विशिष्यते तत्र दोषमाह **अशिष्टेति**। पाणिनिना ल्युडन्तप्रमाणशब्दार्थतया-ऽननुशिष्टेत्यर्थः। **कर्तृप्रामाण्ये** ईश्वररूपकर्तृविशेषमात्रे प्रामाण्येऽङ्गीक्रियमाणे सति। **कर्तृमात्रे** जीवमात्रे सर्वत्र प्रमातरि। **अशिष्टः** अर्धजरतीयन्यायेनाप-हसनीयः ॥ ७८५ ॥

यदि स्मृतेर्न मानत्वं न स्यात्तर्ह्यनुभूतिषु ।
समानविषयज्ञानद्वये यत्र द्वयी गतिः ॥ ७८६ ॥

'प्रामाण्यं नानुवादस्य स्मृतेरपि विहीयते' इत्यनुव्याख्यानमनुरुध्य स्मृतेस्तावत्प्रामाण्यं प्रतिबन्द्या समर्थयते **यदीति**। **समानेति** अनुभवजन्यो यः संस्कारस्तस्यैव प्रत्यासत्तिरूपत्वात् मनोजन्यायाः स्मृतेरिति भावः। **द्वयी** अन्यतरस्य प्रामाण्यं अन्यतरस्याप्रामाण्यं इत्येवंरूपा ॥ ७८६ ॥

यस्मिन्काले यत्र देशे तद्घटं संस्मरेत्किल ।
तदानीं तत्र सोऽर्थोऽभूदिदानीमस्ति वा न वा ।
स्मर्तारोऽपीत्थमेवाहुस्तत्केनास्याममानता ॥ ७८७ ॥

'यतो ज्ञानकाले वस्तुनस्तथात्वं याथार्थ्योपयुक्तं न भवति। किन्तु यद्देशकालसंबन्धितया यद्वस्तु ज्ञानेन यादृशं गृह्यते तद्देशकालयोस्तस्य तथात्वम्। स्मृतिश्च तत्र असौ तादृश इति गृह्णाति। न च तत्रासौ न तादृशः' इति पद्धत्युक्तमाह **यस्मिन्निति** ॥ ७८७ ॥

कालात्ययस्य संस्काराभावान्न स्मरणं यदि।
तर्हि तत्कालमद्यापि वर्तमानं च न स्मरेत्।
घटमात्रग्राहिणीयं कुतो वा मानतां त्यजेत् ॥ ७८८ ॥

नन्विन्द्रियाणां प्राप्यप्रकाशकारित्वादतीतेन सह मनसः सन्निकर्षाभावात्कथं तेन निवृत्तपूर्वावस्थतया वस्तुविषयीकरणम्। न च संस्कारः प्रत्यासत्तिः। तस्यापि पूर्वानुभवजनितत्वेनानुभवाविषयस्य कालात्ययस्य तेनाप्युपस्थापनायोगादित्याक्षिपति यदीति। प्रतिबन्द्या तावत्समाधत्ते तर्हीति। स्मृतेरप्रामाण्यमभिलषता घटस्वरूपमात्रस्य स्मृत्योल्लेखेऽप्रामाण्यायोगेनातीतकालस्यापि तद्विशेषणतया भानमवश्यमेष्टव्यम्। तत्र अनुभवकालस्वरूपस्यापि कथं चक्षुषा विषयीकरणमिति प्रष्टव्यम्। कालविषयीकरणे चक्षुषः इन्द्रियस्यासामर्थ्यात् ॥ ७८८ ॥

सुहृद्भावेन पृच्छन्तं प्रति तूत्तरमुच्यते।
यथाऽनुभवकालोऽपि साक्षिणैवोपनीयते।
तथा तदप्ययोऽप्यत्र साक्षिणैवोपनीयताम् ॥ ७८९ ॥

परमुखेन समाधिं वाचयित्वा समः स एवात्रापीत्याह। सुहृदिति। साक्षिणोपनीतं कालस्वरूपं तत्र भासते चेत् एवं तर्हि तद्ध्वंसोऽपि तत्रैव मनसा भासताम्। तत्कालध्वंसस्याद्यापि वर्तमानत्वादिति भावः ॥ ७८९ ॥

मनोऽन्तःकरणं तस्य साचिव्यं कुरुते हि सः।
ज्ञातज्ञापनदोषं च दूरीचक्रे ततः स्मृतिः ॥ ७९० ॥

अन्तःकरणं अन्तरिन्द्रियम्। हेतुगर्भं विशेषणम्। सः चक्षुरादिबहिरिन्द्रियप्रत्यक्षेऽपि कालोपनयेन साचिव्यं कुर्वन् साक्षी अन्तरिन्द्रियप्रत्यक्षे स्मृतौ पूर्वावस्थानिवृत्तेरुपनायकः भवेदेवेति भावः। ततः अननुभूतपूर्वावस्थानिवृत्तेरपि ज्ञापकत्वात्। न च कालसंबन्धनिवृत्त्यंशे प्रत्यासत्यभावः। संबन्धे विशेषणताया एव प्रत्यासत्तित्वात्। फलबलेनाननुभूतैतावन्मात्रविषयत्वेऽतिप्रसङ्गाभावादिति भावः ॥ ७९० ॥

अतो ज्ञानस्य मानत्वमपवादेन हीयते।
नचेज्ज्ञानग्राहिणैव गृह्यते नात्र संशयः।
अपौरुषेयवेदोक्तेः प्रामाण्यं स्थिरमेव तत् ॥ ७९१ ॥

अपवादेन साक्षिणो प्रामाण्यविरोध्युपस्थापकसामग्रीसमवधानेन ॥ ७९१ ॥

आनन्दश्रुतितो ब्रह्मानन्दरूपं यदीष्यते।
तर्हि प्रियशिरस्त्वादिश्रुतेरानन्दमूर्तिता ॥ ७९२ ॥
अप्यङ्गीक्रियतां नोचेन्नोभयं च प्रसिद्ध्यति।
जयी तार्किकबालः स्यात्त्वं तु भूयाः पराजयी ॥ ७९३ ॥

श्रुत्युक्तत्वाविशेषेऽपि आनन्दस्वरूपस्य तदात्मकावयवानां च मध्ये आनन्दावयवात्मकमूर्तितामात्रपरित्यागोक्तिः वैदिकंमन्यस्य लज्जाहेतुरित्याह आनन्देति। तार्किकबालः। दुःखभीत्या सुखमप्यपलपन्हैतुकः ॥ ७९२ ॥ ७९३ ॥

यद्यैक्यं निर्गुणत्वं च वाक्यस्य बलतस्तव।
तर्हि भेदश्च सुगुणास्तत्तद्वाक्यबलान्मम ॥ ७९४ ॥
यदि सिद्धानुवादेन मद्वाक्यं दुर्बलं तव।
सिद्धात्वद्ब्रह्मवाक्तर्हि गर्ह्या मह्यं न रोचते ॥ ७९५ ॥

सिद्धेति स्वप्रकाशतया वा भ्रमानुपपत्त्याऽधिष्ठानतया कल्पनेन वा प्रमाणान्तरसिद्धेत्यर्थः। इदं चोपेत्योक्तम्। वस्तुतः जीवब्रह्मभेदस्य ब्रह्मगुणानां चागमं विना सिद्धेरेवाभावादिति भावः। तदुक्तं भगवत्पादैः। 'आगमं विनेश्वरस्यैवासिद्धेः' इति ॥ ७९४ ॥ ७९५ ॥

अपूर्वशशशृङ्गोक्त्या बलवत्या तदापतेत्।
परेण पूर्वबाधश्चेद्ब्रह्म वृत्त्या निवर्त्यताम् ॥ ७९६ ॥

तदापतेत् शून्यतत्त्वमेव सिध्येत्। ब्रह्म वृत्त्या इति पदच्छेदः। वृत्त्या परया चरमवृत्त्या ॥ ७९६ ॥

पूर्वेण परबाधश्चेद्वन्ध्यान्मुक्तिर्निवर्त्यताम्।
स्तुत्यं मिथ्या यदि भवेद्दृश्यं मिथ्या न किं तव ॥ ७९७ ॥

स्तुत्यं उपासनाविषयः। **दृश्यं** ज्ञानविषयः ब्रह्म ॥ ७९७ ॥

श्रुत्युत्पन्नदृशोः सच्चेच्छुत्युत्पन्नस्तुतेश्च सन्।
एकपङ्क्तिस्थगेहानां दाहादाहौ कथं वद।
प्रतिबन्दी ततो बन्दीकरोति भवतः श्रुतिम् ॥ ७९८ ॥

एकपंक्तिः श्रुत्युक्तत्वम्। **अग्निः** अतत्वावेदकत्वोक्तिः। तथा च स्तुत्यर्थगुणानामिव दृश्यब्रह्मणोऽपि अतत्वताऽऽपत्तिर्दुष्परिहरेति भावः। यद्वा अग्निः असद्वा इदमग्र आसीदिति श्रुतेरापातार्थः। पंक्तिः प्रलयकालः। तथा च ब्रह्मजगतोरुभयोरपि स्वरूपापलापः अवर्जनीयः। श्रुतौ श्रद्धालुना श्रौतार्थापलापो निन्दनीय इति प्रघट्टिकार्थः। तदुक्तं चन्द्रिकायामन्तःस्थत्वनये 'धर्मो भेदश्च मिथ्या चेच्छुतिसूत्राप्रमाणता। व्याख्याव्याजेन चोक्ता स्यात्त्वया सौगतसौहृदादि'ति ॥ ७९८ ॥

किञ्चाखण्डार्थवादाख्यमयश्चणकमश्नुतः।
दन्ताः पेतुर्भवद्वाक्यभुजङ्गस्य फणेन किम् ॥ ७९९ ॥

अयश्चणकमश्नुतः अबोधकत्वं निष्प्रकारकबोधजनकत्वं वा आपन्नस्य। **दन्ताः** परबाधनप्रकाराः। **पेतुः** अपगताः। **भुजङ्गस्य** प्रपञ्चबाधनेन परानर्थकरणोद्यतस्य। **फणेन** चिन्मात्रप्रतिपादनेन। तस्य साधनबाधनासमर्थत्वात् इति भावः ॥ ७९९ ॥

अपौरुषेयनिर्दोषवाक्येष्वेषु यदीष्यते।
सर्वथाऽ मानता तर्हि गता प्रच्छन्नबौद्धता ॥ ८०० ॥

अप्रच्छन्नबौद्धता इत्यपि पदच्छेदः। गता आगता प्राप्ता इत्यर्थः ॥ ८०० ॥

अमानत्वस्वतस्त्वाख्यतत्त्वस्य व्यक्तवक्तरि।
अमानताकालकूटं यदि वक्त्रे वसेत्तव।
स्वमानोच्चारणे शक्तिर्गमिष्यति मरिष्यसि ॥ ८०१ ॥

व्यक्तवक्तरि बौद्धमताद्दिक्षित्वेति शेषः। **वक्त्रे** त्वदभिमतनेहनानास्ती-त्यादिवाक्ये। **मरिष्यसि** त्वद्वाक्यस्यैवाग्रतः अप्रामाण्यापत्तेरिति भावः ॥ ८०१ ॥

तस्मादबाधितार्थानि वाक्यानि स्युर्यथाश्रुतम्।
बाधितार्थानि वाक्यानि योग्यार्थेषु नयेद्बुधः॥ ८०२ ॥

नयेदिति तदुक्तं तत्रैव चन्द्रिकायां 'श्रुतौ श्रद्धालुना श्रुत्योर्विषयभेदेन तात्त्विकविषयत्वस्यैव वक्तव्यत्वाच्चे'ति ॥ ८०२ ॥

निर्दुःखसुखभोगाख्यो मोक्षो वाच्यस्त्वया मया।
यत्र त्वस्येति वाक्यं तु ज्ञानमात्रं निषेधति ॥ ८०३ ॥

निषेधति 'विज्ञातारमरे केन विजानीयात् येनेदं सर्वं विजानाति तं च केन विजानीयात्' इति श्रुतेः परेण स्वपरज्ञाननिषेधपरत्वेन व्याख्यातत्वादिति भावः ॥ ८०३ ॥

तच्छ्रुत्वा तार्किको हृष्येत्तत्सा तर्केण तार्किकम्।
हन्तु सन्त्वखिला भोगा मुक्तौ सर्वजनप्रियाः॥ ८०४ ॥

हृष्येत् त्वत्सिद्धान्तं विस्मृत्यापलप्य वा तदभिमतधर्मोच्छित्तिरूपताया मोक्षस्य त्वया समर्थितत्वात्। सा श्रुतिः। **तर्केण** तर्कमुद्रया। यथोक्तमनुव्याख्याने 'धर्मानाहाप्यनुच्छिन्नांस्तार्किकैर्विनिवारितान्' इति (४-२-१) ॥ ८०४ ॥

सुखानुभवसिद्ध्यर्थं स्वावेद्यत्वं परित्यज।
सुखाविषयकज्ञानरूपं सुखमयं मनः।
किं तेन फलवत्किन्तु तद्द्रष्टुः साक्षिणः फलम्॥ ८०५ ॥

परित्यजेति। कर्तृकर्मविरोधं च साक्ष्यनुभव एव शमयिष्यतीति भावः। तदुक्तं तत्रैव 'कर्तृकर्मविरोधश्च नित्यानुभवरोधतः। कथमेव पदं गच्छेदि'ति। सुखमयं इति। 'ह्रीर्धीर्भीरित्येतत्सर्वं मन एव' इति श्रुतेः। मनः फलवत् इति संबन्धः। तद्द्रष्टुः सुखविषयकानुभववतः ॥ ८०५ ॥

किञ्चाभिमानिव्यपदेशस्त्वित्यत्र स सूत्रकृत्।
यतो मृदब्रवीदित्याद्यापातानुपपन्न वाक्।
तद्वदेव परेत्याह तन्नेत्याह मतं तव ॥ ८०६ ॥

तद्वदेवेति। तदुक्तमनुव्याख्याने 'विद्वद्रूढिसमाश्रयात्। 'तत्तन्नामान एवैते तत्तद्वंस्त्वभिमानिन' इति व्याख्यानम्। श्रुतिः तत्तदन्तर्यामिपरतयैव व्याख्येयेति भावः॥ अङ्गीकृतश्च अयं न्यायः परेणापि 'ते एतस्यैव सर्वे रूपमभवन्' (बृ. १-५-२१) इति श्रुतिव्याख्याने 'प्राणस्येन्द्रियैर्भेदश्रुतेः वैलक्षण्याच्च तदविरोधेन वागादिषु परिस्पन्दलाभस्य प्राणायत्तत्वं तद्रूपभवनं वागादीनामिति मन्तव्यं न तादात्म्यं इति (बृ.शा.भा. २/४/१७-१८-१९) ॥ ८०६ ॥

प्रत्युद्गमं प्रश्रयणमभिवादनमेव च।
गुहाशयाय कुर्वन्ति न तु तद्देहमानिने ॥ ८०७ ॥

इति यः प्राह गिरिशः सोऽपि नेत्याह ते मतम्।
गुहाशयो देहमानीत्युक्तौ यद्देहगौ जगौ ॥ ८०८ ॥

'प्रत्युद्गमप्रश्रयणाभिवादनं विधीयते साधु मिथः सुमध्यमे। प्राज्ञैः परस्मै पुरुषाय चेतसा गुहाशयायैव न देहमानिने' इति भागवतं (४-३-२२) जीवेश्वरयोर्भेदमेवाभिप्रैतीत्याह **प्रत्युद्गमेति**। गुहाशयः अन्तर्यामी। **देहमानी** जीवः ॥ ८०७ ॥ ८०८ ॥

यद्देहमानिनं प्राह जीवमेव महेश्वरः।
सोऽत्यल्पगुणवाक्यानि जीवेष्वेवानुशास्ति तत् ॥ ८०९ ॥

एवेति। पूर्णगुणे परमात्मनि तद्वाक्यानां बाधादिति भावः ॥ ८०९ ॥

उपचारार्हसुगुणस्तोमोक्तीः परमात्मनि।
सोऽन्वशिक्षद्यतः प्रत्युद्गमाद्यमदिशत्प्रभोः ॥ ८१० ॥

उपचारः स्वातन्त्र्येण नमनादिकम्॰॥ ८१० ॥

अतः श्रुतिपुराणादौ रुद्राद्युत्कर्षवाक्तु या।
साऽन्तर्याम्यधिदैवादिष्वित्युक्तान्तरगोचरा ॥ ८११ ॥

या 'एको रुद्रो न द्वितीयाय तस्थे' इत्यादिका॥ इति सूत्र इति शेषः। अन्तरगोचरा अन्तर्यामिविषयेति उक्ता निर्णीता ॥ ८११ ॥

अधोक्षजो मे मनसा विधीयत इतीश्वरः।
स एव तं यद्व्यनक्ति गुहाशयपदोदितम् ॥ ८१२ ॥

अत्र चान्तर्यामी हरिरेवेत्याह **अधोक्षज इति** ॥ ८१२ ॥

एवं च विष्णोरुत्कर्षे सर्वागमगिरां भरम्।
यो हरो वक्ति सर्वस्य स गुरुर्नात्र संशयः।
त्रिलोचनमतायास्मै को वा द्रुह्येद्द्विलोचनः ॥ ८१३ ॥

'सत्त्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः। सत्त्वं च यस्मिन्भगवान्वासुदेवो ह्यधोक्षजो मे मनसा विधीयते' इत्युत्तररुद्रवाक्येन (४-३-२३) गुहाशयः अधोक्षजो वासुदेवो विष्णुरेवावसीयते इत्याह **अधोक्षज इति**। अत्र भगवदपरोक्षज्ञानहेतुसत्त्वगुणस्य रक्षको विष्णुरेव रुद्रध्यानविषयो निरूप्यते। गुहाशयत्वस्य तस्मिन्नेव 'यो वेद निहितं गुहायां' इति श्रुतौ 'गुहां प्रविष्टावात्मानौ' इति सूत्रे 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' इति गीतायां च प्रसिद्धेः। अतः प्रस्थानत्रयानुरोधियथार्थज्ञानशीलत्वादपि रुद्रस्य त्रिलोचन इति नामधेयमित्याशयवानाह **त्रिलोचनमतायेति**। **द्विलोचनः** विशेष्यावृत्तिधर्मप्रकारकज्ञानवान्। जीवे ब्रह्मैक्यवादी मायी ॥ ८१३ ॥

भेदस्य व्यावहार्यत्वे स्यादैक्यं प्रातिभासिकम्।
भेदो ह्यैक्यनिषेधात्मा तस्याद्यैव निषिद्धता।
किं न दद्यात्त्वदद्वैते ब्रह्मज्ञानान्यबाध्यताम् ॥ ८१४॥

इदानीमेव बाध्यत्वाच्छुक्तिरूप्येऽपि सा दशा।
अतो वृद्ध्यर्थिनश्चित्रं मूलनाशो भवेत्तव ॥ ८१५॥

न च पूर्वोक्तो भेदो व्यावहारिक इति वाच्यम्। तथा सत्यपि व्यावहारिकशुक्तिविषयकज्ञानेन बाध्यस्य रूप्यस्य प्रतिभासिकत्ववत् व्यावहारिकभेदज्ञानेन बाध्यस्यैक्यस्य प्रातिभासिकत्वापत्तिरित्याह **भेदस्येति**। वृद्धिः ऐक्यस्य पारमार्थिकत्वम्। मूलनाशः ऐक्यस्येदानीमेव ब्रह्मज्ञानान्येन भेदज्ञानेन निवृत्त्या प्रातिभासिकत्वरूपनिकृष्टताऽऽपातः॥ ८१४॥ ८१५॥

एवमेव त्रिकालेषु निषेधाभावरूपिणी।
सत्यता व्यावहार्या चेन्मिथ्यात्वं प्रातिभासिकम्॥ ८१६॥

भवेत्पूर्वोक्तमार्गेण गुणाभावनिषेधकः।
अभावाभावरूपत्वाद्भावरूपा गुणाः प्रभोः ॥ ८१७॥

व्यावहार्या यदि तदा नैर्गुण्यं प्रातिभासिकम्।
भवेदघटभूमेः किं सघटा भूर्न बाधिका ॥ ८१८॥

उक्तन्यायं मिथ्यात्वे नैर्गुण्ये चातिदिशति **एवमेवेति**। **त्रिकालेषु इति**। 'स्वकाले ह्यस्तितां गृह्णन्साक्षात्कारस्त्रिकालगम्। प्रतिषेधं निरुन्धानो गृह्णात्येवात्यबाध्यतामि'ति न्यायामृतोक्तेः। **व्यावहार्या चेदिति**। एवमपि दुराग्रहेण सत्यत्वस्य ब्रह्मज्ञानबाध्यत्वं ब्रूषे चेदित्यर्थः। **मिथ्यात्वं** त्वदुक्तरीत्याऽपि ब्रह्मज्ञानेतरेण व्यावहारिकसत्यताग्राहकप्रमाणेन बाध्यत्वात् **प्रातिभासिकं** भवेदित्युत्तरेणान्वयः। पूर्वोक्तमार्गेण इत्येतत्पूर्वत्र उत्तरत्र च संबध्यते। भावरूपगुणानां कथमभावनिषेधकत्वं इत्यत आह **अभावाभावरूपत्वादिति**। अनन्तरप्रतीतौ इति शेषः। तदेव दृष्टान्तोक्त्या स्फोरयति **अघटभूमेः**

घटाभाववद्भूतलमिति धियः। सघटा भूः घटवद्भूतलमिति ज्ञानम्॥ ८१६॥ ८१७॥ ८१८॥

प्रातिभासिकमानानि मानान्यासन्यतस्तव।
तस्मान्मन्मानमार्ताण्डः प्रलयार्को भवेद्द्विषाम्॥ ८१९॥

ऐक्यनैर्गुण्यमिथ्यात्वान्यधःकृत्यैव यद्भवान्।
भेदसद्गुणसत्यत्वान्यालंब्येश्वरपूजनम् ॥ ८२०॥

गुणानुस्मरणं श्रौतस्मार्तकर्माणि चानिशम्।
करोषि केन कस्यातो बाधोऽनादौ भवेद्वद ॥ ८२१॥

प्रातिभासिकेति। प्रातिभासिकविषयकेत्यर्थः। मानानि ऐक्यमिथ्यात्वनिर्गुणत्वविषयकाणि। **मार्ताण्डः** व्यावहारिकभेदसत्यत्वसगुणत्वविषयकत्वेन प्रबलत्वात्पराभिमतप्रातिभासिकविषयकमानाभासान्धकारनिराकरणे अनायासेन समर्थः। परेण क्रियमाणपूजादिकर्मानुष्ठानं तस्य भेदादीनां अबाध्यत्वावगमं गमयतीत्याह **ऐक्येति**। अधःकृत्य बाधितान्यवगमय्य। आलंब्य बाधकत्वेन पारमार्थ्यं स्वीकृत्य। अनादौ संसारे॥ ८२०॥ ८२१॥

चिदेकतां न बाधेत यद्ययं तर्हि साऽप्यमुम्।
न बाधेत न्यायसाम्यात्तद्भेदोऽभूदबाधितः ॥ ८२२॥

अयं विशिष्टयोर्भेदः। **न बाधेत** भिन्नविषयकत्वादिति शेषः। **न्यायेति** भिन्नभिषयकत्वेत्यर्थः॥ ८२२॥

विशिष्टैक्यपरं वाक्यं प्रातिभासिकमानताम्।
गतं चितोरेकता तन्मानाभावादसत्यभूत् ॥ ८२३॥

प्रातिभासिकतां गतमिति। उक्तरीत्या ब्रह्मान्येन विशिष्टयोर्भेदग्राहकप्रमाणेन बाधितत्वात् इत्याशयः। मानस्यैव प्रातिभासिकत्वे तत्प्रामाण्यपरिरक्षणार्थं

चिदैक्यपरत्वरूपार्थान्तरपरिकल्पनस्यानावश्यकत्वादुपेक्ष्यमेव तदिति न तेन लक्षणयाऽपि ऐक्यसिद्धिरित्याह **असती इति** ॥ ८२३ ॥

अतत्वावेदकं वाक्यमुपेक्ष्यं भेदवाक्यवत्।
कः शुक्तिरूप्यतावाक्यमुद्दिधीर्षति शुद्धधीः ॥ ८२४ ॥

तत्र परसंमतं दृष्टान्तमाह **क इति**। **उद्दिधीर्षति** जहदजहल्लक्षणामाश्रित्य पदार्थस्वरूपैक्यपरतया व्याख्यास्यति ॥ ८२४ ॥

न चेद्भेदप्रमाणं च दृष्टेऽर्थे व्यावहारिके।
जीवब्रह्मचितोरेव भेदं लक्षणया वदेत् ॥ ८२५ ॥

न चेदिति। अतत्वावेदकस्यापि तत्त्वमसीत्यादिविशिष्टैक्यपरस्य वाक्यस्योपेक्षां न करोषि चेत्। चिदैक्यरूपार्थान्तरवर्णनेन गत्यन्तरं वर्णयसि चेदित्यर्थः। **भेदप्रमाणं** 'भिन्नो देवः परमो जीवसंघादित्यादिकम्। दृष्टेमुख्यवृत्त्या लब्धे त्वद्रीत्याऽनुपपन्ने सति। **चितोः** भागत्यागलक्षणया शुद्धचितोरेव। तत्र त्वयैवं वक्तव्यम्। लक्ष्यार्थोऽपि प्रमाणाविरुद्ध एव भवेत्। न च चिद्भेदस्तथेति। समानमेतच्चिदैक्यलक्षणायामपीति भावः ॥ ८२५ ॥

अतः पुनश्चिदेकत्वं प्रातिभासिकतां गतम्।
एवं च घट्टकुट्यान्ते प्रभातोऽभून्न संशयः ॥ ८२६ ॥

अतः लक्षणाया दूषितत्वात् ॥ ८२६ ॥

वस्तुतस्तु चितोरेव विशेषणबलात्तयोः।
भिदा संपाद्यते तेन चोद्यस्यावसरोऽपि न ॥ ८२७ ॥

तुशब्दः निर्धर्मकशुद्धचित एवालीकत्वरूपविशेषस्य सूचकः।' **चितोरेव** पूर्वमपि विरुद्धधर्माक्रान्तयोरेव। **संपाद्यते** मूढबुद्धिव्यपेक्षया स्पष्टतया ज्ञाप्यते। नत्वेवाविद्यमानः क्रियते इति भावः। **चोद्यस्य** भिन्नविषयकत्वात् विशिष्टभेदः

शुद्धचिदैक्यं न बाधत इति चोद्यस्य। **नेति**। उक्तरीत्या शुद्धचित एवालीकत्वादिति भावः ॥ ८२७ ॥

अन्यदौपाधिकं सर्वमुपाधौ सति जायते।
उपाध्यपगमे गच्छेद्भेदस्तु न तथा किल ॥ ८२८ ॥

अन्यत् पाकरूपोपाधिना पृथिव्यां रूपं इत्यादिकम्। तुशब्दो भेदस्य धर्मिस्वरूपत्वरूपविशेषद्योतकः। **किल** 'विद्यमानस्य भेदस्य ज्ञापको न तु कारकः। उपाधिर्दृष्टपूर्वो हि' इति प्रसिद्धम् ॥ ८२८ ॥

स्वसंबन्ध्येकदेशस्य स्वासंबन्धिप्रदेशतः।
भेदं स कालयेत्किं स्याद्घटाभ्रान्तर्घटाद्भिदा ॥ ८२९ ॥

'खेऽपि देशान्तरस्य सः। ज्ञापको न तु कारकः' इति भगवत्पादोक्तिमनुरुध्याह **स्वेति**। **भेदं** पूर्वमेव स्वभावतयैव विद्यमानम्। **कालयेत्** मूढभेदव्यपेक्षया ज्ञापयेत्। **घटाभ्रान्तः** घटाकाशांशयोरन्तर्गणिकः। घटोपाधिना न भेदो ज्ञाप्यते। किन्तु घटासंबन्धिप्रदेशान्तरादेव। सर्वथा विद्यमानस्यैव भेदस्य ज्ञापक इति भावः ॥ ८२९ ॥

अतः स्वतो विशेषं वा भेदं वा भेद्यवस्तुनि।
योऽपेक्षते स्वयोगाय स्वयमेव कथं पुनः।
कुर्यादुपाधिस्तौ पूर्वौ न हि स स्वपितुः पिता ॥ ८३० ॥

'अन्तरशब्दो विशेषवचन' इति उपाधिखण्डनटीकाऽनुरोधेनाह **विशेषं वेति** अव्याकृताकाशपक्षे। तदंशानां अत्यन्ताभेदात्। **भेदं वेति** भूताकाशपक्षे इति व्यवस्थितविकल्पो ध्येयः। **स्वयोगाय** स्वसंबन्धाय। **तौ** विशेषं वा भेदं वा। उपाधेः संबन्धो हि एकदेशेनैव वाच्यः। अन्यथोपाधिर्भेदको न भवेत्। तदुक्तं 'सर्वगश्चेन्न भेदक' इति। सोऽपि एकदेशः उपाध्यन्तरेण चेत्तस्याप्येकदेशेनैव संबन्धो वाच्यः। स एकदेशः पूर्वेणैवोपाधिकृतश्चेदन्योन्याश्रय इत्याह **न हीति**। उपाधिपरंपराभ्युपगमेऽनवस्था तदुक्तम् 'एकदेशेऽनवस्था स्यादि'ति ॥ ८३० ॥

वृक्षाग्रे कपिसंयोगो वृक्षमूले परं न सः ।
भावाभावविरोधस्य न चेच्छान्तिर्भविष्यति ।
तत्संयोगस्वभावाच्च परिहारो भवेन्न ते ॥ ८३१ ॥

'प्रदेशवृत्तित्वं नाम स्वात्यन्ताभावसमानाधिकरणत्वमिति चेन्न। तस्य विरुद्धत्वात्।' इति टीकोक्तिमनुसृत्याह **वृक्षेति**। अत्र विरुद्धत्वादित्यस्य प्रतियोगिताऽवच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरणत्वे सति तादृक्प्रतियोगिसमानकालीनत्वाभावादिति परिष्कारो मन्दारमञ्जर्युक्तोऽनुसन्धेयः ॥ ८३१ ॥

एवं च भेदमात्रस्योपाधेर्जन्म न युक्तिमत्।
तद्विद्यमानभेदस्य ज्ञापकोऽसौ न कारकः ॥ ८३२ ॥

भेदमात्रस्य कृत्स्नस्य भेदस्य ॥ ८३२ ॥

अतो विशिष्टभेदश्च स्वतश्चिद्भेदमाक्षिपेत्।
द्विर्बद्धभेदाद्बाधस्तच्चिदैक्यस्यैव घातकः ॥ ८३३ ॥

तद्यामिकानां सदसि किं स्यात्तस्करकैतवैः।
उक्तिव्यत्यासेऽपि कुर्युश्चौर्यस्य स्थैर्यमेव ते ॥ ८३४ ॥

अतः प्रमाणविरुद्धभागत्यागलक्षणाश्रयणन्यायसाम्यात्। **द्विरिति** विशिष्टभेदशुद्धचिद्भेदेत्येवं प्रकारद्वयेनेत्यर्थः। **यामिकानां** भेदप्रतिपादनेन तद्रक्षणे निरवकाशतया सदा जागरितानां प्रमाणानां, **सदसि** बहूनां समावेशे। **तस्करकैतवैः** प्रत्यक्षदृष्टभेदापलापाय भागत्यागादिवक्रमार्गानुसारिभिः त्वदभिमतमानाभासैः कतिपयमात्रैः। **उक्तिव्यत्यासेऽपि** भेदप्रमाणानां व्यावहारिकविषयत्वेन व्यत्यासे **तैः** प्रवृत्तत्वेऽपि। **चौर्यस्य** प्रातिभासिकत्वेनासाधकत्वप्राप्त्या स्वस्वरूपापहारस्य। **स्थैर्यं** उभयमतरीत्याऽपि सिद्धिम् ॥ ८३३ ॥ ८३४ ॥

परेऽव्यये सर्व एकीभवन्तीति च या श्रुतिः।
सा च गोष्ठे गाव एकीभवन्तीत्यादिवाक्यवत्।
मुक्तानामेकतामाह गवामिव परस्परम् ॥ ८३५ ॥

'गताः कलाः पञ्चदश प्रतिष्ठा देवाश्च सर्वे प्रतिदेवतासु। कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्व एकीभवन्ति' इति श्रुतिः मुक्तौ जीवपरयोरभेदं वक्ति इति अपव्याख्यानं प्रत्याख्याति **पर इति** 'एकीभावः मत्यैक्यं वा क्षीराब्ध्यादिस्थिततद्रूपेक्षया स्थानैक्यं वा' इति तत्त्वनिर्णयमनुरुध्याह **सा चेति**। तदुक्तं तत्रैव टीकायां 'प्रागीश्वरव्यक्तिस्थानापेक्षयाऽन्यत्रेतस्ततः स्थितास्तत्र मिलिता भवन्ति' इति ॥ ८३५ ॥

आधारं गोष्ठवद्ब्रह्म परं सर्वोत्तमत्वतः।
पूर्णत्वतो वा महिमव्ययस्याभावतोऽव्ययम् ॥ ८३६ ॥

अनुशास्ति न चेच्च्विस्त्वां हिनस्तीति मतिर्मम।
अभूततद्भाववादी भूततद्भाववादिनम् ॥ ८३७ ॥

आधारं इत्यस्य अनुशास्तीत्युत्तरेणान्वयः। एवं परं अव्ययं इत्यनयोरपि। च्विप्रत्ययोऽप्येवं सति मुख्यः स्यात्। एकस्थानस्थितत्वस्य मुक्तेः प्रागभूतस्य मुक्तौ सत्यां भावाङ्गीकारात्। पराभिप्रेतार्थे प्रागप्यैक्यस्य तन्मते सिद्धत्वेन अभूततद्भावासंभवादित्याह **च्विरिति** ॥ ८३६ ॥ ८३७ ॥

कलानां कर्मणां चैव जडानां कथमेकता।
परेणैकीभवन्तीति प्रयोगश्च भवेत्तदा।
सप्तमीयं भवद्ग्रन्थस्याष्टमीं कुरुते सदा ॥ ८३८ ॥

कलाशब्दस्य जडार्थतामुपेत्याह **कलानामिति**। देवतापरत्वे निवृत्तिशब्दस्यानेकार्थताकल्पनाप्रसङ्गादिति भावः। **तदा** ऐक्याभिप्राये। **अष्टमीं** अष्टमीतिथिवत् अध्ययनानर्हत्वम् ॥ ८३८ ॥

वक्ति कारणमात्रस्य सत्यतां मृत्तिकाश्रुतिः।
कार्यमात्रस्य सद्भावं वक्ति कार्ष्णायसश्रुतिः ॥ ८३९ ॥

उपादानस्य सत्यत्वे कार्यसत्त्वमभूद्बलात्।
उपादेयस्य सत्यत्वे तत्सत्त्वं च भवेद्बलात्।
अतो द्विर्बद्धसत्यत्वं को वा मोचयितुं क्षमः ॥ ८४० ॥

पररीत्या 'मृत्तिकेत्येव सत्यं' इति श्रुतिः मृत्तिकोपलक्षितसकलकारणप्रपञ्चस्य सत्यत्वं अभिप्रैति। अन्यथा यस्य कस्यचित्कारणस्य मिथ्यात्वे 'ब्रह्म सत्यं कारणत्वात् मृत्तिकावत् इति अनुमाने हेतोस्तत्रैव व्यभिचारः प्रसज्यते। 'कार्ष्णायसमित्येव सत्यं' इति श्रुतौ कार्ष्णायसस्यान्त्यावयवित्वेन कार्यत्वमेवास्ति। समानन्यायेन सर्वस्य कार्यप्रपञ्चस्य सत्यत्वसिद्धिः। एवं शब्दात्कार्यकारणप्रपञ्चस्य सत्यत्वसिद्धिप्रकारमुक्त्वा अर्थतोऽपि तत्सिद्धिमाह **उपादानेति। बलात्** उपादानोपादेययोरभेदबलात्। अन्यथा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा व्याहन्येत। **द्विः** शब्दतः अर्थतश्चेत्युक्तप्रकारद्वयेन। **बद्धसत्यत्वं** निरवकाशतया सिद्धं सत्यत्वम्। यद्यपि परपरिकल्पितस्यार्थस्यायुक्तताऽनुव्याख्याने समर्थिता तथाऽपि परस्याकौशलप्रकटनाय, अभ्युपगमवादेनापि परस्य व्याघातः समर्थितो ध्येयः ॥ ८३९ ॥ ८४० ॥

वाचारंभणवाक्तस्माद्यथापूर्वमिति श्रुतेः।
नामरूपात्मकस्यास्य वक्त्येकविधतां सदा।
उक्तं विकारसत्यत्वं त्वदर्थं बाधते यतः ॥ ८४१ ॥

कारणं सत्यं, कार्यं मिथ्या इति परोक्तार्थस्य अयुक्तत्वात्। अन्यथा मृत्तिकाया अपि स्वकारणकार्यत्वेन तस्या अपि मिथ्यात्वापातेन मृत्तिकैव सत्यं इत्यस्यापि अयुक्तताऽऽपातात्। **यतः उक्तं** 'नखनिकृन्तनमेव सत्यं' इति अन्त्यावयविनो विकारस्य सत्यत्वं, **त्वदर्थं** कार्यं मिथ्या इत्येवंरूपं **बाधते तस्मात्** इति उत्तरार्धेन अन्वयः। एवं प्रपञ्चस्य सत्यत्वपरतया श्रुतिं व्याख्याय नामरूपात्मकस्य तस्य कालत्रयेऽप्येकप्रकारतापरतयाऽपि तां योजयति नामेति। श्रुतेरित्युपलक्षणम्। 'न क्वाप्यनीदृशं विश्वं तत्तत्कालानुसारतः' इत्यादिस्मृतेश्चेत्यपि ग्राह्यम्। **'इत्येव'** अनेनैव प्रकारेण न तु पुनः कल्पान्तरेष्वपि नामरूपव्यत्यासेनेति। **वक्ति** प्रतिपादयति। अनेन श्रौतसत्यपदस्य नित्यं इत्यर्थान्तरमिति ज्ञापितम्। 'एतत्सत्यं ब्रह्मपुरं' इत्यत्र तदर्थे प्रयोगात् ॥ ८४१ ॥

अक्लीबेन सहोक्तौ च क्लीबोऽसौ शिष्यते किल।
शिष्यमाणस्य तस्यैकवद्भावोऽप्युचितः किल ॥ ८४२ ॥

अक्लीबेन मृत्तिका विकारः इति पदद्वयेन। **सहोक्तौ** नामधेयमिति पदस्येति भावः। **असौ** सत्यमिति शब्दः। **शिष्यते** 'अक्लीबेन सहोक्तौ क्लीबं शिष्यते एकत्वमस्य वा स्यादि'ति वृत्तौ। तेन सत्यमिति एकवचनान्तनपुंसकलिङ्ग-शब्दप्रयोगः साधुरिति भावः ॥ त्रिवारमुक्त्या अभ्यासेनोक्तार्थे तात्पर्यं च द्योत्यते ॥ ८४२ ॥

मृज्ज्ञाने सर्वमृत्कार्यज्ञानं सर्वत्र सर्वदा।
नामाद्यव्यत्यये सत्येव स्यादित्याह तं च वाक् ॥ ८४३ ॥

श्रुतौ सर्वकल्पसाधारण्येन सादृश्यादेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाऽन्यथा-ऽनुपपत्त्याऽपि नाम्नां रूपाणां च सर्वकल्पेष्वेकविधता सिध्यति। अन्यथा कल्पान्तरे मृत्पिण्डस्य तद्विकाराणां च वैसादृश्ये श्रौतप्रतिज्ञा व्याहन्येतेत्याह **मृदिति**। एवं नियतवर्णपदस्वरवाक्यात्मकस्य वेदस्य प्रामाण्यं च हीयेतेति भावः ॥ ८४३ ॥

व्यत्यासाभावतः स्वोक्तसत्यत्वस्थापनाय च।
महावाक्योक्ततत्त्वेऽस्मिन्व्यावहारिकता च न ॥ ८४४ ॥

व्यत्ययाभावोक्त्या परोक्तं बाध्यत्वापरपर्यायं व्यावहारिकत्वमपि पराकृतमित्याह **व्यत्यासेति**। न हि 'याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः' इत्युक्तस्य बाध्यत्वं सङ्गच्छतीति भावः ॥ ८४४ ॥

एवकारोऽकारणस्याकार्यस्य च न सत्यता।
इत्याह तेन सत्तायास्त्रैविध्यं प्रत्यषिध्यत ॥ ८४५ ॥

कार्यकारणभावव्यवहारनिर्वाहकत्वरूपव्यावहारिकसत्यत्वस्य पारमार्थिकसत्यत्वानतिरेकात् 'इत्येव सत्यं' इति श्रुतावेवकारेणाकार्यकारणभावस्य शुक्तिरूप्यादेः सत्यत्वव्यवच्छेदात्पारमार्थिकमेकमेव सत्यमिति श्रुत्या व्यवस्थापनात् परपरिकल्पितं सत्तात्रैविध्यमपि भग्नमित्याह **एवेति** ॥ ८४५ ॥

यन्नामरूपयोश्चान्यथात्वं न कदान्यथा ।
कार्यकारणरूपं च नामरूपात्मकं जगत् ।
द्वेधा निर्दिश्य तत्सत्त्वमपि वक्ति सयुक्तिकम् ॥ ८४६ ॥

यत् यस्य प्रपञ्चस्य । **सः** प्रपञ्चः । **कदाऽन्यथा** न कदाऽपि बाध्यः । ब्रह्मवदेव । ब्रह्म सर्वप्रकारेण नित्यम् । प्रपञ्चस्तु प्रवाहत इति तु वैषम्यमात्रम् । अबाध्यत्वे न कोऽपि विशेषः । अत उक्तरूपं व्यावहारिकं पारमार्थिकमिति चानर्थान्तरमित्याशयः । **द्वेधा** पूर्वोक्तप्रकारेण प्रत्येकं प्रकारद्वयेन । **सयुक्तिकं** नामवत्त्वात् रूपवत्त्वाच्च, कार्यरूपत्वात्, कारणरूपत्वात् इति युक्तिचतुष्टयपूर्वकम् । अपिशब्देन अन्योन्यभेदं परमात्मभेदं च । 'आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' इति आकाशपदवाच्यस्य परमात्मनो नामरूपात्प्रपञ्चाद्भेदज्ञापनात् । एवं चेतनत्वेनोपादानोपादेयभावाभावात् प्रधानत्वेनास्वतन्त्रचेतनभिन्नत्वाच्च ॥ ८४६ ॥

यदा मृदपि विज्ञातसादृश्याज्ज्ञापयेज्जगत् ।
तदा समर्थः सामर्थ्याद्विज्ञातः पुरुषोत्तमः ।
कथं न दद्यात्सार्वज्ञमिति कैमुत्यतः प्रभोः ॥ ८४७ ॥

सार्वज्ञदानशक्तिं सा बोधयन्ती मुहुर्मुहुः ।
निदर्शनत्रयमिदं नृणां प्रादर्शयच्छ्रुतिः ॥ ८४८ ॥

'एवं प्रधानस्य परमात्मनो ज्ञानादप्रधानं ज्ञातमिव भवति'। 'यथा सौम्येत्याद्यपि सादृश्यकथनं' इति भगवत्पादोक्ती अनुरुध्याह **यदेति**। **सार्वज्ञं**

अपरप्रपञ्चस्यैव परायत्तत्वज्ञापनेन प्रपञ्चज्ञानाज्जायमानं तदधिकं फलं च। निदर्शनत्रयं दार्ढ्यार्थम् ॥ ८४७ ॥ ८४८ ॥

इत्येव वाच्यः श्रुत्यर्थो नोचेत्कुप्येदियं कृतिः ।
हयग्रीवप्रसादोत्थसामर्थ्यकृतकौतुका ॥ ८४९ ॥

कृतकौतुका। परीत्याऽर्थवर्णनेऽपि प्रपञ्चस्य सत्यत्वनित्यत्वसमर्थनकौशलवती । **कृतिः** युक्तिमल्लिका ॥ ८४९ ॥

श्रुत्या द्वितीयमात्रस्य निषेधे सति ते मते ।
अत्यन्ताभावोऽपि नेति द्वितीयं पुनरापतेत् ॥ ८५० ॥

'एकमेवाद्वितीयं ब्रह्म' इति श्रुतौ अद्वितीयपदस्य प्रपञ्चानिषेधकत्वं दशधा साधयति **श्रुत्येत्यादिना**। **द्वितीयमात्रस्य** भावस्य अभावस्य च। **द्वितीयं** भावरूपम् । एवं भावोऽपि नेति द्वितीयं अभावात्मकं च आपतेदित्यपि ध्येयम् । उभयनिषेधस्य व्याहतत्वेनासंभव एवेति हृदयम् ॥ ८५० ॥

भावस्यैव निषेधे सत्यभावाभावसंभवात् ।
तदाकारेण सकलं द्वितीयं पुनरापतेत् ॥ ८५१ ॥

तदाकारेण अभावाभावाकारेण । **सकलमिति** अभावस्यानिषेधात् भावस्य रूपान्तरेण पुनरापाताच्चेति सर्वं भावाभावरूपं इत्यर्थः ॥ ८५१ ॥

भावस्वरूपमात्रस्यासत्त्वात्तस्यापि बाधने ।
ब्राह्म्याश्रितोऽपि बाधेन द्वितीयं पुनरापतेत् ॥ ८५२ ॥

भावस्वरूपमात्रस्य भावत्वेन अभावाभावरूपत्वेन च इति उभयाकारस्य । पुनः ब्रह्मण एवाभावेन ब्रह्मप्रमाबाध्यत्वस्य जगतोऽसंभवात् इति भावः । पूर्वं निषेधाभावात् इदानीं निषेधकाभावादिति विशेषः ॥ ८५२ ॥

ब्रह्मरूपस्य भावस्यानिषेधे तद्गुणांबुधेः ।
अबाधसंभवेन त्वदिद्वतीयं पुनरापतेत् ॥ ८५३ ॥

संभवेन गुणानां ब्रह्मस्वरूपत्वस्य त्वयाऽप्यभ्युपगमात्। आनन्दबोधे अद्वैतिग्रन्थे तथोक्तेः ॥ ८५३ ॥

एकशेषेण तद्बाधे पुनर्ज्ञाननिषेधनात्।
ब्रह्मणो जडताऽऽपत्त्या द्वितीयं पुनरापतेत् ॥ ८५४ ॥

एकशेषेण ब्रह्मावशेषेण गुणानामेव बाधे। स्वरूपत्वेन, एकस्य धर्मिणोऽवशेषः धर्ममात्रस्य बाधः इत्येतदसंभवि इति दोषे सत्येव दोषान्तरमाह **ज्ञानेति**। **जडतेति** ज्ञातृत्वाभावस्यैव जडत्वरूपत्वादिति भावः। जडप्रमाया बाधकत्वासंभवादिति पूरणीयम् ॥ ८५४ ॥

श्रुत्यबाधे वेदरूपं द्वितीयं पुनरापतेत्।
श्रुतेर्बाधे त्वबाध्यं तद्द्वितीयं पुनरापतेत् ॥ ८५५ ॥

श्रुतेः भावरूपत्वेऽपि तदबाधे। **अबाध्यमिति** वन्ध्यासुतवचस इव श्रुतेः बाधनासमर्थत्वादिति भावः ॥ ८५५ ॥

विश्वान्यद्ब्रह्म नाशास्यं द्वितीयस्यैव दूषणे।
तच्छेषेऽन्यस्य तन्न्यायाद्द्वितीयं पुनरापतेत् ॥ ८५६ ॥

द्वितीयस्य विश्वापेक्षया द्वितीयस्य ब्रह्मणः। **अन्यस्य** ब्रह्मापेक्षया द्वितीयस्य विश्वस्य। **तन्न्यायादिति** सर्वनामाद्वितीयशब्दस्य बुद्धिस्थब्रह्मण इव 'इदमग्रे' इति पूर्ववाक्यप्रकृतत्वेन विश्वस्यापि परामर्शसाम्यादिति भावः ॥ ८५६ ॥

अभावस्य यथा रक्षा वाक्यप्रामाण्यगुप्तये।
तथा भावस्य रक्षायां द्वितीयं पुनरापतेत् ॥ ८५७ ॥

एतद्वाक्येन प्रमितत्वान्नाभावस्य निषेधश्चेत्पूर्ववाक्ये सलिलकालादि-प्रपञ्चस्यापि प्रमितत्वान्न तस्यापि निषेधो युक्त इत्याह **तथेति** ॥ ८५७ ॥

अन्योन्याभावरूपत्वाद्भावाद्भिन्नं भवन्मते।
भेदपञ्चकरूपं च द्वितीयं पुनरापतेत् ॥ ८५८ ॥

भवन्मते अन्योन्याभावस्य धर्मिस्वरूपत्वमनङ्गीकर्तुर्मते ॥ ८५८ ॥

दशप्रमतिनामा मे गुरुस्त्रिदशतोचितः।
योऽदीदिशद्दोषमेकं दूष्येषु दशसु प्रभुः ॥ ८५९ ॥

एकं दोषं दशसु प्रयोगरूपं एवमीदृशं कौशलं यो ममान्वग्रहीत्स दशप्रमतिर्गुरुः **त्रिदशतोचितः** इति तं स्तौति **दशेति**। त्रयो दोषा दशसु यस्य इति त्रिदशः देवः, तस्य भावः तदुचितः। एकं अपि दोषं दशस्वेवं प्रयुञ्जानः त्रीन् दशसु प्रयुंक्ते इति एतत् कैमुत्यसिद्धमिति भावः ॥ ८५९ ॥

किञ्च द्वितीयाज्ञानस्य कार्यत्वाद्ब्रह्मणो जगत्।
तृतीयं तेन गौर्दोग्ध्री विद्यते तेन काचन ॥ ८६० ॥

द्वितीयेति अनादितस्तत्संबन्धित्वादिति भावः। **तेन** अज्ञाननिषेधे अज्ञानकार्यत्वस्यापि निषेधात् सिद्धेन जगत्सत्यत्वेन निमित्तेन। **गौः** 'अद्वितीयं' इति श्रुतिः एवमन्याऽपि। **न दोग्ध्री** न मिथ्यात्वबोधिका, प्रत्युत त्वदनिष्टसत्यत्वस्यैव प्रतिपादिका ॥ ८६० ॥

यदखण्डार्थवादी त्वं तृणखण्डं च नादिशः।
तैलं धूलिषु निक्षिप्तं पिण्याकं भस्मसात्कृतम्।
निषेधो न निषेध्यं न केन वा गौर्जिजीविषेत् ॥ ८६१ ॥

अखण्डार्थवादी संसर्गासङ्गिचिन्मात्रवादी। **तृणखण्डं** ऐक्यम्। **तैलं** निषेधः। **पिण्याकं** निषेध्यं जगत्। इत्येतानि सर्वाणि वाक्यार्थतया न स्वीकृतानि। स्वीकारे अखण्डार्थत्वहानेः। तथा च वाक्यस्य संसर्गाबोधकत्वे नैरर्थक्यलक्षणमप्रामाण्यं दुष्परिहरमिति भावः ॥ ८६१ ॥

एवं निराशास्ताः सर्वाः क्रन्दन्त्यो वाजिनोऽनुगाः।
वाजिकिङ्करमध्वाख्ययोगीन्द्रेण पदे पदे ॥ ८६२ ॥

दत्तग्रासाः सतां वृन्दारण्यमेत्य कृतोत्सवाः।
गोविन्दमेव परितः प्रापुरित्यतिमङ्गलम् ॥ ८६३ ॥

निराशाः स्वरूपैक्यं वर्णयितुमकल्पाः। क्रन्दन्त्यः अप्रामाण्यं परिजिहीर्षवः। व्याजिनः सादृश्यैक्यस्वातन्त्र्यैक्यपरतया प्रामाण्यपरिरक्षणप्रकारमुपदिशतः 'तद्गुणसारत्वात्तु तद्व्यपदेशः' इत्यादिसूत्रजातस्य। वाजिकिङ्करः सूत्रभाष्यकारः। तेन रचितभाष्येण दत्तग्रासाः कल्याणगुणरूपक्षीरदोहनेन समन्वयलक्षणाभिषेकाङ्गतामापादिताः। सतां सात्त्विकप्रकृतीनां वृन्दारण्यं सूत्रानुग्रहेण विष्णुबोधनेन अपरविद्यात्वदुर्दशापरिहारेण परविद्यात्वमहिमानं गोविन्दं यादवकृष्णं वासिष्ठकृष्णं च। 'अथ योऽन्यां देवतामुपास्ते' इत्यादिश्रुतीनां परीत्यैव काम्यकर्मादिनिन्दापरत्वेन ऐक्यबोधकत्वाभावः भेद.ब्र.सू. ग्रन्थे सुनिपुणमुपपादितस्तत्रैवानुसन्धेयः ॥ ८६२ ॥ ॥ ८६३ ॥

ईशात्सर्वेश्वराद्विष्णोरपेतस्य ततः प्रभोः।
ब्रह्मणस्तु द्वितीयोऽपि ब्रह्मण्यभिनिवेशतः ॥ ८६४ ॥

निर्गुणाख्येऽभिमानेन भयं भवति यन्नृणाम्।
विपर्ययो स्मृतिश्च स्यान्मुकुन्दब्रह्ममोचनात् ॥ ८६५ ॥

'भयं द्वितीयाभिनिवेशतः स्यादि'ति श्लोकः [भा. ११-२-२७] भेदसौरभे [श्लो. ३६०-३७१] चर्चितः। अधिकं चाह ईशादिति। द्वितीये निर्गुणाख्ये। अभिनिवेशतः अभिमानेन भयं तमः ॥ ८६४ ॥ ८६५ ॥

सगुणस्य द्वितीयं हि निर्गुणं स्यान्न चापरम्।
निरर्थोऽसि निरर्थाख्यभेदकं यदि मुञ्चसि ॥ ८६६ ॥

द्वितीयकोटिस्थेशात्ते द्वितीयं स्यात्तदेव हि ॥ ८६७ ॥

अतो भक्त्या तमेवेशं भजेद्यश्च गुरुर्भुवि।
देवता च भवेत्तादृशाचार्ये यत्नवान्बुधः।
इति वाक्यार्थमालोच्य त्यजान्यद्भज नः प्रभुम् ॥ ८६८ ॥

निरर्थाख्येति निराख्योपसर्गार्थेत्यर्थः [भे. सौ. ३७५] द्वितीयकोटिस्थेति [भे. सौ. ३७६-३७७-३७८] ॥ ८६६ ॥ ८६७ ॥ ८६८ ॥

अविद्यमानो ह्यत्यन्तासन्नपि द्वयशब्दितः।
द्वितीयो निर्गुणाख्यात्मा ध्यातुर्नैर्गुण्यवादिनः ॥ ८६९ ॥

दुर्धिया भाति तत्त्वं तु तन्न किन्त्वच्युताभिधः।
अस्मात्पद्यद्वयात्पूर्वपद्ये स्पष्टोदितः किल।
उपर्युपरि चक्राङ्कोऽधोऽधो नारायणश्च यः ॥ ८७० ॥

दैवत्वे नासदीशादेर्वा द्वयस्य ग्रहाच्च भीः।
गुरुत्वेन तु तत्सेवाऽसूचिपूर्वविशेषणात् ॥ ८७१ ॥

अविद्यमानो हीति [भे. सौ. ३७९-३८०-३८१] ॥ ८६९ ॥ ८७० ॥ ८७१ ॥

तत्तेषां निर्गुणादीनां प्राप्त्यै कर्मादिकं चरत्।
बुधो निरुन्ध्याद्धि मनो विष्णावेव नियोजयेत् ॥ ८७२ ॥

'तत्कर्मसङ्कल्पविकल्पकं मनो बुधो निरुन्ध्यात्' इत्युत्तरार्धस्यार्थमाह तदिति तेषां कर्म इति विग्रहः। तेषां निर्गुणभावादीनां षष्ठ्यर्थः संबन्धः प्राप्त्युद्देश्यकत्वम्। चरत् मनः इति संबन्धः। सर्वेन्द्रियेषु प्रधानत्वात् कर्माद्यनुष्ठानमपि तत्सङ्कल्पपूर्वकत्वादेवमुक्तिः। निरुन्ध्यात् असदुपासनातो निवर्तयेत्। विष्णौ नियोजयेदिति आवृत्त्या योजना ॥ ८७२ ॥

मुकुन्दादच्युताख्याच्च ततः स्यादभयं किल।
असतः सत्त्वशून्यस्य निर्गुणस्यात्मभावनात् ॥ ८७३ ॥

उद्विग्नबुद्धेः पक्षिश्वाद्यात्मना भीरभूद्धिया।
विश्वान्तःपातिरुद्रादेर्वा भीर्विश्वस्वभावतः ॥ ८७४ ॥

सा यत्राच्युतपादाब्जोपासनायां निवर्तते।
सर्वात्मना विश्वपदमित्थं पञ्चार्थवद्ध्रुवम् ॥ ८७५ ॥

'अभयं ततः स्यादिति भागस्य व्याख्यानं **मुकुन्दादिति**। 'उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्तते भीः' इत्येतद्व्याख्याति **असतः** इति। **उद्विग्नबुद्धेः** 'न च रमन्त्यहो असदुपासनयाऽऽत्मनः' इति अनर्थहेतुत्वोक्तेः। विश्वात्मना इत्यस्य पञ्चधा अर्थमाह **पक्षिश्वेति** विश्व श्वा चेति द्वन्द्वः। हीनयोन्यात्मनेत्यर्थः। विश्वपदस्यावृत्त्या हीनयोन्यात्मकजगतः सकाशादित्यप्यर्थः। रुद्रादेः भस्मासुरादितः यद्भयं सा सर्वात्मना अनन्यचेतसा मुकुन्दोपासनया सर्वात्मना सामग्र्येण निवर्तते ॥ ८७५ ॥

नोचेत्सार्वजनीनोक्तित्यागो निर्हेतुको भवेत्।
वादीभपञ्चवक्त्राभमदो विश्वपदं ततः ॥ ८७६ ॥

सार्वजनीनोक्तिः विश्वात्मना इत्यस्य सर्वात्मनेत्यर्थवचनम्। यद्वा 'मन्येऽकुतश्चिद्भवमच्युतस्ये'त्यत्रत्याच्युतपदोक्तिः। **पञ्चवक्त्राभं** पञ्चार्थप्रतिपादकत्वात् सिंहसदृशम् ॥ ८७६ ॥

अत्र षण्मतधर्माणां मध्ये मध्वमताध्वना।
अकुतश्चिद्भयं मन्ये तदेवेत्यनुशास्ति तत् ॥ ८७७ ॥

अत्रेत्यस्यार्थः षण्मतधर्माणां मध्ये इति। **मध्वमताध्वनेति** अच्युतपादांबुजोपासनस्यैव मध्वमतत्वात्। 'स्वमातरं परित्यज्य श्वपाकीं वन्दते यथा। तथा हरिं परित्यज्य येऽन्यं देवमुपासते' इति कृष्णामृतमहार्णवोक्तेः। **तत्** अच्युतपादांबुजोपासनम् ॥ ८७७ ॥

नित्यमित्युक्तितो मुक्तौ चोपास्तिमनुशास्ति सः।
पादांबुजोक्त्या चाकारं सौन्दर्यादिगुणानपि ॥ ८७८ ॥

सः जायन्तेयः कविमुनिः ॥ ८७८ ॥

प्राचीनपद्यं तद्रीत्या सर्वं निर्णेयमुत्तरम्।
पुञ्जं भयानां भुञ्जानं तं जानन्को भयं जयेत् ॥ ८७९ ॥

प्राचीनपद्यं मन्येऽकुतश्चिदिति पद्यं [११-२-३३] **उत्तरं** द्वितीयाभिनिवेशतः इति पद्यं [११-२-३७] **भुञ्जानं** स्वयं संसारभयग्रस्तं रुद्रादिकम् ॥ ८७९ ॥

यं भीर्बिभेति तं भीरुः संभजेत्स्तंभसंभवम्।
इति प्राचीनपद्यस्य हृदयं हृदयो हि ते ॥ ८८० ॥

'भीरपि यं बिभेति' इति भागवतवाक्यम्। भीः दुर्गा। बिभेति इवेति योज्यम्। 'नोपेयाय शङ्किता' इत्यत्र शङ्कितेवेति तात्पर्योक्तेः। आज्ञाऽनुसारिणी इति भावः। **'स्तंभसंभवं'** प्रह्लादभयभञ्जकं नृसिंहम्। हृदयं तात्पर्यार्थः। **हृदः** मतस्य **अयः** संहारहेतुः शरः ॥ ८८० ॥

यस्मादुपास्तिमेवाह मुक्त्यै मुनिपरंपरा।
तस्मान्मिथ्योपास्तिवार्ता हृत्स्था गर्ते पतत्तव ॥ ८८१ ॥

मिथ्योपास्तिवार्ता उपासना अविद्यमानार्थविषया इति प्रजल्पः ॥ ८८१ ॥

एकैकस्यापि पशुपक्ष्यादिभावेन देहिनः।
नानात्वं संसृतावेव मुक्तावेकप्रकारता ॥ ८८२ ॥

'यावत्स्याद्गुणवैषम्यं इत्यादिश्लोकद्वयं उत्तरत्रोदाहृतं (श्लो. ७९२-७९३) तत्र सार्धश्लोकः निषेधार्थं परमतानुवादः। तदुक्तं जन्माधिकरणसुधायां परकृतानुवादो हि पुराणकर्तुर्द्वेधा संभवति। निराकरणार्थं वा यथा 'यावत्स्याद्गुणवैषम्य' इत्यादि इति। भागवततात्पर्येऽपि तथैव व्याख्यातम्। एवं स्थिते, यत्र क्वापि मुक्तौ नानात्वस्य अस्वातन्त्र्यस्य ईश्वरस्य च

अभावप्रतिपादकवाक्यानां न प्रतीतार्थ एव तात्पर्यं किन्तु प्रमाणानुगुणेऽर्थान्तर एवेत्याशयेन तादृशार्थान्तरं दर्शयति **एकेति**। नानात्वं नाम न भेदः किन्तु कर्मवशात्संसार इवास्वाभाविकानेकदेहप्राप्तिरित्यर्थः ॥ ८८२ ॥

राजादि तुच्छं म्लेच्छादेरीश्वरस्यापि तन्त्रता ।
संसृतौ स्याद्विमुक्तो तु स्वभावेश्वरतन्त्रता ।
नापरस्य ततो मुक्तिरेव प्रार्थ्या विवेकिभिः ॥ ८८३ ॥

इत्याह भगवान्व्यासो यस्माद्भागवते स्फुटम् ।
ततोऽप्यभवमन्विच्छन्नुपासीताच्युतं प्रभुम् ॥ ८८४ ॥

अस्वातन्त्र्यं न इत्यस्य 'ॐ अत एव चानन्याधिपतिः' इति सूत्रोक्तदिशा न्यायविवरणोक्तं 'न च परगृहगतत्वादस्य राजगृहगतस्येव स्वाधमा अपि कदाचिदीशते' इति स्वाधमवशत्वराहित्यमेवार्थः इत्याह **राजादीति**। **स्वभावेश्वराः** स्वरूपत एव स्वोत्तमाः तदुक्तं न्यायविवरणे 'मुक्तानां पतयो देवा देवानां च प्रजापतिः। तस्य विष्णुर्न चैवेदं पारावर्यं विनश्यति' इति ॥ तदेतदाह **ईश्वरेति** ॥ ८८३ ॥ ८८४ ॥

धर्मान्भागवतान्पृष्टः कविर्वादिविवादतः ।
भगवन्तं च तद्धर्मं विविच्येत्थमवर्णयत् ॥ ८८५ ॥

भगवन्तमिति भगवत्स्वरूपनिर्धारणं विना भागवतधर्मस्वरूपस्य निरूपणासंभवादिति भावः। **भगवन्तं विविच्य** अच्युत-नारायण-रथाङ्गपाणि-हरीत्यादिभिर्नामभिः निर्दिश्य। **तद्धर्मं विविच्य** पादाम्बुजोपासनं श्रवणादि—नवभक्तिः, समर्पणं इत्यादिना निर्गुणोपासनतः पृथक्कृत्य ॥ ८८५ ॥

अच्युतो भगवांस्तस्योपास्तिर्धर्मो महान्किल ।
भगवत्यर्पणं च स्यात्तद्धर्मोऽखिलकर्मणाम् ॥ ८८६ ॥

'मन्येऽकुतश्चिद्भयमच्युतस्य पादांबुजोपासनमि'त्युक्तमाह **उपास्तिरिति**। नारायणायेति समर्पयेदित्युक्तं निष्कामकर्म अधमप्रसादसाधनत्वात्तच्छ्रवणाङ्गम् इत्याह **तद्धर्म इति** ॥ ८८६ ॥

विमतो विष्णुरेवैको भगवानभयत्वतः ।
व्यतिरेकेण नाशादिभयग्रस्तजडादिवत् ।
भक्ताभयकरत्वाद्वा भगवान्स महाप्रभुः ॥ ८८७ ॥

अभयत्वतः अच्युतशब्दोक्तचतुर्विधनाशरहितत्वतः। **जडादिवत्** नित्यातादृशचिच्चैत्यवत्। **अभयकरत्वतः** अकुतोभयमिति, विश्वात्मनायत्र निवर्तते भीः इति परां शांतिमुपैति इत्यादिवर्णनात् ॥ ८८७ ॥

विमतो निर्गुणादिर्न भगवान्सभयत्वतः ।
अन्वयेनैव स भयचैत्रमैत्रादिजीववत् ॥ ८८८ ॥

निर्गुणादिः गुणपूर्तिरूपगुणरहित रमाब्रह्मादिः। **सभयवत्त्वतः इति**। भयं च रमायां नित्यशुश्रूषुत्वम्। चतुर्मुखस्य विष्णुप्रीत्यर्थं प्रदर्शनं इतरेषां भीषाऽस्माद्वातः पवते इत्यादि श्रुत्युक्तं यथायथं ध्येयम् ॥ ८८८ ॥

विमतं विष्णुभजनं धर्मो भागवतो भवे ।
भवभीभङ्गहेतुत्वाद्व्यतिरेकेण भुक्तिवत् ॥ ८८९ ॥

भव इति। मुक्तौ तु न चोदनात्मकः। किन्त्वानन्दस्वरूपेण तिष्ठतीति भावः। भुक्तिवत् अनिवेदितभोजनवत् ॥ ८८९ ॥

विमता निर्गुणाद्यर्चा धर्मो भागवतो न सा ।
भयहेतुत्वतः कुंभीपाकसाधनपापवत् ॥ ८९० ॥

इति पञ्चानुमानानि सोऽभिप्रैति कविः कविः ॥ ८९१ ॥

यावत्स्याद्गुणवैषम्यं तावन्नानात्वमात्मनः।
नानात्वमात्मनो यावत्तावदीश्वरतन्त्रता ॥ ८९२ ॥

यावदस्यास्वतन्त्रत्वं तावदीश्वरतो भयम्।
य एतत्समुपासीरंस्ते मुह्यन्ति शुचार्पिताः ॥ ८९३ ॥

निर्गुणाद्यर्चा सर्वोत्तमत्वगुणरहितानां परिवारतां विना प्रधानतः पूजा ॥ ८९० ॥ ८९१ ॥ ८९२ ॥ ८९३ ॥

इति भागवते स्पष्टं मुक्तावद्वैतमिच्छताम्।
भेदादेः संसृतावेव सत्त्वं संसदि शंसताम्।
मतं सर्वमनूद्यान्ते निषेधोऽपि विधीयते ॥ ८९४ ॥

य एतत्पूर्वकथितं प्रमेयं समुपासते।
तेऽन्धेतमसि शोकेन मूर्छां यान्तीति यज्जगौ ॥ ८९५ ॥

अतो भागवतं सर्वं मुक्तौ चेश्वरतन्त्रताम्।
भेदस्य च सदा सत्त्वं शास्तीत्येव मनोरमम् ॥ ८९६ ॥

अद्वैतमिच्छतां इति अन्ते निषेधमनादृत्य स्वेच्छानुसारेण व्याख्यातृनां आसुरप्रकृतीनामिति भावः। तैः कल्पितः अर्थः इत्थम्। गुणवैषम्यं सृष्टिः संसार इति यावत्। तथा च संसारदशायामेव भेदपारतन्त्र्यभयानि भवन्ति। मुक्तौ परमात्माभेद एवेति। **मूर्च्छां यान्तीति**। तदनुभूयमानात्युत्कटसंशोकश्रवणमात्रेण इतरान् मूर्च्छां प्रापयन्तीति भावः। तदुक्तं भाष्ये 'श्रवणादेव मूर्च्छादिरधरस्य यतो भवेदि'ति। **यत्** यस्मात् अत इत्युत्तरेणान्वयः ॥ ८९४ ॥ ८९५ ॥ ८९६ ॥

भगवत्परमेवाहुर्यतो भागवतं बुधाः।
भगवान्भाग्यवांश्च स्यात्पूज्यश्च स्यान्न चापरः।
अतोऽस्मिन्निर्गुणस्योक्तिरैक्योक्तिश्च न शोभते ॥ ८९७ ॥

कदाचिन्नास्तितारूपं मिथ्यात्वं तु तवापि न।
लयेष्वभावमात्रेण साध्यसिद्धिप्रसङ्गतः ॥ ८९८ ॥

त्रिकालनास्तितारूपो योऽत्यन्ताभाव उच्यते।
सत्तार्थकत्वाद्भूधातोरत्यन्तासत्त्वमेव तत् ॥ ८९९ ॥

भाग्येति। षड्गुणैश्वर्यसंपत्तीत्यर्थः ॥ **निर्गुणस्योक्तिरिति।** अवाच्यस्य वचनं इत्यस्य व्याघातादेवेति भावः। अस्मिन्नित्युपलक्षणं न कुत्रापीति भावः ॥ **तवापीति।** 'अविद्या सह कार्येण नासीदस्ति भविष्यति' इति त्वत्सिद्धान्तादिति भावः ॥ **तत्** पूर्वोक्तस्यात्यन्ताभावस्य प्रतियोगित्वम् ॥ ८९७ ॥ ८९८ ॥ ८९९ ॥

सत्त्वप्रत्यक्षबलतो यद्यसत्त्वं निवार्यते।
प्रमारूपं तदध्यक्षं ब्रह्मणीवोभयं क्षिपेत् ॥ ९०० ॥

उभयं असत्त्वं अनिर्वचनीयं च। तथा च प्रपञ्चः असदनिर्वचनीयान्यः पारमार्थिक इति यावत्। प्रमाविषयत्वात् ब्रह्मवदिति प्रयोगोऽभिप्रेतः ॥ ९०० ॥

भ्रमरूपं यदि भवेत्सा ह्यतद्वति तस्य धीः।
सत्त्वाभावस्यैव तर्हि द्विर्बद्धस्य सुबद्धता ॥ ९०१ ॥

सा प्रत्यक्षधीः यदि भ्रमः तर्हि सुतरां सत्त्वसिद्धिरित्याह **द्विरिति**। भ्रमोत्पत्त्यर्थं सन्निकर्षघटकतया। अनन्तरं घटः सन्निति विषयीकरणेन चेति प्रकारद्वयेनेत्यर्थः। पारमार्थिकसत्त्वाभाव इत्युक्तिस्तु ब्रह्मदृष्टान्तकप्रमाणदृष्टत्वानुमानपराहता निर्मूला चेत्युपेक्षणीयैवेति भावः ॥ ९०१ ॥

प्रत्यक्षं चार्थसंयुक्तचक्षुरादीन्द्रियैर्यदि।
तर्हीन्द्रियाणामर्थानां संयोगोत्पत्तये पुरा।
सत्ताऽपि वाच्या तच्छोच्या हन्ताऽभूदनुमैव ते ॥ ९०२ ॥

तदेवोपपादयति **प्रत्यक्षमिति** ॥ ९०२ ॥

अतोऽसत्त्वनिरासायानीतप्रत्यक्षशक्तितः।
त्रिकालनास्तितारूपमिथ्यात्वस्यापि बाधनात्॥ १०३ ॥

अपिशब्देन असत्त्वसमुच्चयः ॥ १०३ ॥

न चांबुना कर्णलग्नप्राचीनांबुनिवृत्तिमत्।
अनुमा बाधितैवाभूत्सार्थोऽभूत्तस्करस्तव ॥ १०४ ॥

अंबुना तस्मिन्नेव विषये प्रमाणान्तरोपन्यासेन। **कर्णलग्नं** पूर्वं श्रुतं **प्राचीनांबु** समानविषयकं मानान्तरम्। **न निवृत्तिमत्** अप्रमाणं न भवति। किन्तु संप्लवेन दृढीकृतमेव भवतीति भावः। **तस्करः** अनुवादकत्वेन प्रामाण्यापहाराय प्रवृत्तः। **सार्थोऽभूत्** पूर्वप्रामाण्यस्थिरीकरणायैवाभूत् ॥ १०४ ॥

असन्निकृष्टाक्षजं तदसत्त्वस्यैव साधकम्।
नृशिरःसङ्गि यच्चक्षुर्न तच्छृङ्गेण सङ्गवत् ॥ १०५ ॥

तत् तस्मात् सन्निकर्षाभावेऽपि दोषप्रयुक्तभानविषयत्वात्। **सङ्गि** दोषवशाद्गोचरयत्। **नेति**। असता सन्निकर्षासंभवादिति भावः ॥ १०५ ॥

एवं चासन्निकृष्टाक्ष्णा शुक्तिरूप्यनिरीक्षणम्।
असत्तां गमयेत्तस्य नत्वसत्तो विभिन्नताम्।
अर्थापत्त्याऽप्यनर्थोऽभून्न त्वर्थोऽभूत्परस्य तत्॥ १०६ ॥

अर्थापत्त्या प्रतीत्यन्यथाऽनुपपत्त्या। प्रतीतेर्दोषजन्यत्वात् **अनर्थः** विषयस्य असत्त्वमेव। न तु **अर्थः** असत्त्वप्रतिक्षेपः ॥ १०६ ॥

व्यावहारिकसत्ता च भ्रान्ताऽभ्रान्ता विकल्पने।
असत्त्वसाधिका वा स्यात्स्याद्वा
मिथ्यात्वबाधिका॥ १०७ ॥

सद्विविक्तत्वमपि ते सत्त्वानाधारतैव यत्।
अतस्तस्यापि साध्यत्वे स्यान्नृशृङ्गोपमं जगत्॥ १०८ ॥

भ्रान्ता भ्रमविषयश्चेत् **असत्वसाधिकेति** तथा च परस्यापसिद्धान्तः। **अभ्रान्ता** प्रमाविषयश्चेत्। **मिथ्यात्वबाधिकेति**। तथा च त्वत्सिद्धान्तानवक्लृप्तिः ॥ १०७ ॥ १०८ ॥

अतो मिथ्यात्ववादेऽस्मिन्ब्रह्मान्यत्सकलं जगत्।
असदेवाभवत्तेन माने स्याद्दूषणं बहु ॥ १०९ ॥

माने त्वदुक्तमिथ्यात्वानुमाने ॥ १०९ ॥

साध्यबाधाश्रयासिद्धी स्वरूपासिद्धिरेव च।
व्याप्यत्वासिद्धता च स्याद्दृष्टान्तासिद्धिरेव च॥ ११० ॥

मिथ्यात्वानुमानखण्डनोक्तान्दोषान् लेशतः संगृह्णाति **साध्यबाधेत्यादिना**। प्रत्यक्षादिविरुद्धत्वात् बाधः। जगतोऽभावादाश्रयासिद्धिः। दृश्यत्वाभावादसिद्धिः ॥ ११० ॥

मानानुगस्य ते मानोऽप्यपसिद्धान्तदोषतः।
भग्नः स्यात्सत्त्वमात्रस्य बाधे तस्य तु धर्मिणाम्।
स्वस्वरूपेण चाबाधे सदद्वैतमतक्षतिः ॥ १११ ॥

मात्रस्येति स्वरूपसत्त्वस्य व्यवच्छेदः ॥ १११ ॥

यथाऽबाध्यब्रह्मरूपं सदेकमभवत्तथा।
जडाबाध्यजगद्रूपमपि यस्मादभूद्धि सत् ॥ ११२ ॥

स्वरूपस्यापि बाधे तु प्रागुक्तं दूषणं भवेत्।
एवं चोभयतः पाशारज्जुर्बध्नाति ते गलम् ॥ ११३ ॥

'सन्मात्रत्वं ब्रह्मणोऽपि तस्मात्तदपि नो भवेदि'ति अनुव्याख्यानोक्तमाह **यथेति** ॥ प्रागुक्तं अत्यन्तासत्त्वरूपम् ॥ ९१२ ॥ ९१३ ॥

अन्यत्त्वं सदसद्भ्यां च यदि मिथ्यात्वमीर्यते ।
अप्रसिद्धं तदा साध्यं भवेद्धि प्रतिवादिनाम् ॥ ९१४ ॥

दृष्टान्ते साध्यवैकल्यशल्यं चैव भवेत्तव ।
सत्त्वभ्रान्तिः सन्निकर्षशून्यप्रत्यक्षमेव च ॥ ९१५ ॥

असत्त्वं स्थिरयेदुक्तविधया न निवारयेत् ।
अतः प्रसाध्यकाङ्गं च नासीदेतन्निदर्शनम् ॥ ९१६ ॥

दृष्टान्ते शुक्तिरूप्ये अत्यन्तासति ॥ ९१४ ॥ ९१५ ॥ ९१६ ॥

किञ्चासत्त्वनिषेधेऽपि सत्त्वस्याभावमात्रतः ।
प्रागुक्तपञ्चदोषाणां नैवोद्धारो भवेत्तव ॥ ९१७ ॥

प्रागुक्तेति (श्लो. ९१०) साध्यबाधादिपञ्चदोषेत्यर्थः ॥ ९१७ ॥

बाष्पारोपितधूमस्य सत्त्वाभावेन केवलम् ।
असद्विलक्षणस्यापि किं नासिद्धिर्भवन्मते ॥ ९१८ ॥

असिद्धिदोषस्यानिस्तारं पराभ्युपगतिप्रदर्शनेन निदर्शयति **बाष्पेति** ॥ ९१८ ॥

एवं च सद्विविक्तेषु रज्जुसर्पादिकेषु ते ।
असद्भिन्नेष्वपि यतस्तद्योग्यार्थो न दृश्यते ॥ ९१९ ॥

तत्तद्योग्यार्थः तत्तदुचितार्थक्रिया ॥ ९१९ ॥

तत्सत्त्वरहितत्वाख्यमसत्त्वं सर्वसंमतम् ।
मिथ्यात्वमस्तु सर्वत्र पुनस्तस्यासतोऽन्यता ।

व्यर्था किमर्थं स्वीकार्या
या व्याहत्या च दूषयेत् ॥ ९२० ॥

सत्त्वाभावेऽसत्त्वस्य नियतत्वात् पुनरसत्त्वनिषेधो व्याहत इत्याह **तदिति** ॥ ९२० ॥

दोषे सत्येव दृश्यत्वं योगस्यायोग्यता तथा ।
असत्त्वस्यैव सिद्ध्यर्थं लिङ्गभूते न संशयः ।
उक्तासिद्ध्यादिदोषाणां तस्मान्नास्ति तवौषधम् ॥ ९२१ ॥

विमतं असत् दोषजन्यज्ञानविषयत्वात् सन्निकर्षायोग्यत्वात् शशविषाणवत् इति प्रयोगं सूचयति **दोष इति** ॥ ९२१ ॥

व्यावहारिकसत्ता च प्रागुक्तेनैव वर्त्मना ।
न विकल्पसहा तस्मान्मिथ्यात्वाशां परित्यज ॥ ९२२ ॥

प्रागुक्तेति ९०७ तमे श्लोके उक्तेत्यर्थः ॥ ९२२ ॥

ज्ञानेन नाश्यता या तु साऽपि नास्ति निदर्शने ॥ ९२३ ॥

निदर्शने शुक्तिरूप्ये । तस्य असत्त्वेन नाशायोगात् ॥ ९२३ ॥

किञ्च भेदे तव मतेऽप्यनादौ ज्ञाननाश्यता ।
त्वद्रीत्यैव न यस्मात्स्वोपादेयक्षयरूपिणी ।
अतोंशतो बाधिता भूत्त्वन्नयेनैव तेऽनुमा ॥ ९२४ ॥

यदि भेदः अज्ञानोपादानकः स्यात् तदाऽज्ञाननाशेन विलीयेत । अनादित्वेनाज्ञानोपादेयत्वाभावान्नानादेर्भेदस्य निवृत्तिर्ब्रह्मवदेवेति भावः । अतः सत्यत्वेन तदंशे बाधश्चेति ॥ ९२४ ॥

हा हन्त किन्ते स्खलनमन्धस्येव पदे पदे ।
अविद्योपादानता च तमसीव न दूषणम् ॥ ९२५ ॥

नेति। अज्ञानस्य सत्यत्वात्तत्कार्यत्वं सत्यत्वस्यैव साधकम्। अज्ञानमिथ्यात्वं तु कफोणिगुडायितम् ॥ ९२५ ॥

अज्ञानस्यानुपादेयमज्ञानं सत्यमेव यत्।
अज्ञानोपादानतया किं नश्छिन्नं ततो वद ॥ ९२६ ॥

तदेवाह अज्ञानस्यानुपादेयम्। अन्यथाऽज्ञानपरंपराऽऽपत्त्याऽनवस्था स्यादिति भावः ॥ ९२६ ॥

स्वात्यन्ताभावसाहित्यं विरोधाद्बाधितं तव।
अविरोधे जगत्सत्त्वसिद्धेर्मम न दूषणम् ॥ ९२७ ॥

न दूषणं प्रतियोगिसत्त्वसहिष्णोरभावस्य पारिभाषिकत्वादिति भावः ॥ ९२७ ॥

किञ्चैवं सदसत्त्वाख्यपक्षस्याप्यविरोधतः।
अनिर्वाच्यत्ववृक्षस्य मूलच्छेदोऽभवत्तव ॥ ९२८ ॥

दृश्यध्यस्तत्वरूपं यद्दृश्यत्वं तव संमतम्।
साध्यावैशिष्ट्यदोषेण न तन्मिथ्यात्वसाधकम् ॥ ९२९ ॥

एवमिति। भावाभावयोर्विरोधाभावे इत्यर्थः। **मूलच्छेदः** चतुर्थप्रकारानुपपत्तिः। तृतीयप्रकारस्यैवं स्वीकारोपपत्तेः ॥ ९२८ ॥ ९२९ ॥

हेतोरन्यतरासिद्धिश्च स्यादीदृशि साधने।
बाध्यत्वं च ममासिद्धं केन साध्यं प्रसाध्यते ॥ ९३० ॥

बाध्यत्वं त्रैकालिकनिषेधप्रतियोगित्वरूपं त्वदभिमतम् ॥ ९३० ॥

नापि वृत्तिव्याप्यता ते मते भवति दृश्यता।
संबन्धस्यानिरुक्त्या च ब्रह्मणि व्यभिचारतः।
यतस्ते चरमा वृत्तिर्ब्रह्मचिन्मात्रगोचरा ॥ ९३१ ॥

अनिरुक्त्या विषयविषयिभावस्यानङ्गीकारात् वृत्तेः मिथ्यात्वेन तत्राध्यासासंभवाच्च ॥ ९३१ ॥

साक्षिवेद्ये शुक्तिरूप्ये त्वद्दृष्टान्तेऽप्यवर्तनात्।
साक्षिवेद्याज्ञानपूर्वे भागासिद्धिप्रसङ्गतः ॥ ९३२ ॥

अज्ञानादीनां प्रातिभासिकत्वेन सन्निकर्षसापेक्षान्तःकरणवृत्तिव्याप्यत्वासंभवात्तत्रासिद्धिरित्याह **साक्षिवेद्येति** ॥ ९३२ ॥

कथञ्चिद्युक्तिवेद्यत्वाच्छ्रुतिवेद्यत्वतश्च तत्।
वृत्तिव्याप्यं यदि तदा स्यादैक्ये व्यभिचारिता ॥ ९३३ ॥

अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि।
इत्युक्तेः शशशृङ्गादौ त्वद्रीत्या व्यभिचारिता ॥ ९३४ ॥

व्याप्तिशक्तिरूपसन्निकर्षस्य युक्त्यागमवेद्यत्वस्य प्रातिभासिकेषु प्रतिभासमात्रशरीरत्वेनासंभवात्कथञ्चिदित्युक्तम्। उपेत्यापि दोषान्तरमाह **ऐक्य इति** ॥ ९३३ ॥ ९३४ ॥

वृत्त्याकाराकारितायां हेत्वसिद्धिश्च मे भवेत् ॥ ९३५ ॥

मे इति करणसामर्थ्येनैव विषयविषयिभावोपपत्तेर्मयाऽन्तःकरणस्य बहिर्निर्गत्य विषयाकारभवनस्य अनङ्गीकारादिति भावः ॥ ९३५ ॥

किञ्च दृश्यत्वजडतापरिच्छिन्नत्वपूर्वके।
धर्मे सत्यपि शुक्तिस्ते न मिथ्या केन हेतुना ॥ ९३६ ॥

तद्रूप्यस्यैव मिथ्यात्वे बाध एव प्रयोजकः।
वाच्यस्त्वयाऽपि न त्वन्यः स तु नास्त्येव मन्मते ॥ ९३७ ॥

शुक्त्युपलक्षितवियदादेः बाधस्य सत्त्वग्राहिप्रमाणविरोधादसंभव इत्याह **किञ्चेति** ॥ ९३६ ॥ ९३७ ॥

निष्प्रकारकधीपक्षे बाधस्तु भवतोऽपि न।
नास्तित्वाकारबोधं यद्बाधमाहुर्विपश्चितः ॥ ९३८ ॥

मन्मते इति मुखतः। त्वन्मतेऽपि बाधो न संभवतीत्याह **निष्प्रकारकेति** ॥ ९३८ ॥

बाधबाधेऽपि बाधेन तदभावे स एव सन्।
अतो मिथ्यात्ववादस्ते युक्तेर्मिथ्यात्वमानयत् ॥ ९३९ ॥

बाधस्य बाधः अस्ति न वा। नाद्यः प्रपञ्चस्य सत्यत्वापत्तेः। न द्वितीयः अद्वैतभङ्गापत्तेः अपरिहारात् इत्याह **बाधेति** ॥ ९३९ ॥

सत्यत्ववादिनामेव सहायमकरोदहो।
विस्तरस्त्वस्य सर्वस्य मूलशास्त्रे प्रदृश्यताम् ॥ ९४० ॥

मूलशास्त्रे मिथ्यात्वानुमानखण्डनतट्टीकादिषु ॥ ९४० ॥

चर्चेयं परीत्यैव परावद्याभिधित्सया।
तन्मन्ये माध्वराद्धान्तं विद्वन्मकुटवर्धनम् ॥ ९४१ ॥

जरतीभिः कारुरहमश्वो वोढेति वाक्त्रयम्।
वक्ति वैकुण्ठमाहात्म्यं तच्च किञ्चिद्विवृण्महे ॥ ९४२ ॥

कार्मारः कारुजातीयो यत्र मुक्तौ हरेः पुरि।
जरतीभिः प्रवृद्धाभिरोषधीभिश्चिदात्मभिः ॥ ९४३ ॥

वंशादिभिर्ध्वजं चापं बाणवेणुरथादिकम्।
क्रीडायै रचितं दिव्यं शकुनानां पतत्त्रिणाम् ॥ ९४४ ॥

पर्णैः पत्रैः शिखण्डाद्यैर्द्युभिर्द्योतनकारिभिः।
अश्मभिश्चित्ररत्नैश्च चित्रितं पुनरिच्छति।
हिरण्यवन्तं कर्तुं च तत्र माममृतं कृधि ॥ ९४५ ॥

मुक्तिस्वरूपनिरूपणपरं सोमसूक्तं लेशतो व्याख्याति **जरतीभिरित्यादिना**। 'जरतीभिरोषधीभिः पर्णेभिः शकुनानाम्। कार्मारोऽश्मभिर्द्युभिर्हिरण्यवन्तमिच्छतीन्द्रायेन्दो परिस्रव' इति वाक्यं व्याचष्टे **कार्मार इति**। **जरतीभिः** प्रवृद्धाभिः। चिद्रूपत्वात् शाश्वतीभिः। **पुनरिच्छति इति**। 'स्वेच्छया करोति न वा। बन्धप्रत्यवाययोरभावात्' इति भाष्यात् ॥ ९४१ ॥ ९४२ ॥ ९४३ ॥ ९४४ ॥ ९४५ ॥

प्रायपाठबलादत्राप्येतद्वाक्यं किलोह्यते।
परिस्रव स्रावयेन्दो तत्र मामिति वा भवेत् ॥ ९४६ ॥

'तत्र माममृतं कृधि' इति मुमुक्षोर्वायुं प्रति प्रार्थनं सर्वत्रोह्यम् इत्याह **प्रायपाठादिति**। यद्वा 'इन्द्रायेन्दो परिस्रव' इति यथास्थितं योजना। **इन्दो** पवमान, **इन्द्राय** परमैश्वर्यशालिनः परमात्मनो नित्यसेवार्थं **परि** तमुद्दिश्य मां **स्रव** स्रावय प्रापय इत्यर्थोऽग्रे व्यक्तः। [श्लो. ९५९] ॥ ९४६ ॥

यत्र कारुरहं त्वष्टा यत्रास्ते जातितो भिषक्।
यत्रोपलक्षेपणी च न नानानाविधः किल ॥ ९४७ ॥

नानाधियस्तारतम्यबुद्ध्यो वसवोऽखिलाः।
विचित्रवसुयुक्ता वा मुक्ताः सर्वेऽनुगा इव ॥ ९४८ ॥

वयं तस्थिमकृष्णस्य तत्र माममृतं कृधि।
अवतारेऽनुगमनाभावात्सर्वेऽनुगा इव ॥ ९४९ ॥

'कारुरहं ततो भिषगुपलप्रक्षिणीनना। नानाधियो वसूयवोऽनुगा इव तस्थिमेन्द्रायेन्दो परिस्रवे'ति वाक्यं व्याख्याति **यत्रेति**। मुक्तावपि इदानीमिव कारुकर्मणैव त्वां परिचरिष्यामि इति त्वष्टृप्रार्थनम्। 'त्वष्टारं रूपाणि विचिन्वन्तं' इति तत्स्वाभाव्यात्। एवं भिषगहं इति अश्विनौ। तथा तत्तद्देवाः। **उपलक्षेपणी** पट्टणालङ्कारोपयुक्तवस्तुविशेषः। **वसवः** वसुगणा देवाः। अर्थान्तरमाह

विचित्रेति । अनुगा इवेति । परिवारतया सर्वदा मध्ये उपविष्टं नारायणं सेवमानानां सर्वदा अवतारसमयेऽपि अनुगमनाभावात् इवेत्युक्तम् ॥ ९४७ ॥ ९४८ ॥ ९४९ ॥

यत्र विष्णोः समीपस्थसामन्तस्य प्रधानिनः ।
उपमन्त्रिपदोक्तस्य मुक्तशक्रादिरूपिणः ॥ ९५० ॥

रथं ज्ञानानन्दमयमश्वो मुक्ततुरंगमः ।
सुखं सुखेनैव वोढा पर्यक्प्रापयिता किल ॥ ९५१ ॥

'अश्वो वोढा सुखं रथं हसनामुपमन्त्रिणः । शेपो रोमण्वन्तौ भेदो वारिन्मण्डूक इच्छतीन्द्रायेन्दो परिस्रव' इति वाक्यं विवृणुते यत्रेति । सुखं सुखकरम् ॥ ९५० ॥ ९५१ ॥

रोमण्वन्तौ रोमवन्तौ मेषौ ज्ञानशरीरिणौ ।
तौ भेदौ पुरतस्तस्य मिथस्ताडनकारिणौ ॥ ९५२ ॥

सुखं सुखेनैव दुःखं वैराद्यं तु न किञ्चन ।
मुक्तत्वात्तस्य शेपोऽण्डं महत्सुखमयं सदा ॥ ९५३ ॥

हसनां मन्त्रिणस्तस्य वोढारौ यत्र लीलया ।
यद्भिन्त इति भेदौ च स्यातां भेदनकारिणौ ॥ ९५४ ॥

यदित्थं यत्र मण्डूका वाः सरोवरवारि च ।
इच्छन्ति चित्सुखाकारास्तत्र माममृतं कृधि ।
जात्येकवचनं चेदमेकभेकं सरः क्व तत् ॥ ९५५ ॥

एवं नानाविधा मुक्ता यत्र तत्रामृतं कृधि ।
इत्युक्त्या तद्गजीवानां मुक्तत्वं सुतरामभूत् ॥ ९५६ ॥

भेदौ परस्परं परिहासार्थं शिरस्ताडनं कुर्वन्तौ । न तु विरोधेन । तदुक्तं भाष्ये 'नानाविधा जीवसङ्घा विमुक्तौ न चैव तेषां ब्रह्मधियां विरोधः ।

दोषाभावाद्गुरुशिष्यादिभावाल्लोकेऽपि नासौ किमु तेषां विमुक्तेरि'ति । वारि उदकं प्रवेष्टुमिति शेषः । एतेन मुक्तावपि स्वस्वजातिस्वभावानुवृत्तिः स्वेच्छयेति ज्ञाप्यते ॥ ९५२ ॥ ९५३ ॥ ९५४ ॥ ९५५ ॥ ९५६ ॥

तदुत्तरर्चां चर्चा च किञ्चित्किञ्चिद्विविच्यते ।
अमृते अक्षिते यत्र लोके सुकृतकर्मभिः ।
सुष्ठु चीर्णनिवृत्ताख्यमुक्तिसाधनकर्मभिः ॥ ९५७ ॥

देवैर्महीयते विष्णोः परमं तत्पदं सदा ।
तत्रामृतं मां कृधीन्दो पवमानेष्टदायक ॥ ९५८ ॥

इन्द्राय परमैश्वर्यसंपन्नाय परिस्रव ।
परितः स्त्रावयेन्द्रं तमुद्दिश्य प्रापयाशु माम् ॥ ९५९ ॥

णिचोंऽतर्नीतता तस्य सह प्राप्तिविवक्षया ।
इत्यर्थानां मुमुक्षूणां कर्णेऽद्यापि जपन्ति याम् ॥ ९६० ॥

अमृते इति लोकस्थानां मरणं नास्तीति भावः । अक्षिते इति लोकस्यैव स्वरूपतो नाशाभाव इत्यर्थः । अतो न पुनरुक्तिः । मन्त्रस्थस्य 'सत्येन' इति पदस्यार्थः सुकृतकर्मभिरिति । 'सत्यं यथार्थविज्ञानं सत्यं तत्पूर्विका कृतिरि'ति वचनात् ॥ ९५७ ॥ ९५८ ॥ ९५९ ॥ ९६० ॥

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि ॥ ९६१ ॥

इति श्रुतेः शिरःपाणिद्वयमध्यांघ्रिरूपिणः ।
प्रियमोदप्रमोदानन्दमुदाख्याः सदासते ॥ ९६२ ॥

यत्रेति मन्त्रवाक्यम् । प्रिया इत्यपि ग्राह्यम् ॥ ९६१ ॥ ९६२ ॥

कामाप्तिव्यक्ततत्सौख्यं यतस्तेषां मनःप्रियम् ॥ ९६३ ॥

'तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः, प्रमोद उत्तरः पक्षः, आनन्द आत्मा, ब्रह्म पुच्छं प्रतिष्ठा' इति उपनिषदनुसारेण व्याख्याति **इतीति**। अनुव्याख्याने (४-२-१) उदाहृतोऽयं श्लोकः। अत्र सुधा 'आनन्दादिशब्दाः सुखविशेषाणां वाचकाः **कामस्य कामाः** इच्छाया विषयाः। **आप्ताः** पर्याप्ताः। **कृधि** कुरु इति वायुं प्रति प्रार्थनमि'ति। उपकारजं प्रियम्। प्रकृष्टाप्रकृष्टविषयोत्थौ मोदप्रमोदौ। स्वरूपभूत आनन्दः ॥ ९६३ ॥

आनन्दमयरूपस्य हरेः सारूप्यमीयुषः।
मुक्तांश्च तादृशाकारान्सर्वाञ्शंसति सा श्रुतिः॥ ९६४ ॥

प्रत्येकं बहुतां यस्मादानन्दादेश्च सा जगौ।
एवं च तत्सरूपाणां मुक्तानामाकृतेर्बलात् ॥ ९६५ ॥

आनन्दमयपादस्य ब्रह्मपुच्छमिति श्रुतिः।
पूर्णमुद्रूपतामेव प्राह पूर्वसमाख्यया ॥ ९६६ ॥

तादृशेति तेन मुक्तजीवनिष्ठानां प्रियादीनां भगवन्निष्ठानन्दविशेष-प्रतिबिम्बत्वं ज्ञाप्यते। मुदः इत्यादिना तद्वन्तो मुक्ता उच्यन्ते। तेन तेषां बहुत्वं ज्ञायते इत्याह **बहूनामिति**। **बलात्** तदधीनत्वतत्सादृश्यहेतोः। **पूर्वसमाख्यया** ऋग्वेदसमाख्यया ॥ ९६४ ॥ ९६५ ॥ ९६६ ॥

प्रियोदपूर्णतां तत्तच्छ्रुतिरेतत्समाख्यया।
शंसतीत्येव सिद्धोऽर्थो नोचेद्व्यर्थाऽत्र तत्कथा॥ ९६७ ॥

एतत्समाख्यया ब्रह्म पुच्छमिति श्रुतिसमाख्यया। **शंसति** पादस्य ब्रह्मशब्देन पूर्णत्वकथनात्। **नो चेत्** बिम्बभूतस्य आनन्दमयस्य शिरःकरमध्यदेहचरणानां आनन्दपरिपूर्णत्वज्ञापनाभिप्रायाभावे। **अत्र** मुक्तप्रकरणे। **तत्कथा** मोदादिसुख-विशेषशंसनम् ॥ ९६७ ॥

यत्स्वाकृत्या मुकुन्दस्य मुक्ता निर्णिन्युराकृतिम्।
तत्तीर्णसरितोऽप्येते तारकं न विसस्मरुः ॥ ९६८ ॥

निर्णिन्युः परमात्मा निरवधिकानन्दाकृतिः यथायोग्यं पूर्णानन्दाकृत्युपेत-मुक्तान् प्रति बिम्बभूतत्वात् इति स्वयं हेतूभूय इति भावः। **तीर्णसरितः** इति 'इमां घोरामशिवां नदीं तीर्त्वा एतं सेतुमाप्य एतेनैव सेतुना मोदते प्रमोदते आनन्दीभवति' इति भाष्योक्तेः। **तारकस्य** 'ज्ञानिनां मोक्षदश्च सः' इत्युक्तेः। **न विसस्मरुः** निरन्तरं स्मरन्ति। स्वभावादेव न तु प्रयोजनापेक्षयेति भावः ॥ ९६८ ॥

यत्र ब्रह्मा च मुक्तोऽस्ति यत्र ब्रध्नस्य विष्टपम्।
मुक्तसूर्यस्य सदनं यत्र वैवस्वतो यमः ॥ ९६९ ॥

मुक्तः सन्रञ्जनात्तेषां राजा न तु भयङ्करः।
दिवोऽवरोधनं यत्र स्वर्गान्तःपुरयोषितः ॥ ९७० ॥

मुक्ताः सत्यः स्वर्गिभिस्तैर्मुक्तैः सह किलासते।
मुक्तब्रह्मादिदेवानामास्थानी किल सा पुरी ॥ ९७१ ॥

ब्रह्मा समुदायैकवचनम्। मुक्तब्रह्मगणाः। **ब्रध्नस्य विष्टपं** सूर्यस्यासनम्। **यमः** रञ्जकः न तु मृत्युप्रदत्वेन भीषकः। **अवरोधनं** अन्तःपुरम् ॥ ९६९ ॥ ९७० ॥ ९७१ ॥

नित्यं यत्र किल ज्योतिः किं वाच्या तस्य नित्यता।
निर्दुःखत्रिपुरीरूपा सापि नाकाभिधा किल॥ ९७२ ॥

नित्यं लक्ष्मीस्वरूपत्वात्। **त्रिपुरीति** अनन्तासनश्वेतद्वीपवैकुण्ठरूपेत्यर्थः। **नाकाभिधा** 'ते ह नाकं महिमानः सचन्त' इति प्रसिद्धा। कं सुखं, अकं दुःखं, तेन सर्वात्मना रहितं इति व्युत्पत्तेः। 'यत्र दुःखेन संभिन्नं' इत्यादितल्लक्षणात् ॥ ९७२ ॥

इतोन्या याऽदिमुक्तिः स्यात्सैव प्रार्थ्या मुमुक्षुभिः।
प्रत्यृचं प्रार्थ्यमानेयं महामुक्तिर्न संशयः ॥ ९७३ ॥

अन्या तमसा मुष्टदृष्टिभिः नानामतसमाश्रयात् कल्प्यमाना निर्विशेषभावादिरूपा ॥ ९७३ ॥

एवं च पवमानस्य गुरुत्वे मुक्तिमीयुषाम् ।
बहुत्वे विष्णुसेवित्वे तल्लोकस्य क्षयोज्झितौ ॥ ९७४ ॥

तत्प्राप्तेर्मुख्यमोक्षत्वे तत्र जात्यपरिक्षये ।
भेदस्य परमार्थत्वे तद्वानां मृतिवर्जने ॥ ९७५ ॥

गुरुत्वे इत्यादि सप्तम्यन्तानां निःशङ्को भवेत्युत्तरेणान्वयः । **जात्यपरिक्षये** स्वभावजातीनां मेषमण्डूकादीनां अवस्थितेः श्रौतत्वात् ॥ ९७४ ॥ ९७५ ॥

विष्णोः परमदैवत्वे तदन्यब्रह्मवर्जने ।
निःशङ्को भव दुर्मार्गं त्यज भक्त्या भज प्रभुम् ।
यद्वाङ्निरवकाशेयं तद्दोग्ध्यखिलमीप्सितम् ॥ ९७६ ॥

इयं सोमसूक्तस्था पञ्चवर्गचतुष्टयात्मिका । **ईप्सितं** सर्वशास्त्रतात्पर्यार्थं पुरुषार्थचतुष्टयं च ॥ ९७६ ॥

अतः शुभगुणांभोधिः शुद्धः सर्वविलक्षणः ।
सत्यविश्वाश्रयो मुक्तामुक्तेशो जयति प्रभुः ॥ ९७७ ॥

सौरभपञ्चकार्थं विशेषणपञ्चकेन क्रमेण संगृह्णन् महातात्पर्यं दर्शयति **अत** इति । जयति सर्वोत्कृष्टो वर्तते । भक्तानां संसारं अभिभवति मोक्षदानेन । उभयत्र हेतुः प्रभुः स्वतन्त्र इति ॥ ९७७ ॥

वित्तै रिक्तोपि जात्युच्चो नात्यल्पमुपसर्पति ।
सुक्षीणर्क्षेशरक्षा स्यादर्कोदर्कश्रियैव हि ॥ ९७८ ॥

जात्युच्चः ब्राह्मणः । **अत्यल्पं** धनिकं राजादिकम् । 'मा गृधः कस्य चिद्धनं' इति निषेधात् **न उपसर्पति** तस्मात् संपदं नाशास्ते । 'प्रतिग्रहं मन्यमानस्तपस्तेजोयशोनुदं' इत्युक्तेः । निदर्शयति **सुक्षीणेति** ऋक्षेशः नक्षत्रेशश्चन्द्रः

सुक्षीणः अमावास्यायां पञ्चदशकलाविकलोऽपि ।तस्य रक्षा । **अर्कः** अलं सुखपूर्णः सूर्यान्तर्गतनारायणः **तस्य श्रिया** तेन दत्तया सुषुम्नातेजःकलया । **यद्वा वित्तै रिक्तः अपि** भगवदाज्ञया राज्यैश्वर्यं परित्यज्य वनं गतः अपि **जात्युच्चः** जीवजातिषूत्तमः वृकोदरः । **अत्यल्पं** अक्षय्यपात्रार्थं सूर्यं वा अस्त्रलाभार्थं पशुपत्यादिकं वा न उपसर्पति । ऋक्षेशस्य अयं ऋक्षेशः । तद्धितप्रत्ययस्य लोपः चन्द्रवंशोत्पन्नः । तस्य रक्षा । अर्कस्य सुखपरिपूर्णस्य कृष्णस्य **उदर्कश्रियैव** संपूर्णानुग्रहेणैव ॥ ९७८ ॥

तत्संपत्तौ विपत्तौ च गतिः श्रीपतिरेव नः ।
यो ब्रह्मरुद्रवीन्द्रेन्द्रचन्द्रादीनामधीश्वरः ॥ ९७९ ॥

संपत्तौ मुक्तौ **विपत्तौ** संसारे **गतिः** अधिपतिः । **नः** अस्माकं तत्त्ववादिनां सिद्धान्ते । चन्द्रादीनां सोमसूक्तोक्तरीत्या मुक्तानां अमुक्तानां च ॥ ९७९ ॥

नान्यं भजामि न स्तौमि नानुयामि कदाचन ।
हरिं च हरिपत्नीं च सुरादींश्च गुरून्विना ॥ ९८० ॥

गुरून् स्वोत्तमान् । 'अन्येऽपि स्वात्मनो मुख्याः क्रमाद्गुरव ईरिताः' इति वचनात् ॥ ९८० ॥

भक्तिः स्यात्त्वयि गोविन्द तृप्तिः स्यात्त्वन्निषेवया ।
त्वत्तोऽन्यत्र विरक्तिः स्यान्मुक्तिश्च
स्यान्मुकुन्द मे ॥ ९८१ ॥

मुक्तिः **स्यादिति** मुकुन्दार्थं इति शेषः । 'एकान्तानां न कस्यचिदर्थे नारायणो देवः सर्वमन्यत्तदर्थकमि'त्युक्तेः ॥ ९८१ ॥

अस्मिन्भवे भवेऽन्यस्मिन्भवान्ते च भवाम ते ।
दासानुदासाः श्रीनाथ त्राता त्वं नः सदा भव॥ ९८२ ॥

भवान्ते मुक्तौ ॥ ९८२ ॥

पद्माख्यसूत्रबद्धेयं हृद्या स्याद्युक्तिमल्लिका ।
पद्मनाभस्य मध्वस्य विद्यायाश्च मनःप्रिया ॥ ९८३ ॥

पद्मनाभस्य रमालालितपादपल्लवस्य । तदुक्तमभियुक्तैः 'ध्रियतां सदये हृदये कमलामहिलेन पुरुषेण' इति । तेन रमाया अपि मनःप्रियत्वं प्रार्थितं ध्येयम् । विद्यायाः ग्रन्थाभिमानिन्या भारत्याः ॥ ९८३ ॥

हयग्रीवपदांभोजमधुमत्तमधुव्रतैः ।
सदा सेव्या वादिराजरचिता युक्तिमल्लिका ॥ ९८४ ॥

सदा सेव्या तत्रेप्सितहयग्रीवमहिमामृतप्रवाहनिष्यन्दित्वात् 'विहातुमिच्छेन्न रसग्रही जनः' इत्युक्तेः ॥ ९८४ ॥

यो युक्तिमल्लि ते फुल्लपल्लवोल्लासवल्लभः ।
अञ्चाहिमञ्चं रम्यं च तं प्राञ्चन्त्वं च सौरभैः ॥ ९८५ ॥

हे **युक्तिमल्लि** युक्तिमल्लिके, इति ग्रन्थदेवतां भारतीं प्रति प्रार्थना । अभिमान्यभिमन्यमानयोरैक्यव्यपदेशात् । **ते** फुल्लानां सुस्पष्टानां पल्लवानां शास्त्रप्रमेयप्रतिपादनानां उल्लासः शोभा येन सः श्रीमुख्यप्राणः तस्य यः **वल्लभः** प्रेष्ठतमः । तं अहिमञ्चं शेषशायिनं रमारमणं अञ्च पूजय । तथा **रम्यं** द्वात्रिंशल्लक्षणोपेतं **प्राञ्चं** आदिगुरुं प्राणपतिं त्वं च त्वमेव **अञ्च** हरिनिर्माल्यतयोचिताया युक्तिमल्लिकायाः समर्पणेन पूजय । त्वत्प्रेरणयैव केवलं ग्रथितायाः समर्पणे तवैवाधिकार इति भावः ॥ ९८५ ॥

यद्वाङ्मूलाऽसि मध्वोऽसौ विस्तारयतु ते गुणान् ।
दशप्रमतयो यस्य दश चाकृतयः प्रभोः ।
वल्लीधुरंधरो योऽसौ पुष्पवाटीधुरंधरः ॥ ९८६ ॥

बीजावापः प्ररोहश्च पल्लवः प्रसवानि च ।
यत्प्रबन्धः प्रचारश्च विद्वन्मध्वस्य शक्तितः ॥ ९८७ ॥

यस्य श्रीमध्वस्य वाक् भाष्यादिकं तदेव मूलं उपजीव्यं यस्याः सा **यद्वाङ्मूला असि** वर्तसे । **असौ** गन्धवहः वायुः । **ते गुणान्** सौरभसर्वस्वान् **विस्तारयतु** श्रीशपादांबुजे समर्पणेन तदलौकिकाप्राकृतगन्धसंमिश्रणेन । **विस्तारयतु** दशदिक्षु सज्जनचेतांसि सुरमयतु । **दश आकृतयः** प्राणादयः पञ्च कूर्मानन्तादयः पञ्च इति दश । **पुष्पवाटी** मीमांसाशास्त्रग्रथितयुक्तिपुष्पवनं तस्या **धुरंधरः** अन्यैरसुकरस्य भाष्यस्य रचयिता । अत एव तदुपजीविकायाः बीजावापादिसमग्रहेतुः ॥ ९८६ ॥ ९८७ ॥

क्रयोत्थवित्तसंपत्त्या तत्पूर्णो गुरुरेव नः ।
तद्दत्तवित्तभुग्योऽहं तत्परीचारमाचरन् ॥ ९८८ ॥

'स्वामी हि फलमश्नुते नास्वामी कर्म कुर्वाणः' इति भाष्यमनुरुध्याह **क्रयेति** युक्तिमल्लिकायाः शिष्यप्रशिष्येषु प्रचयः । **तदुत्था** वित्तसंपत्तिः पुण्यप्राप्तिः तया **पूर्णः इति** 'द्रव्यस्वातन्त्र्यविज्ञानप्रयत्नैरधिकं फलम् । देवानामन्यगं चापि तेषु हि ब्रह्मणोऽधिकम्' इत्युक्तेः । 'आर्त्विज्यमित्यौडुलोमिरि'ति सूत्रभाष्यदिशाऽऽह **तद्दत्तेति** । 'सत्रयागेषु ऋत्विजामिवाल्पं फलं प्रजानामपि भवति' इति भाष्योक्तेः ॥ ९८८ ॥

गृहेषु गृहकृत्यानि कुर्वन्पथि पदानुगः ।
तेन राजान्तिकं नीतः सोऽहं सेवाधुरंधरः ॥ ९८९ ॥

तेन वायुना राजान्तिकं परमात्मनः समीपं 'स एनान् ब्रह्म गमयती'ति श्रुतेः ॥ ९८९ ॥

स्ववनं स्वगृहं स्वाध्वस्वराजनगरीषु च ।
स एव मम योगीन्द्रो योगक्षेमधुरंधरः ॥ ९९० ॥

स्ववनं वनवद्दुर्गमः ग्रन्थविस्तरः ॥ **स्वगृहं** तदधिष्ठितं नानादेहजातम् । **स्वाध्वा** वैष्णवो मार्गः । **स्वराजः** विष्णुः तस्य नगरीषु वैकुण्ठादिषु । **स एव** मध्व एव ॥ ९९० ॥

श्रुतिस्मृतिनिषङ्गोत्थमन्त्रास्त्रैर्यः समन्ततः ।
हिमालयस्य मलयस्य च मध्येऽजयत्खलान् ॥ ९९१ ॥

मन्त्रास्त्रैः । 'वाक्यैरतिबलीयोभिः प्रत्यस्त्रैरिवि वैदिकैः । अर्थान्तरं प्रकटयंस्तान्यसौ संन्यवर्तयत्' इत्युक्तदिशा परप्रयुक्तवेदवेदानुसारवाक्याना-मर्थान्तरप्रदर्शकैः ॥ ९९१ ॥

सोऽन्तः प्रविश्य दुःशास्त्रपुर्याः सर्वस्वशोधनम् ।
महाराजो मम गुरुस्तुच्छं कार्यमुपैक्षत ॥ ९९२ ॥

उपैक्षत 'न चाप्रामाणिकं कल्प्यम्' 'नान्यथा तददृष्टेः' इति संक्षेपेणैव दूषितवान् । न तु सविस्तरं सुधाचन्द्रिकादाविव परकीयपादभेदक्रमादिदूषणं पञ्चाख्यातिमतपराकृतिं प्रतिसूत्रं स्वीयान्यभाष्ययोः घटनाघटनप्रकाशनं च व्यधादिति भावः ॥ ९९२ ॥

विद्यादारिद्र्यदोषेण दुःखी तत्सैन्यभिक्षुकः ।
अहमर्थातुरस्तां तु प्राविशं तद्भटैः सह ॥ ९९३ ॥

विद्यादारिद्र्यदोषेण भाष्यादिनिगूढगभीरनिर्मलार्थपरिज्ञानाभावनिमित्तेन । **तत्सैन्यभिक्षुकः** पद्मनाभतीर्थत्रिविक्रमपण्डिताचार्यजयतीर्थादीनां प्रबन्धार्थसंग्रा-हकः । **तद्भटैः** रुद्रगौतमप्रभृतिभिः विष्णोराज्ञया दुर्जनविमोहनाय मुखतो विपरीतार्थबोधकदुःशास्त्रप्रणयनेऽपि सज्जनानुजिघृक्षया तात्पर्यतः मध्वसिद्धान्त-स्यैव निरूपणपरैः । तां पुरीं परदर्शनाख्यपुरीम् ॥ ९९३ ॥

दुस्तर्कतस्करान्जघ्नुस्तत्र तत्र त एव हि ।
ससंभ्रमोच्चस्वरकृत्सोऽहं मेलनकृत्परम् ॥ ९९४ ॥

त एव रुद्रादय एव ।'योग्यान्योजयितुं धिया विमलया नाभाव इत्यादिभिः ॥ सूत्रैः खण्डितमाह बौद्धदलनव्याजेन तच्छङ्करः' इत्युक्तेः । **जघ्नुः** पूर्वोत्तरव्याहतार्थान् कथयन्तः स्वोक्तं दुरर्थं स्वयमेव निराचक्रुः । **ससंभ्रमोच्चस्वरकृत्** तेषां

तदुपकारस्मरणसंभ्रमेण उच्चस्वरेण विष्णोः परिवारतया तत्स्तोत्रकृत् । यद्वा ता व्याहतीरेव तदभिप्रायानुसारेण युक्तिसंभ्रमसमुपबृंहितस्वरेण प्रदर्शकः ॥ ९९४ ॥

पतीनां मरणात्सर्वा दुर्वाङ्नारीगृहे गृहे ।
स्वार्थैः सहान्योन्यघातैर्हता वीक्ष्याफलां पुरीम् ॥ ९९५ ॥

उपेक्ष्यार्थांश्च तांस्त्यक्त्वा निर्गतोऽहं ततो बहिः ।
कथामेतामकथयं सर्वां गुर्वग्रतो मम ।
कृती स सुकृतीनां तु कथां कृतिमकारयत् ॥ ९९६ ॥

अर्थानां पूर्वोत्तरविरोधः प्रमाणान्तरविरोध एव वधः । वाचां तु अतत्वावेदकत्वलक्षणमप्रामाण्यम् । **अफलां** नञः अभावः विरोधश्चार्थः । निष्फलां तमोरूपविपरीतफलां च **उपेक्ष्य** तिरस्कृत्य । **त्यक्त्वा निर्गतः** 'सच्छास्त्रमभ्यसेन्नित्यं दुःशास्त्रं तु परित्यजेदि'त्युक्तेः । **बहिः** 'भीतोऽहमभयं तत्त्ववादिनामेव पद्धतिं' इति गुणसौरभे स्वयं शंसनात् । **गुरोः अग्रे** अशेषतात्त्विकासुरभञ्जकस्य तथा तत्प्रेरणाप्रयुक्ताशेषदुर्मतभञ्जकस्य अत एव प्रभञ्जनशब्दवाच्यस्य मध्वगुरोः सन्निधौ । **अकथयम्** दुर्मतदुर्वासनादूरीकरणेन शरणागतं मां समुद्धरेति संप्रार्थये । **कृती सः** मध्वगुरुः । **सुकृतीनां** भाष्यतट्टीकादीनां **कथां कृतिं** अर्थवर्णनपरां **कृतिं** युक्तिमल्लिकां **अकारयत्** । वीणां वादयन्वैणुक इव अन्तर्बहिः प्रेरणेन रचयामास । अहं तु निमित्तमात्रमिति भावः ॥ ९९५ ॥ ९९६ ॥

स्वकोशस्थसदर्थाख्यवित्तैर्दत्तैः स एव तत् ।
विद्रावयेद्धि दारिद्र्यं दद्यान्मध्वो गतिं च मे ॥ ९९७ ॥

प्रार्थनाप्रकारमेवाह **स्वेति** । **कोशः** सर्वमूलग्रन्थाः । **सदर्थाख्यवित्तैः** । सच्छब्दवाच्यविष्णूत्कर्षप्रतिपादकैः शास्त्राभिधेयैः तदाख्यैर्वित्तैः । 'अर्थोऽभिधेय-रैवस्तु प्रयोजननिवृत्तिषु' इत्यभिधानात् । **दत्तैः** गुरूपदेशेन बोधितैः । **गतिं** ज्ञानं भगवत्पदप्राप्तिं च ॥ ९९७ ॥

न शास्त्राभिज्ञाना न च नियमयुक्ता न यमिनो
न मन्त्रानुष्ठानव्रतचरणचित्ता अपि वयम् ।
न तद्यन्नोपेतास्तदपि चतुरा एव नितरां
वदामो यद्दिष्ट्या हयवदन तुभ्यं नम इति ॥ ९९८ ॥

विनयं प्रदर्शयति **नेति**। ग्रन्थनिर्माणरूपेण कार्येणैव शास्त्राभिज्ञत्वादीनां कारणानां सिद्धत्वेन तन्निषेधस्य प्रमाणबाधितत्वात्। **तुभ्यं नमः** इति निर्देशेन हयग्रीवस्य प्रत्यक्षविषयता द्योत्यते । परोक्षत्वे ते नमः इत्यवक्ष्यत् । क्वचित्तथोक्तिः साकल्येनाज्ञेयत्वाभिप्राया । हयग्रीवस्य साक्षात्कारश्च शास्त्राभिज्ञत्वाद्यशेषसाधन-संपत्समृद्धिमाक्षिपति ॥ तेन वस्तुतो मयि हयग्रीवानुग्रहासादितं यमनियमव्रतादिकं साधनजातं अस्त्येवेति ज्ञाप्यते। अभिप्रेतेन साधनबहुत्ववत्त्वेन वयमिति बहुवचनम्। शास्त्राभिज्ञा इत्यादिकस्य निषेधप्रतियोगितया चतुरा इत्यस्य च विधेयतया अन्वयात् वयमित्यस्याविशेषणतया सविशेषणस्य तु नेति निषेधस्याप्रवृत्तेरेकस्मिन्नपि बहुवचनं ज्ञेयम् । चतुरत्वे हयग्रीवस्यापरोक्षस्य नित्यं नमनमेव प्रयोजकं न शास्त्राभिज्ञत्वादिमात्रं इति शंसनेन प्रतिश्लोकं युक्तिचतुरत्वपरिप्लुतेऽस्मिन्ग्रन्थे बुभूषुभिरादरातिशयः कर्तव्य इति ध्वन्यते । दिष्ट्या इति हयग्रीवनमनस्य हर्षहेतुत्वं मङ्गलकरत्वं चाह । 'दिष्ट्या हर्षे च मङ्गले' इति मेदिनी । नितरां इत्येतच्चतुरा इति वदामः इति चोभयत्र संबध्यते । यतः कारणात् नितरां निरन्तरं भक्त्यतिशयेन हयवदन तुभ्यं नम इति वदामस्तस्मान्नितरां चतुरा इति हेतुहेतुमद्भावो ज्ञेयः । अनेन श्लोकेन अहङ्कारखण्डनं निमित्तीकृत्य ग्रन्थावसाने मङ्गलमपि हयग्रीवनमनरूपं समनुष्ठितं ज्ञेयम् ॥ ९९८ ॥

आचार्यः पवनोऽस्माकमाचार्याणी च भारती ।
देवो नारायणः श्रीशो देवी मङ्गलदेवता ॥ ९९९ ॥

ग्रन्थस्य परममाङ्गलिकत्वसिद्धये अन्तेऽपि पुनर्गुरुदेवतास्मरणरूपं मङ्गलमाचरति **आचार्य इति**। निरुपपदशब्देन आचार्यवर्यत्वमाह 'यथावद्व्याचिख्यासुर्भगवानाचार्यवर्यः' इति तत्वप्रकाशिकोक्तेः। **पवन** इति निर्देशेन मध्वस्य मारुततृतीयावतारतायाः सौरभेऽस्मिन्नुदाहृतसुबहुलश्रुतिस्मृति-

सिद्धतां स्मारयति। अनेन 'आचिनोति हि शास्त्रार्थं आचारे स्थापयत्यपि स्वयमाचरते यस्मात्तस्मादाचार्य उच्यते' इति प्रमाणोक्तस्य आचार्यपदप्रवृत्ति-निमित्तस्य वायावेव मुख्यतः सद्भावमाह । **आचार्याणी** आचार्यस्य स्त्री । आनुक् ङीष च। **भरत** प्रकाशरूपे विष्णौ नित्यनिरतो वायुः। तस्य पत्नी भारती एतद्ग्रन्थाभिमानिनी सकलवचनचेतोदेवता । साक्षात् देव इति संबन्धः । अग्निर्वै देवानामवमः विष्णुः परमः' इति श्रुतेः देवोत्तम इत्यर्थः । 'उद्भवः क्षोभणो देव' इति सहस्रनामसु पाठात् । यद्वा साक्षाद्देवः एतद्ग्रन्थप्रधानप्रतिपाद्यः । 'अत्र देवशब्दो देवतापर्यायः प्रतिपाद्यदेवतामाह' इति प्रमेयदीपिकोक्तेः। साक्षादित्येत-द्देहलीदीपन्यायेन देवीत्यनेनापि संबध्यते। परमात्मनः प्रधानप्रतिबिम्बभूता । 'आभासकात्वथ रमा' इति भगवत्पादोक्तेः । **मङ्गलदेवता** स्वयं नित्यमाङ्गल्याश्रया । कटाक्षमात्रेणेतरेषां माङ्गल्यप्रदा च । यथोक्तं 'यथा रसस्पर्शनतोऽयसोऽपि सुवर्णता स्यात्कमले तथा ते । कटाक्षसंस्पर्शनतो जनानाममङ्गलानामपि मङ्गलत्वमि'ति । 'देवी भाग्यात्मिका नृणामि'ति भगवत्पादोक्तेश्च । देवतास्तुतिमात्रपरत्वादस्य पद्यस्य क्रियाभिसंबन्धाभावो न दोषाय। येषां सानुग्रहप्रेरणयैव एवमीदृशी ग्रन्थमाला निरमायि तत्संस्मरणमात्रस्यैव परममाङ्गलिकत्वादिति भावः॥ अनेन ग्रन्थस्य समर्पणं भारतीरमणमुख्यप्राणद्वारा मङ्गलदेवीरमणे श्रीहयग्रीवरूपे देवोत्तमे नारायणे इत्यपि निरूपितम् ॥ ९९९ ॥

वादिराजाख्ययतिना साधिता युक्तिमल्लिका ।
मुक्तिसौरभसर्वस्वमित्थं सत्सु न्यवेदयत् ॥ १००० ॥

साधिता प्रसन्नीकृता । **युक्तिमल्लिका** ग्रन्थाभिमानिनी भारती । 'सिद्धं साधनं सव्यापारीकरणीयम्। व्यापारश्च प्रसन्नतैव' इत्युक्तेः ॥ मुक्तीति फलस्वरूपोक्तिः पराभिमतनिर्विशेषभावस्य पराकरणाय । तत्र सौरभासंभवात् । **सर्वस्वं** संपदम् । **इत्थं** उक्तप्रकारेण । तमेव प्रकारं विवृणोति **सस्त्विति**। सच्छब्दो मुख्यप्राणवाची । 'सतो बन्धुमसति निरविन्दन्' इत्यादिश्रुतिषु 'ततो वयं सत्प्रमुखा यदर्थे बभूविमात्मन्करवाम किं ते' इत्यादि स्मृतिषु च तत्र प्रयोगात्। **सत्सु** मुख्यप्राणावतारभूतेषु हनुमद्भीममध्वेषु। तेषां हृदयाम्बुजमन्दिरेषु **सत्सु**

इत्यावर्तते । नित्यसन्निहितेषु । **सत्सु 'सच्छब्द उत्तमं ब्रूयात्' 'सत्त्वं स्वातन्त्र्यमुद्दिष्टं'** 'सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते' इत्यादिप्रमाणैः सर्वोत्तमस्वतन्त्र-निर्दोषभगवदवतारभूतेषु लक्ष्मीहयग्रीवात्मकेषु रामकृष्णवेदव्यासात्मकेषु भगवद्रूपेषु । **न्यवेदयत्** समर्पयांबभूव । तथा समर्पितं सौरभं तत्त्वज्ञानं **सत्सु** सात्त्विकप्रकृतिषु मुमुक्षुषु ॥ तद्वचनचेतस्सु । **न्यवेदयत्** सानुग्रहं संस्थापयामास । सकलवचनचेतोदेवतात्वात् निरूढमकरोत् ।

श्रीवादिराजतीर्थार्याः श्रद्धाजाड्येन मत्कृतम् ।
क्षाम्यन्तु साहसं नित्यं प्रीताः सन्तु कृपालवः ॥

यत्कृपालेशमालम्ब्य लब्धात्मेयं कृतिर्मम ।
श्रीश समर्पयन्त्वेनां सत्याभिज्ञगुरूत्तमाः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्वादिराजतीर्थश्रीपादविरचितायां श्रीमद्युक्तिमल्लिकायां फलसौरभसर्वस्वं संपूर्णम् ॥

॥ श्रीमद्वादिराजबन्धवे हयवदनाय नमः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीमत्सत्याभिज्ञतीर्थश्रीचरणचरणाराधक श्रीसत्यप्रमोदतीर्थविरचिता श्रीमद्युक्तिमल्लिकाविवृतिः संपूर्णा ॥

॥ श्रीकृष्णार्पणमस्तु ॥